शौनकस्मृतिप्रारंभः
२९००

श्रीगणेशायनमः॥हरिः ॐ॥ ॥पुण्याहवाचनविधिंवक्ष्यामोयथाविधिः॥प्रयोक्तुःकर्मणामादावंतेचोदयसिद्धये॥१॥अर्चितान्ब्राह्मणान्पूर्वंगंधमाल्यैःसदक्षिणैः॥निष्ठेयुःप्राङ्मुखावायुग्मावक्कारोदर्भपाणयः॥२॥उदङ्मुखोवाचयितानिष्ठंतेभ्यस्तदक्षिणे॥बिभ्रत्कुंभमपांपूर्णंपिहितानन्मचितं॥३॥तत्रादावापइत्येवंवदेद्वाचयितानतः॥वक्कारेपिशिवाआपःसंत्विमेवंब्रुवंत्यथ॥४॥गंधाइतिवदेदेकःसुगंधाःसंत्वितीतरे॥वदेत्पूर्वंसुमनसइत्येवमपरेपिच॥५॥सौमनस्यमितिब्रूयुरस्तुशब्दांतमत्वरा॥पश्चादक्षताइत्येवब्रूयाद्वाचयितानतः॥६॥अन्येक्षतंचारिष्टंचास्त्वित्येवंब्रूयुरर्चिताः॥ततोवाचयितादिप्रोदक्षिणाद्रव्युदीरयेत्॥७॥स्वस्तिशब्दाद्यमुच्चार्यदक्षिणाःपांत्वितीतरे॥बर्कुदेयमितिब्रूयुरस्तुशब्दांतमत्वतः॥८॥कर्तोयदक्षिणंजानुपातयित्वामहीतले॥उदङ्मुखोजपेत्सर्वंश्रद्धयेत्येवमादिकं॥९॥जपित्वोत्थायतंकुंभबिभ्रन्निष्ठेत्तुदङ्मुखः॥मनःसमाधीयतामित्येवंवाचयितावदेत्॥१०॥समाहितमनसःस्मइत्येवंचब्रुवंत्यथ॥प्रसीदंतुभवंतइत्यथवाचयितावदेत्॥११॥प्रसन्नास्मइतिप्रीताःप्रतिब्रूयुरितीतरे॥शांतिःपुष्टिस्तथातुष्टिरृध्यविघ्नान्यनुक्रमात्॥१२॥आयुष्यमारोग्यमितिशि

१

वंकर्मेतथापिच॥अस्तुशब्दांतमुच्चैरवाचयित्वांतथापरे॥१३॥प्रजापतिःप्रीयतामित्येवंवाचयितावदेत्॥परेप्रथममुच्चार्यप्रीयतांभगवानिति॥१४॥पश्चात्प्रजापतिरितिब्रूयुःसंपन्नमानसाः॥पुण्याहंवाचयिष्यइमितिवाचयितावदेत्॥१५॥वाच्यतामितिभाषंतेवक्कारश्चसुचेतसाः॥अथोज्ञातेवशाकुनेसामगार्यमिपूर्वकं॥१६॥ऋचंसर्वेसहब्रूयुःस्तोवाचयिताद्विजः॥ओमुक्तिपूर्वात्पुण्याहभवंतिरितिभाषितान्॥१७॥परेब्रुवंत्विमेब्रूयुरोंपुण्याहमितीतरे॥पुनरप्येवंद्विरुक्त्वापुण्याहमितिवाचनं॥१८॥ततःस्वस्तिनऽइंद्रेतिऋचंब्रूयुःसहोभये॥ततोवाचयितापूर्वंमोंस्वस्तीत्यभिधायतु॥१९॥पश्चाद्भवंतइतिचेद्भवंहितिचभाषंते॥ओंस्वस्तीतितयेवान्येप्रतिब्रूयुरतःपरं॥२०॥प्रारीप्सितंचतुर्थ्योक्तकर्मेवाचयितातनः॥स्वस्तीत्याद्यंब्रुवंस्तंतंपूर्ववत्समुदीरयेत्॥२१॥वक्कारश्चचतुर्थ्यंतंतत्कर्मोक्तिपूर्वकं॥स्वस्तीतिचप्रतिब्रूयुरथसर्वेपितेद्विजाः॥२२॥ऋध्यामस्तोममित्यादिऋचंब्रूयुःसहोचकैः॥ततोवाचयितार्द्धिंभवंतइतिपूर्वकं॥२३॥ब्रुवंत्वितिवदेदन्येब्रूयुरोंसमृध्यतामिति॥एवमेवोभयेपिद्विरभ्यसेयुरिदंपुनः॥२४॥पु

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ण्याहादेस्त्विरभ्यासेमंद्रमध्योत्रनिस्वनैः॥आश्रयेरन्निमेसर्वेयथागमपरंपरं॥२५॥ततोवाचयितांकुंभज
लंसंस्राव्यमूर्धनि॥किंचित्तिंचेतयैवान्येब्रूयुश्चविविधाशिवः॥२६॥आपोहिष्ठेतिभिस्तिस्रश्शंनोदेवीत्यृ
चैकया॥इशानावार्योणामिनिमुद्वत्यघमर्षणं॥२७॥तरत्समंदीतिसूक्तंसर्वपापप्रणोदनं॥पवस्वसो
ममित्याघैर्त्रभिःप्रोक्षसमंततः॥२८॥पुण्याहंवाचइत्येवंसर्वकल्याणवान्भवेत्॥स्वस्तिवाचनमेतत्तु
सर्वेषामृद्धिकर्मणां॥२९॥आदावंतेचकर्तव्यमितियज्ञविदोविदुः॥ ॥इतिशौनकीयेपुण्याहवाच
नं॥ ॥अथांकुरारोपणविधिंप्रवक्ष्यामिविशेषतः॥शौनकोहंद्विजातीनांमंगलार्थमुदीरितं॥१॥कुंभे
मुद्धृतेकल्याणेगोमयेनोपलिप्यच॥सिताक्षतैःसंप्रकीर्यशालिकास्थापयेद्विजः॥२॥मध्येचतुर्मुखंवि
द्यात्पूर्वे वज्रिणमेवच॥दक्षिणेतुयमंविद्यात्पश्चिमेवरुणंतथा॥उत्तरेशशिनंविद्यात्पालिकास्त्वधिदेव
ता॥वल्मीकमृत्तिकाद्वादंशुष्कगोमयमेवच॥४॥एतानिप्रक्षिपेतासुपालिकासुयथाविधिः॥दूर्वाअश्वत्थ
पूर्णेचशिरीषंबिल्वपत्रकं॥५॥तासांमूलेषुविन्यस्यचतुःसूत्रेणवेष्टितः॥मध्येतुब्राह्मणाराध्यगंधाद्यैरर्च २

येत्क्रमात्॥६॥ऐंद्रादिक्रमणंवस्यादमुष्मैनमएवच॥तिष्ठन्कर्तोज्जपेन्मंत्रंपश्चात्पाद्मुखएवच॥७॥दिशांपतीनम
स्यामिसर्वकामफलप्रदान्॥कुर्वंतुसफलंकर्मकुर्वंतुसफलंशुभं॥८॥व्रीहियवमाषतिलमुद्गमिश्रितमर्षपात्॥
तत्यक्षाल्यचनोयेषुवापयेदंकुरार्पणं॥९॥गंधोमुद्धृतेकल्याणेकारयेदंकुरार्पणं॥ब्रह्मज्ञज्ञानमितिनुमध्ये
ब्रह्माणमर्चयेत्॥१०॥यतइंद्रभयामहेप्राच्यांप्रस्थापयेद्बुधः॥नाकेसुपर्णमितिचततोदक्षिणएवतु॥११॥त
त्वायामिब्रह्मणेतिप्रतीच्यांवापयेद्बुधः॥सोमोधेनुमुदीच्यांचौषधीर्वापयेत्क्रमात्॥१२॥शुद्धाभिःमिकता
भिश्चप्रच्छाद्यापःप्रमेचयेत्॥विधायविगुणंयेसर्वमान्मानमितिगम्यते॥१३॥आमंत्रमात्मज्ञाज्ञाताआषष्ठंपु
त्रनाशनं॥पंचमाद्रक्तिमान्विप्रोसर्वकामफलप्रदं॥१४॥चतुर्थेचांकुरंविद्यात्पापीयांज्ञायतेनुसः॥त्र्यहेनुस
र्वकामानांमंकुराहनिचाद्यते॥१५॥आयुष्करंश्रीप्रदंचशुभेषन्येषुसर्वशः॥तस्मात्सर्वेषुकार्येषुवापयेदंकु
रार्पणं॥१६॥यद्यंकुरार्पणंरहितंतत्सर्वमशुभंभवेत्॥मद्योंकुरार्पणंवापिमद्यःकर्तुममाहितः॥१७॥अज्ञानेतंदुनै
मित्तैःमद्यएवशुभांकुरे॥पालिकानिप्रपूर्व्यैवंपंचत्रीण्येकमेवच॥१८॥अलंकृत्यचपद्माभैःपुष्पैरापूर्यतेपि

च॥ अंकुरोक्तक्रियाःसर्वाःसैलेरेवसमाचरेत्॥१९॥ओषधीनांचसर्वासांचंदःप्रोक्तोधिदेवतं॥तस्मात्सर्वप्रयत्नेन
तेनगान्यंकुरार्पणं॥२०॥आधानंगर्भसंस्कारजातकंनामकर्मच॥हित्वांकुरार्पणंविद्वादन्यत्रशुभकर्मसु॥२१॥
॥इतिशौनकीयेअंकुरार्पणं॥ ॥अथाभ्युदयिकंश्राद्धमहंवक्ष्यामिशौनकः॥भवेदभ्युदयश्राद्धमृद्धिपूर्तेषुक
र्मसु॥१॥शुचिर्भूत्वांतिकंगत्वापूर्वेद्युश्चायजन्मनः॥स्वयमेवद्विजाग्र्याणांतेषांकुर्यान्निमंत्रणं॥२॥निमंत्रयेतु
पूर्वेद्यौविश्वेदेवार्थमादितः॥पितृभ्यस्तुयथाशक्तिंयुग्मान्गुणवतोद्विजान्॥३॥अपरेद्युरमानीयब्राह्मणान्सा
न्निमंत्रयेत्॥स्नानद्रव्यैःकृतस्नानान्नक्रोधादेवपूजकान्॥४॥तैलेरभ्यक्तसर्वांगाकुर्यादेवपुरःसरं॥ततस्नाता
समायातानुपवेश्येयथापुरं॥५॥पादान्प्रक्षाल्यसर्वेषांप्राङ्मुखानुपवेश्यच॥तेभ्योपिदद्यादप्यूर्वमासनार्थं
मृदून्कुशान्॥६॥तेषुतेषूदगग्रेषुनिषीदेषुरथापुनः॥तेषांहस्तेषुपोदद्यादपार्घ्यमुपकल्पयेत्॥७॥देवेभ्यो
पिएवमुद्यादिहार्घ्यस्मृतिचोदनात्॥पुरोनिधायपात्रेद्वेविश्वेदेवार्थविप्रयोः॥८॥अंतर्धायततोदर्भान्निषिच्य ३
चजलंतयोः॥ यवोसीत्यादियुक्तेनमंत्रेणप्रतिभाजनं॥९॥यवान्चिकीर्यविप्रेभ्योस्वाहाशब्देनिवेदयेत्॥वि

श्वेदेवाःइदंवोर्घ्यमितिमंत्रमुदीरयेत्॥१०॥दत्वार्घ्यमाचपित्रर्थेमथार्घ्यमुपकल्पयेत्॥त्रिषुपित्रादिपात्रेषुकुशा
नंतर्निधायतु॥११॥क्रमेणैवंततस्तेषुनिषिच्यापोयताऽभपः॥मंत्रेणशन्नोदेवीरित्याद्यपयातुमंत्रयच॥१२॥य
वोसीत्यादियुक्तेनमंत्रेणप्रतिभाजनं॥यवान्क्षिप्त्वादिपित्र्येद्विजन्मभ्योनिवेदयेत्॥१३॥अपःप्रथमपात्रस्थाः
स्वाहार्घ्याऽइतिमंत्रतः॥तेषामाद्यस्यविप्रस्यहस्तेन्यंजलमादितः॥१४॥सित्वाचार्घ्यंसमादायजलंदक्षिणपाणि
ना॥द्वितीयःपात्रतःकिंचिज्जलमादायपूर्ववत्॥१५॥तत्रेदंतेर्घ्यमित्येषपित्रूनपपरादिकाः॥मंत्रोविभज्यतेना
न्यनंत्रंपूर्ववदाचरेत्॥१६॥एवंपित्र्यंविप्रेभ्यःप्रदायार्घ्यंयथाविधिः॥पितामहार्थंविप्रेभ्योदत्वार्घ्यंचयथापुरा
॥१७॥प्रपितामहश्रौषादिमिदंतेर्घ्यमितीरयेत्॥मंत्रेमयायथापूर्वंतंत्रमन्यत्समाचरेत्॥१८॥पित्रादित्रितयस्या
र्थेयथावत्करणाद्विजैः॥द्वादशीनंतदामंत्रतयोरेवार्घ्यकल्पनं॥१९॥भोजनंचेतिविद्वांसोवदंतिबह्वृचेदिनः॥
आमंत्र्यथेमपात्रेजलमुनटयोर्चयोः॥२०॥ताभिर्मुखंसमंत्रीतपुत्रदद्याभिवांछितं॥पात्रेतंचतृतीयेनपात्रे
णैवपिधायतु॥२१॥यथानस्थितमाश्राद्धसमाप्तेस्तनुनोद्वरेत्॥अत्रगाथाद्वयंगीतमाचार्योपिनतद्यथा॥२२॥

नोद्धरेत्यथमंपात्रंपितृणामर्घ्यपूरितं॥आहृतास्मत्रतिष्ठंतिपितरःशौनकोब्रवीत्॥२३॥उद्धरेद्यदिचेत्पात्रंविकृतं
वायदाभवेत्॥अभोज्यंतद्भवेल्लोकेकुष्ठैःपितृगणैर्गतैः॥२४॥एतस्मिन्नेवकालेनागंधमाल्यादिभिर्द्विजान्॥अ
भ्यर्चमर्वश्राद्धंगवसनाभरणादिकं॥२५॥तेभ्यःप्रदद्यात्मश्राद्धंवैश्वदेवपुरःसरं॥भोजनार्थमन्नानितानीदा
यादायकिंचन॥२६॥सर्पिषाक्रायदायाथमेसणेनयथाविधिः॥तदंशीकृतमंत्राभ्यांजुहुयाद्विजपाणिषु॥
॥२७॥अतस्वधानमःशब्दस्थानेस्वाहेत्युदीरयेत्॥हुत्वाप्रागग्नयेकव्यवाहनायेतिमंत्रतः॥२८॥सोमायेत्या
दिनापश्चान्मंत्रेणजुहुयाद्दह॥तच्चभुक्तवतेविप्रायथेष्टंभोजयेनतः॥२९॥तस्मोनन्वाद्दिजोज्ञात्वामधुवाता
ऋतायते॥इत्यादिकंतच्चमर्थोउपास्मैगायतानरः॥३०॥ऋचोंसंनमीत्याद्यामेतांचचंयथाक्रमं॥श्रावयित्वा
थमंपंनमितिपृच्छेद्दिजानथ॥३१॥तेपिसंपन्नमेवेतिब्रूयुस्तृप्तिसमन्वितः॥अन्नशेषेणकिंकार्यमितिपृ
छेद्दिजोनतः॥३२॥तद्दृष्टैःसहभोक्तव्यमितिप्रत्युक्तपूर्वकं॥प्रदद्युसकलंतस्मैस्वीकरोतिचयथाविधिः॥३३॥नो
द्वासयेच्चविप्राणांमुनिश्रेष्ठन्यादितक्षयात्॥प्रकीर्योन्नंचतद्यत्रविप्राणाचमयेनतः॥३४॥आचम्यासनसंस्थे ४

भ्यःप्रदद्याद्दुक्तदक्षिणां॥सर्वाश्चाभ्यर्चगंधाद्यैःपितृपूर्वंविसर्जयेत्॥३५॥तेषांविसर्जनारंभेपात्रंविकृणुयात्पितुः।
ब्राह्मणास्तासुपिंडांतेगमयेदोस्वधोच्यतां॥३६॥इत्युच्चार्यतनस्तेषुस्वधेत्युक्तागृहाद्बहिः॥गच्छेयुरथचांतांमुप्र
त्युच्चार्यस्वधोच्यतां॥३७॥इत्येवंगमयेगीतंतथेवोक्तावव्रजेत्यथ॥विश्वेदेवाइतिवचःपूर्वमुक्तानतःपरं॥३८॥प्री
तयामीतिनिर्दिश्यविश्वेदेवात्समुत्सृजेत्॥नांदीपितरःप्रथमप्रीयतामितिपश्चिमं॥३९॥विश्वेदेवाइत्युदीर्यु
मिर्गच्छेयुर्गृहाद्बहिः॥एषमिच्छंतिपूर्वेद्युःपूर्वेष्टदयकर्मसु॥४०॥नांदीश्राद्धविधानंतुनित्यश्रुतिनिबंध
नं॥इतिनांदीश्राद्धं॥ ॥अथकौतुकबंधस्यप्रयोगेत्रनिगद्यते॥विवाहादौशुभेकार्येराज्ञावाऽभिहितेतथा॥
॥१॥सांकुरेपालिकायुक्तेस्थलेदुंदुभिपूरिते॥सहाक्षंतेनकार्येणसोदकुंभंनिधायच॥२॥कार्पासोद्भवसूत्रेतु
त्रिगुणीकृत्यपंचवा॥निधायतंदुलान्पात्रेपूर्वेकुंभेनिधायच॥३॥कुशैःकुंभोदकेमंत्रैःप्रोक्ष्याविप्रेसुखासने॥भू
र्भुवस्वरमावित्र्याऋग्भिर्वेदादिभिस्तथा॥४॥आपोहिष्ठादिकैर्मंत्रैसुद्वत्यघमर्षणैः॥श्राद्धंवमास्मिन्मत्यापा
वमान्यमर्थंवच॥५॥रक्षोहणंचरात्रिंचऋणुष्वेतितथैवच॥अतोदेवाअवंन्वितियेनामात्रमथैवच॥६॥श्रीसूक्तं

शिवसंकल्पंवायुसूक्तेनयैवच॥मुंचामित्येतिसूक्तेनस्योनापृथ्वीभवेतिच॥७॥इविष्णोदाःसवितेतिनवोविष्णुच्च
येतिच॥उलूकयापित्रंगेतिऋग्भिरेताभिरर्त्विजौ॥८॥ज्ञातवेदसइत्यृचासूक्तमादायलेपयेत्।गंधेनदक्षिणे
हस्तेबध्वापुंसस्तुतंतुना॥९॥विश्वेतानेसवनेतिस्त्रीणांसव्येकरेतया॥श्रियेज्ञातऋचैकयाध्वर्युश्चसमाहितः
॥१०॥शतंजीवेतिद्वाभ्यांचबृहत्सामेतृचैकया॥येयज्ञेचाष्टभिस्तुरंध्रवकमृचैकया॥११॥भस्मनाचक्षतैर्वो
पिरक्षांकृत्वासमापयेत्॥दद्यादाचार्यहोमादिऋत्विग्भ्यःपूज्यष्टाक्रितः॥१२॥विद्वांत्सर्वप्रयत्नेनकुर्यात्कौतूक
बंधनं॥इतिकौतूकबंधनं॥ ॥अथस्थालीपाकः॥ ॥अथशुद्धसमेदेशेस्वासीनःप्राङ्मुखःशुचिः॥दृषुमात्रंच
तुर्दिक्षुगोमयेनसवारिणा॥१॥उपलिप्यस्थंडिलंतुचतुरस्रंतुसर्वतः।तस्मिंस्तुरोयज्ञियंस्यशकलेनषडुल्लिखे
त्॥२॥उदक्संस्थांलिखेत्पश्चात्तिस्रोप्राग्देशमाश्रिकीं॥तदंतयोरसंस्पृष्टेदेचप्रागायतेलिखेत्॥३॥तिस्रोमध्ये
तयोर्लिख्यलेखाःप्रागायताऽपि॥निधायशकलंतस्मिन्नभ्युक्ष्यस्थंडिलंजलैः॥४॥निरस्यशकलंप्राच्यांपा
णिंप्रक्षाल्ययाग्यतः॥निर्मेथ्ययज्ञियात्काष्ठादानीतंवाद्विजातयात्॥५॥उत्तमोरणिर्ज्ञेयउत्तमःसूर्यकां

MEMORIAL

तिजः॥उत्तमःश्रोत्रियागारामध्यमःस्वगृहादपि॥६॥यज्ञियेश्वत्थेरज्जुंत्रिसंधिविहतांचतौ॥स्थंडिलेग्निंन्या
हृतिभिःप्रतिष्ठाप्यप्रतापयेत्॥७॥दीप्तमग्निमसंमृज्यसंप्रोक्ष्यपरिनाजलैः॥आरब्धकर्मांगतयाभन्वादध्यात्त
मिद्धयं॥८॥काष्ठद्वयंवासंकल्प्यअमुंयक्ष्यइतिब्रुवन्।अनेनयक्ष्यमाणायादेवतायाःपरिग्रहः॥९॥अन्वा
धानमिदंकार्यमग्न्याधानादनंतरं॥अथेध्मस्यसनहनंबर्हिःपश्चादधीयते॥१०॥ग्रंथिंचकृत्वासन्नह्यत
थेध्मबर्हिरन्यया॥बर्हीरज्ज्वादिरावेष्येध्मंतुसकृदेवतु॥११॥रज्जुमूलेदिरावेष्यतदग्रेणप्रदक्षिणं॥तद
ग्रंशेषंरज्जवोद्वावप्युपरिधापयेत्॥१२॥अयामयेध्मसमिधःप्रादेशादयमुच्यते॥वितस्तिमात्रमथवा
सस्यायावेकविंशतिः॥१३॥त्रयःपरिधयोत्रेदेआधारसमिधावपि॥अनुयाजसमिदेकादाधानेदशपंच
च॥१४॥एकविंशतिसंख्येव मिध्मस्यपरिगण्यते॥तस्मिन्प्रमाणद्विगुणंग्राह्यापरिधयःस्रुचः॥१५॥
ज्येष्ठमध्यमकनिष्ठाहीनांगुष्ठप्रमाणतः॥सिष्टेनिष्टकनिष्टस्यविशिष्टामध्यमत्रिषु॥१६॥द्राघीयांसःप
रिधयःकनिष्ठाज्येष्ठउच्यते॥द्रवेणयज्ञियावृक्षःसमिधःसर्वकर्मसु॥१७॥पालाशाखादिरश्वत्थवेकंकत

शमीवटः॥विणूदुंबरबिल्वाद्यायज्ञियास्तरवस्तथा॥१८॥यज्ञियद्रुमशाखास्वस्कंधपर्णादिवर्जिताः॥आर्द्रा शु
ष्कांसमासाद्यऋजवोदोषवर्जिताः॥१९॥भग्नपृष्टीनभिन्नाश्चवक्राद्याश्चनिनिस्तुचं॥स्वयंशुष्काहस्तवृतंपशुन
ग्धावशेषिताः॥२०॥विद्युद्दग्धाग्निदग्धाश्चविक्रीताप्रतिनादिभिः॥प्राण्यर्थंयुषिताःसुषिराकीटप्राया श्चरकृतः॥२१॥ ५
मलाद्यमेध्यलिप्ताश्चसमिद्दोषउदाहृताः॥यज्ञियानितृणानीत्वग्रेप्रादेशमात्रतः॥२२॥प्रछिद्यपरिगृह्णीयामुष्टि
मात्रंतुबर्हिषि॥परिस्तरणार्थायाधुनातुर्मुष्टिस्तृणान्यपि॥२३॥कुशाःकाशाश्चदूर्वाश्चमौंजप्रभृतिमेववा॥उ
शीरश्चेनिजानीयाद्यज्ञियानितृणान्यपि॥२४॥अथोदितःसमिद्दोषःकुशादीनांतथाभवेत्॥अग्निंपरिसमु
ह्याथपरिस्तीर्यचयज्ञियैः॥२५॥तृणैःपर्युक्ष्यपात्राणिसादयेद्यज्ञसाधनैः॥पात्राणिसादनार्थानिसौवर्णा
निमहीयते॥२६॥दैवेकर्मणिसर्वत्रौप्यानिपितृकर्मणि॥उच्यतेसुसमिद्दस्यसादकेनैवपाणिना॥२७॥प्रदक्षि
णंत्रिःसंमार्ष्टियत्तत्परिसमूहनं॥प्रादेशमात्रदर्भाग्रैबाहुमात्रैरथापिवा॥२८॥परितोग्नियंस्तरणःपरिस्तरण ६
उच्यते॥यदिप्रादेशमात्रास्युश्चतुर्भिस्तृणमुष्टिभिः॥२९॥परिस्तृणीयात्तागग्रैश्चतुर्दिक्षुयथाक्रमं॥ततःपुर

स्तादक्षिणतःपश्चादुत्तरतःक्रमात्॥३०॥उदक्संस्थंदर्भशिदक्षिणोत्तरतस्तृणैः॥तैरग्रैस्तीर्यमाणानांतृणमूलानिछा
द्यच॥३१॥अथदीर्घैस्तृणापात्रैर्दक्षिणोत्तरयोर्दिशोः॥दक्षिणान्युत्तराणिस्युरधस्ताद्युत्तराणितु॥३२॥तृणेभ्यःस्ती
र्यमाणेभ्यःपूर्वपश्चिमयोर्दिशोः॥दक्षिणान्युत्तराणिस्युरधस्ताद्युत्तराणितु॥३३॥ऋत्विग्ब्रह्मावृतश्चैत्यादग्रेदक्षि
णतस्तृणैः॥तदासनार्थंप्राक्कूलैस्तृणानांमुष्टिसंमितैः॥३४॥प्रणीतासादनार्थंचपात्राणांसादनायच॥संस्तीर्यो
त्तरतोवह्निःपर्युक्षेनोदकेनच॥३५॥पाणिनोदकमादायप्रागुदक्त्रिःप्रदक्षिणं॥आरभ्योसतयत्तूष्णींमाद्युः
पर्युक्षणंबुधाः॥३६॥तृणेष्वधोमुखान्येवयज्ञियानितुसादयेत्॥अन्येश्चसाधनैःसार्द्धंप्राक्संस्थानयथाक्र
मे॥३७॥स्रुवंचप्रोक्षणीपात्रंप्रणीतापात्रमेवच॥आज्यस्थाल्यासहेध्मंचबर्हिष्यार्द्धसादनं॥३८॥चरुःप्रोक्ष
णयोःपात्रंस्रुवंजुह्वातथैवचप्रणीतापात्रमाज्यस्यपात्रेणेध्मंचबर्हिषा॥३९॥त्रिरद्भिःप्रोक्ष्यपात्राणितृणैःप्रछा
द्यपाणिकैः॥हत्वापवित्रेआसिच्यवारिप्रोक्षणभाजने॥४०॥उत्पुनीयात्पवित्राभ्यामपःस्तूष्णींत्रिरेवतु॥अंगुष्ठा
नामिकाभ्यांतुपाण्योरुक्तयोःपृथक्॥४१॥गृहीतमूलमूलाभ्यामित्युत्पवनमुच्यते॥अथर्त्विजंवरणीयंकुली

नंब्राह्मणोत्तमं॥४२॥तत्पाणिंपाणिनागृह्यब्राह्मणंदक्षिणात्सुधीः॥द्वितीययाविभक्तंचतंनामादिश्यदक्षिणेइति॥४३॥उक्तोदक्षिणोस्मीतिवदन्नग्रेणाग्निंपरीत्यच॥तस्मिंस्तुदर्भास्तरेत्वादक्षिणेचासनेतृणं॥४४॥अंगुष्ठनामिकाभ्यांतुसमादायनिरस्यच॥निरस्तइत्यनेनैवतत्प्रत्यग्दक्षिणादिशं॥४५॥अपसृष्टेदमहमित्युपविश्यतृणेषुसः॥समस्तपाण्यंगुष्ठाभ्यदक्षिणोपर्यवस्थिता॥४६॥अत्रवामोरूपर्यवस्थितदक्षिपादइतिव्याख्येयं॥अत्रोपवेशनानंतरंसमस्तपाण्यंगुष्ठत्वंब्रह्मणइतिभवन्मनेविशेषः॥ ॥निरस्तश्चोपवेशनंतथाब्रह्मन्नजपोपिच॥प्रायश्चित्तादिकृतिःसंस्थाब्रह्मणःकर्मपंकजं॥४७॥प्रणीतापात्रमादायपश्चादग्नेस्तृणेषुतु॥अंतर्धायपवित्रेतेसंपूर्योत्प्लुतवारिणा॥४८॥तृणच्छिन्नंसमुद्धृत्यधृतपाणिशिरःसमं॥अग्नेरुत्तरतस्तृणेष्वेतेष्वेवनिधायच॥४९॥तस्मिन्कालेतुनिर्वापःकर्त्तव्यश्चयथाविधिः॥आधायधायभूयैतुपश्चादग्नेस्तृणेषुच॥५०॥अंतर्धायपवित्रेतेव्रीह्यादीन्निर्वपेत्ततः॥चतुरश्चतुरोमुष्टीव्रीह्यादीनांपृथक्पृथक्॥५१॥तस्यैतस्यैदेवतायाएतन्निर्वपणंचरोः॥अभिधायचतुर्थ्यंतंप्रत्येकंदेवतापदं॥५२॥त्वाजुष्टंनिर्वपामीतिमंत्रंनिर्वपणेविदुः॥तथैवप्रक्षिपेदग्निः ७

सपवित्रेणपाणिना॥५३॥निर्वपामिपदस्थानेप्रोक्ष्यामीतिप्रयुज्यच॥अग्नेरुत्तरतस्तीर्णेकृष्णाजिनउलूखलं॥५४॥निधायोत्तरलोम्न्येवतस्मिन्व्रीहिनुलूखले॥मानयपत्नीमुसलेनावहन्यादमुंच्यव॥५५॥अनेषमेणांनिरूप्यच॥तएवोघावहन्यते॥विविच्याभूर्पणतुतास्त्रिःफलीकृततंडुलान्॥५६॥विभज्याभिमृशेदिदममुष्माइतिमत्पदैः॥प्रक्षाल्यमहतोयास्तोस्थाल्यामोप्यसंहवा॥५७॥तस्मिन्नग्नावधिश्रित्यपचेत्कांष्ठैर्हविःशनैः॥अथाज्यस्थाल्यामादायभाज्यंतस्यांनिषिच्यच॥५८॥उदगग्नर्निरूढेषुतंगारेषुसभस्मसु॥अधिश्रित्यविलाप्येतदवज्वल्यज्वलत्तृणैः॥५९॥आज्येप्रत्यस्यदर्भाग्रेअंगुष्ठपर्वमात्रके॥स्मृतिदीपिकायां॥निरूढस्याद्विजोग्नेर्यैःपरिस्तरणाद्बहिः॥६०॥अनिरूढःसवैवह्निर्यैःपरिस्तृतिमध्यतः॥यत्तुकैश्चिदुच्यते॥अग्नेरुत्तरतोंगारानिरूत्याज्यस्यसंस्क्रियां॥कुर्यात्परिस्तृतेर्दर्वाङ्परिस्तरणाद्बहिः॥तदेतच्चिंत्यंप्रकृतं॥पुनर्ज्वलद्भिरेभिस्त्रिस्तृणैःपरिहरेत्परा॥६२॥ओदनोदिहविर्मिस्रैःसंतिचेदितरैरिति॥अद्भिरेतानिसंप्रोक्ष्यप्रहृत्याग्नावुदङ्मुखन्॥६३॥पर्यग्निकरणायाग्निमनिरूढाद्यदाहरेत्॥बर्हिर्निरस्येन्नछेषंनिरूढाद्यदियोजयेत्॥६४॥उद्वास्यचमथांगारान्प्रत्यु

त्वापस्पृशेन्नतु॥तास्यामाज्यंत्रिरुत्पूयपवित्राभ्यांयथाविधिः॥६५॥सकृन्मंत्रेणदिरुक्स्रुंश्रीअग्नेतेसप्रहृत्यच॥सं परिस्तरणादग्नेःपश्चात्संप्रोक्षितेस्थले॥६६॥बर्हिःसंनहनीरज्जुमनुयाजेनिधायतां॥तस्यांबर्हिषिसंस्तीर्यप्राग ग्रेनिहितंभवेत्॥६७॥अथादायस्रुवौदक्षिणेनकरेणवै॥सव्येनदर्भौश्चादायसप्रोक्ष्याग्नौप्रतापयेत्॥६८॥ संमृज्यैत्रिबिलंमूलैर्दंडमध्येस्रुवस्यतु॥मूलंमूलैश्चदर्भाणांतथाजुह्वाविधीयते॥६९॥सहृदर्भैःस्रुवंजुह्वौ प्रताप्यप्रोक्ष्यताञ्जुह्वान्॥प्रहृत्यापउपस्पृश्यहविस्तानभिघारयेत्॥७०॥गृहीत्वाज्यस्रुवेणैपकेहविषिसेच नं॥अभिघारणमित्याहुस्तथान्येषुहविष्यच॥७१॥उदगुद्वासितंतस्मात्पुनरप्यभिघारयेत्॥आज्यस्यद क्षिणेपार्श्वेहविष्यासादयेत्पथक्॥७२॥अग्निंपरिसमुह्याथगंधपुष्पैरलंकृतं॥आत्मानंचाप्यलंकृत्येध्मा धायपाणिना॥७३॥इंध्मसंनहनीरज्जुमनुयाजेनिधायतां॥पक्षेतत्रैवदर्भेषुनिदध्यादितिबोद्धव्यं॥७४॥ऋग्वि धाने॥॥विघ्नानिनइतिद्वाभ्यामृग्भ्यांयोवद्भिमर्चयेत्॥तस्मिन्संपदेसर्वंयथाप्नोतिचाक्षयं॥७५॥आद्या रयेतामाज्येनत्वाघोरेतिस्रुवेणवै॥पश्चिमोत्तरमारभ्यचैवंपूर्वोत्तरानयेत्॥७६॥आघारावितितावेतौप्राङ्मुखे

ज्ञविज्ञानता॥अथाज्यभागौजुह्वात्याग्नेरुत्तरेग्नये॥७७॥स्वाहेतिदक्षिणेसोमायस्वाहेतियथाक्रमं॥प्राक्सं स्थामनयोमेध्यउदक्संस्थास्रुवाहुती॥७८॥प्रत्युक्तरेवाजुहुयात्साकंपूर्वेसिष्टकृद्विः॥सहपाकेधुनोत्यस्था ल्याःपात्रेतुनिक्षिपेत्॥७९॥विभज्याभिमृशेत्तानिपूर्ववत्प्रतिदेवतं॥जुह्वंसव्यसमादायोपस्तीर्यद्विरवद्यति॥ ८०॥आज्यस्यद्विरवदानंपंचावत्तेषुउच्यते॥जामदग्न्यावत्साविदाआर्ष्टिषेणास्तथैवच॥८१॥भार्गवश्यावना और्वाःपंचावत्तिनऽईरिताः॥एतेभ्योन्यद्विज्ञाःसर्वेज्ञेयाश्चतुरवत्तिनः॥८२॥भत्रभवान्जुह्वापार्श्वेणचक्रूय ते॥अवदायावदायैवंस्वेस्वेमंत्रैर्जुहोत्यथ॥८३॥स्थालीपाकस्यवाभावेआज्येनैवजुहोतितः॥अनवद्यत्वौविष्ट कृतंहविर्भिःसहदेवतु॥८४॥अवदायोत्तरार्द्धेतंनाभिघार्यहविःपुनः॥आज्यावदानैश्चेषाणित्रवदानानिपूरये त्॥८५॥यदस्यकर्मणइतिजुह्वांसिष्टकृदाजुहोति॥स्रष्टोरकमनूयाजसमिधंताप्रहृत्यच॥८६॥इध्मबंध नयोरज्जुंविस्रस्याग्नौप्रहृत्यच॥आमीनोवास्थितोवासन्नग्नेरुत्तरपश्चिमे॥८७॥अयाश्चेतिकपद्ध्यात्वमतोदे वाऽभवंतुनः॥इतिद्वाभ्यांव्याहृतिभिर्जुह्वाचतसृभिर्घृतं॥८८॥अयाश्चेत्यादिभिर्जुह्वासमुद्रादूर्मिसूक्ततः॥संत

नामाज्यधारांतपूर्णांकुर्यान्मयाचरेत्॥८९॥तुषकणांस्त्वमिच्छेषांसप्रोक्ष्याग्नेःप्रहृत्यच॥आदायपूर्णपात्रंतद्ब
र्हिष्याधायपाणिना॥९०॥स्पृष्ट्वादक्षिणहस्तेनतत्पूर्णमभिमंत्रयेत्॥प्राच्यादिक्ष्वादिभिर्मंत्रैःकुशैःप्रागादिषुक्रमा
त्॥९१॥उदकंतुप्रतिदिशंप्रोक्ष्याधस्तान्निधायतत्॥आपोअस्मान्मात्वनयाद्दमापइतित्वया॥९२॥सुमित्र्यानइ
त्येतन्मंत्रांतेमार्जनंततः॥दुर्मित्र्याऽइतिमंत्रेणप्रत्यक्कदक्षिणदेशके॥९३॥तंहन्मीत्येवमंत्रेणकुशाग्रैःप्रक्षिपे
दधः॥वामपार्श्वेनथासीनापत्नीप्रत्यग्घविर्भुजः॥९४॥आसिच्यपाणौतन्नोयंमाहंप्रज्ञामनेनतुतत्पाणिभ्यां
गृहीत्वापाथमा- त्मकृतंस्मरन्॥९५॥आत्मानंयजमानंचहोतात्रिःप्रोक्ष्यतज्जलैः॥अत्रोक्तविशेषः॥श्रौतस्या
विरोधत्वात्सर्वैरनुष्ठेयःअत्रान्यस्यहोतुरभावात्॥होतृशब्देनात्रब्रह्मैवोच्यतइति॥ ॥ओंचमइत्युपतिष्ठता
मेःप्रत्यगुदक्स्थितः॥श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं॥आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन॥९७
॥अग्निमेलेनमंत्रेणप्रार्थयेतद्विजोत्तमः॥ततःपर्युत्पपर्युक्ष्यद्यादिप्रायदक्षिणां॥९८॥स्विष्टेसेषुकृत्काले
षुयथोक्ताचैवदक्षिणा॥होमोपयोगियद्द्रव्यंहोत्रेदद्यात्सदक्षिणं॥९९॥यथोक्तदक्षिणालाभेहिरण्यंवास्वशा

क्तितः॥यद्यस्तिकृतशिष्टंचेद्देयंविप्रायतद्विदुः॥१००॥प्रक्षाल्ययज्ञपात्राणिगृह्णीयाद्द्रव्यःक्रमात्॥यज्ञतंतमि
दंप्रोक्तमेकाग्न्येर्यज्ञकर्मणि॥१०१॥प्रयोक्तृणांप्रयोगार्थंशौनकेनयथाक्रमं॥यत्रोपदिश्यतेकर्मकर्तुरंगनतूच्य
ते॥१०२॥दक्षिणस्तत्रविज्ञेयःकर्मणांपारगःकरः॥यत्रदिङ्नियमोनोक्तोन्नपहोमादिकर्मसु॥१०३॥तिस्रोत्रदिशः
प्रशस्ताऐंद्रीसौम्यापराजिताः॥रौद्रमंत्रंजपेचैवाआसुरोप्यभिचारके॥१०४॥राक्षंचैवजपेच्चैवकर्मकुर्वन्नपस्पृ
शेत्॥आसीनउर्ध्वःप्रह्वोवानियमोयत्रनोच्यते॥१०५॥नदासीनेनकर्तव्यंनप्रह्वानचतिष्ठता॥नित्यंनैमित्तिकंका
म्यंकर्मोदुम्बरिविधंबुधः॥१०६॥एतेषांकर्मणांहोतृतंत्रकल्प्यश्चवक्ष्यते॥अथपितृभ्योभ्युदयआद्धंकृत्वापुरा
हणि॥१०७॥हविष्यान्नंसकृद्भुक्त्वाब्रह्मचारीस्वलंकृतः॥प्रकोष्ठेतंतुभिर्मंत्रैसन्नद्धेदुग्नयेद्विजः॥१०८॥पुण्याह
वाचयेद्विप्रैरितरैर्वेदपारगैः॥ममप्रसादात्संयोक्तानपसास्नानकर्मणा॥१०९॥आचम्याचात्मनःशुद्धिंकृत्वाक
र्मसमारभेत्॥अनादेशस्वयंकर्तासभ्यक्कृतिकुरोहितः॥११०॥प्राकूलतासाधनानांप्राकूसंस्थंतच्चकर्मणा॥क
र्तुःप्राङ्मुखतानुक्तेक्रियायाप्राकूसमीहनं॥१११॥अंगदुष्टेचसत्येकेनांगेनैवचनोदिते॥दक्षिणेनैवकर्तव्यंतथा

नुक्तांगकर्मणि॥११२॥आसीनेनैवकर्त्तव्यंयत्रस्थानमचोदितं॥हविष्यंचोदितेतद्वदाज्यंतत्रहविर्भवेत्॥११३॥
कर्मोपवीतिनाकार्यंनिवीतेनापिचोदितं॥अविज्ञातस्वरामंत्राःप्रयोक्तव्याःप्रयोक्तृभिः॥११४॥एकश्रुत्यैवहो
मेषुविज्ञाताश्चविकल्पतः॥तस्मिन्मंत्रेणपठितःस्वाहाकारोभवेद्यदि॥११५॥स्वाहांतेनप्रयोक्तव्योहोमेषुप्र
णवादिकः॥तत्रस्यात्षड्वचंशब्दंतत्रैवहोमइष्यते॥११६॥ऋगंतेतत्रहोतव्यंस्वाहाकारंपठेत्ततः॥ज्ञानीयात्स
मृद्धंमंत्रंतस्यादुपवेशतः॥११७॥ओंभूर्भुवःसुवश्चेतितिस्रोव्याहृतिभिर्जपेत्।आभिश्चहोमेतिसृभिश्चतुर्थ
तत्समासतः॥११८॥अथप्रयोगमंत्राणांषट्त्रिधंलक्षणंस्मृतं॥जपानुमंत्रणाप्यायनाभिमंत्रास्तथैवच॥११९
॥उपस्थानंकर्मकरणंषडुपांशुप्रयोगतः॥जपमुच्चारणंविद्याक्रत्वर्थमपितद्भवेत्॥१२०॥अर्थतःकार्यलाभ
श्चेदर्थएवक्रतौभवेत्॥मंत्रमुच्चारयन्नेवमन्त्रार्थंतेनसंस्मरेत्॥१२१॥ऋषिंतंतन्मयंभूत्वास्यादेवदनुमंत्रणं॥
एतदेवानिमंत्रस्यलक्षणंचेक्षणाधिकं॥१२२॥अद्भिःसंस्पर्शनाधिक्यातदेवाप्यायनंस्मृतं॥उपस्थानंतु
देवस्यात्रणामस्थानसंयुतं॥१२३॥बाह्यंकर्मयदेतेषुमंत्रकालेक्रियेततत्॥कर्मणःकरणंतस्यविहितार्थे



प्रकाशनं॥१२४॥मंत्रेणकृत्वामंत्रोनेक्रियतेकर्मयेतुषु॥इदंकार्यमनेनेतिनक्वचिद्दृश्यतेविधिः॥१२५॥लिंगोदेवेदम
र्थत्वंयेषांतेमंत्रसंज्ञकाः॥प्रजापत्यमुपांशुस्यान्मंत्रसावित्रएवच॥१२६॥कृताकृतंब्रह्मवरब्रह्माचाज्यस्यसंस्कृतिः।
व्रीहीणामवघातश्चतंडुलेषुकृताकृतः॥१२७॥द्रवीभूतंघृतस्यापिविलापनविधिस्तथा॥इतिशौनकीयेस्थालीपा
कः॥अथग्रहशांतिः॥ग्रहशांतिंप्रवक्ष्यामिशौनकोहंद्विजन्मनापुण्येहनिशुभेवारेकुर्यादाचत्रिजन्मसु॥१॥येभेनवि
षुवेचैवसोमसूर्यपरागयोः॥ग्रहानुग्रहचेष्टानांनित्यंशांतिंसमाचरेत्॥२॥रवेरग्न्यधिदेवस्यात्सोमस्यापोधिदेव
ता॥भूमिरंगारकोवस्याद्बुधोविष्ण्वधिदेवता॥३॥गुरोरिंद्रस्तथेन्द्राणीशुक्रस्याचाधिदेवता॥प्रजापतिश्चनैराद्यु
तोसर्पश्चतुर्मुखो॥४॥भास्करस्यैश्वरोदेवागौरीसोमस्यदेवता॥स्कंदस्तंगारकस्यास्याद्विष्णुर्देवोबुधस्यतु॥५॥ब्र
ह्मदेवाःसुरगुरोःशक्रःशुक्रस्यदेवता॥केतोश्चित्रगुप्तस्यास्याद्वाहोरुद्रःशनैश्चरः॥६॥अत्रस्यापनक्रमनुक्रउ
त्पन्नःपरिमलेः॥ग्रहस्यदक्षिणेपार्श्वेस्यापयेदधिदेवता॥७॥ग्रहस्योत्तरपार्श्वेतुन्यसेत्प्रत्यधिदेवता॥शानीश्वरा
द्वायुदेशेस्थापयेद्विघ्ननायकं॥८॥आतृनश्इंद्रसुमंतमित्यृचाविधिनार्चयेत्॥तस्ययाम्येचयेदुर्गांज्ञातवेदसमंत

तः॥९॥तस्यादक्षिणतोवायुःकाणाशिग्रुर्ऋचार्चयेत्॥आदित्यस्येत्यनयाचाकाशपूजयेदथ॥१०॥एषोउषा
इत्यनयातस्यायाम्येश्विनौपूजयेत्॥पद्मप्रागुदलमारभ्यदलाग्रेषुक्रमान्यसेत्॥११॥इंद्रादिलोकपालाश्चतन्नमैं
त्रैःप्रपूजयेत्॥सर्वेषांलोकपालानांचंदनंचविलेपनं॥१२॥ज्ञातपत्राणियुष्याणिदद्याद्गुग्गुलधूपकं॥दीपं
गोघृतसंयुक्तंनैवेद्यंसघृतोदनं॥१३॥तत्तन्मंत्रैर्जपंकुर्यात्ततोहोमंसमाचरेत्॥ग्रहाणांशंभुकोणेवासौम्येवा
पद्ममालिखेत्॥१४॥तन्मध्येवारुणंकुंभंपुण्यतोयप्रपूरितं॥अव्रणंसुदृढंरम्यंधान्यस्योपरिविन्यसेत्॥१५
॥मानवसंहितायां॥ ॥गोमयालेपितेदेशेध्यात्वाद्यौपरिशोभितेपंकजंकारयेत्तत्रचतुर्विंशदलान्वितं॥१६॥
तंदुलैर्लिखेद्यद्वारक्तपीतसितासितैः॥कर्णिकायान्यसेद्वीह्रीन्स्थापयेत्तेषुकुंभकं॥१७॥आकलशेधिस्यनया
कलशस्थापनंशुभं॥इममेगंगेमंत्रेणपूरयेन्नीरेवारिणा॥१८॥कुंभंचगंधवस्त्राद्यैस्तत्तन्मंत्रैःप्रपूजयेत्॥अ
श्वत्थानाद्गजस्नानावल्मीकाद्गोकुलात्॥१९॥मृदमानीययत्नेनराजद्वाराच्चतुष्पथात्॥उद्धतासीतिमंत्रेण
तस्मिन्कुंभेविनिक्षिपेत्॥२०॥न्यग्रोधपिप्पलप्लक्षजंबूचूततरुद्भवाः॥रुवतिभीमदत्यूचात्वचस्तस्मिन्विनि

क्षिपेत्॥२१॥प्रवोयद्गेधित्यनयाचैषांशाखाविनिक्षिपेत्॥निधायपंचगव्यानितत्तन्मंत्रैर्विनिक्षिपेत्॥२२॥या
ओषधीरित्यनयाओषधानिशतानिच॥अभावेदशमूलानिसुवर्णंवाविनिक्षिपेत्॥२३॥गंधद्वारामित्यनयागं
धंचैवविनिक्षिपेत्॥सर्वेसमुद्रागंगेमेचेमंमेगंगइत्यपि॥२४॥आपोहिष्ठादिभिर्मंत्रैरभिमंत्र्यचवारुणैः॥नहि
नेक्षत्रमित्यादयोवारुणाः॥यत्तत्रमाज्यमागंतमुक्तमुलेखनादिकं॥२५॥अविस्मरेणयत्कृत्वासर्वेषांहोममा
चरेत्॥हविष्यंपयसान्नंचसगुडंक्षीरमोदनं॥२६॥दध्योदनंघृतान्नंचकृसरंमाषचित्रकं॥इत्येतानिहविष्य
म्युःसमित्संस्थासमाद्भुतिः॥२७॥भर्कःपलाशःखदिरअपामार्गोथपिप्पलः॥औदुंबरश्चमीदूर्वाकुशाश्च
समिधास्मृताः॥२८॥एतामभावेसुद्वान्नंपालाशीवासमिद्भवेत्॥जुहुयात्समिधंनाज्यैरभिघृग्भिर्यथाक्र
मं॥२९॥आहरुमेनरजसाअग्निंदूतंवृणीमहे॥येषामीशइत्येताभिःसूर्यंवह्नीश्वरान्यथक्॥३०॥अग्निर्मूर्धा
दिवःककुत्पतीनाएथिवीतथा॥क्षेत्रस्यपतइत्येताभौमभूमिगुहाक्रमात्॥३१॥बृहस्पतेअतियदर्यइंद्रमरू
त्वइहेतिच॥ब्रह्मजज्ञानमित्यग्निःगुरुशुक्रश्चतुर्मुखात्॥३२॥शुक्रंतेअन्यद्यजतमिंद्राणीमासुनारिषु॥इंद्रं

वोविष्वतस्परिशुक्रेंद्राणीशतक्रतून्॥३३॥शमग्निरग्निभिरितिप्रजापतेनत्वदिति॥यमायसोममितिचशनिंप्र
जापतिर्यमं॥३४॥कयानश्चित्रआभुवदायंगौःएश्निरक्रमीत्॥परंमृत्योअनुपरागाद्रुसूर्ययमाःक्रमात्॥३५
॥केतुंकृण्वन्नकेतवेब्रह्मजज्ञानमित्यृचा॥सचित्रचित्रमित्याभिःकेतुंब्रह्माणमेवच॥३६॥चित्रगुप्तंचतिसृ
भिरेषांहोमोविधीयते॥अथस्रुवेणजुहुयात्सूर्यैकैःपावकरुद्रकान्॥३७॥सूर्योनःपंचकंसूक्तमुद्वयंजात
वेदसं॥नमोमित्रस्यवरुणचित्रंदेवानामित्यपि॥३८॥उद्वेतिसुभगःपंचआमित्रैरग्निर्घृताहुतीः॥त्वमग्ने
प्रथमंसूक्तमित्यष्टादशकर्चकं॥३९॥त्वमग्नेद्युभिःषोडशमिर्घृतेनजुहुयात्ततः॥अथरुद्रायजुहुयात्रु
द्रायषडाहुतीः॥४०॥इमारुद्रायतवसेयास्रैकन--चततः॥आतेपितर्मरुतामितिसूक्तेनचघृताहु
तीः॥४१॥मनोरमेषुचोदेशेहोमशालामलंकृतं॥कृत्वातुसंस्तरंप्राज्ञोग्रहस्थानंप्रकल्पयेत्॥४२॥तन्मध्ये
भास्करस्थानेभवेत्पूर्वोत्तरंबुधः॥पूर्वस्मिन्भागवस्थानेसोमंदक्षिणपूर्वके॥४३॥दक्षिणस्यांकुजस्थानंराहु
र्दक्षिणपश्चिमे॥पश्चिमेतुशनिस्थानेकेतुरुत्तरपश्चिमे॥४४॥उत्तरेस्मिन्गुरोस्थानंपूर्वस्यांभार्गवंभवेत्॥भार्ग १२

वम्यतुरश्रंस्याच्चंद्रस्यचतुरस्रकं॥४५॥कुजस्यतुत्रिकोणंस्याद्बाणाकारंबुधस्यतु॥गुरोर्दीर्घंचतुरस्रंस्यात्सौ
कोणस्यभार्गवः॥४६॥चापाकारंशनेरहोर्भूपकेतोश्चाहुती॥वेद्यामपिपूजामंडलान्येवयथास्थानंकर्तव्या
नीति॥तत्पुरस्तानुवेदिस्यात्सुरणांस्यापनायच॥४७॥चतुर्दिक्षुतुप्रादेशंपंचांगुलसमुन्नतां॥तस्यांचाबाह्य
येदेवानाम्याव्याहृतिभिःक्रमात्॥४८॥नवध्वाविभजेदग्निंश्रौतस्मार्तविधानतः॥ऋत्विजश्चयथायोगंकुंडे
षुब्राह्मणाःपृथक्॥४९॥अथस्रुवेणजुहुयासूर्यैपावकरुद्रकान्॥ऋत्विजोजुहुयुःसर्वेस्रुवेणैवपृथकृपृथ
क्॥५०॥अष्टौतुकलशान्स्थंडिलसमीपेषणमग्निषु॥प्रधानाग्नौविधायैनांनित्यहोमंसमाचरेत्॥५१॥गर्भेलं
भःपुंसवनंगर्भास्थानादेलोभनं॥इतिकर्मत्रयमिदंयज्ञोपनिषदीरितं॥५२॥नामधातवतःकर्मत्रयंतत्रैवसंग्र
हं॥अनधीतवतस्त्वेषांप्रयोगोत्रनविद्यते॥५३॥नियुक्तोयत्प्रयोगेणगर्भःसंधार्यतेस्त्रिया॥तद्गर्भलंभनंना
मकर्मप्रोक्तंमनीषिभिः॥५४॥पुमान्प्रसूतयेयेनतत्पुंसवनमीरितं॥ननुम्र्यंनस्रवेद्येनतत्कर्मानवलोभनं॥५५
॥अन्येद्येकर्मणिप्राहुस्तयोःकल्पोवकथ्यते॥ ॥इतिशौनकीयेगृह्यशांतिः॥ ॥अथरुद्रस्नानशांतिः॥ ॥आ

र्तेवानांतुनारीणांशांतिवक्ष्यामिशौनकः॥तिथिवारर्क्षयोगेभ्योलग्नसग्रहसनमात्॥१॥गृहेभ्योदुस्थितेभ्य
श्चतत्रदोषक्षयायच॥अत्रपुत्रादिलाभायदंपत्योरभिवृद्धये॥२॥पंचमेह्निचतुर्थेवाग्रहातिथ्यपुरःसरं॥तस्मि
न्नहनिकर्तव्यमृतुदोषविधानतः॥३॥आचार्यंवरयेत्प्राज्ञंभुवनेश्वर्यनुष्ठितं॥होमार्थंचजपार्थंचवरयेदृत्वि
जोबहून्॥४॥यजमानोदिजैःसार्द्धंशांतिंहोमंसमाचरेत्॥ऐशानदिग्भागेदेवतापूजनायच॥५॥द्रोण
प्रमाणधान्येनस्त्रीहिराशित्रयंभवेत्॥कुंभत्रयन्यसेद्राशौतंतुवस्त्रादिवेष्टितं॥६॥पूरयेन्नीर्यसलिलैःप्रतिकुं
भंपृथक्पृथक्॥सूक्तेनाथनवचैनप्रसुवआपइत्यथ॥७॥ऋचायाःप्रवतस्तद्वात्गायत्र्याचततःक्रमात्॥
मध्यकुंभेस्थितेधान्यमौषधानिचहेमच॥८॥ततश्चपंचरत्नानिगंधपुष्पाक्षतादिकान्॥औषधानिचव
क्ष्यंतेमुनिभिःशांतिकारणात्॥९॥औदुंबरंकुशादूर्वाराजीवंचंपबिल्वकाः॥विष्णुक्रांतायतुलसीबर्हिमंजि
ष्ठंपुष्पिकां॥१०॥शतावर्यश्चगंधाचनिर्गुंडीसर्षपद्वयं॥अपामार्गपलाशश्चपनसोज्जीरकस्तथा॥११॥प्रियं
गवश्चगोधूमाव्रीहयोश्वत्थएवच॥क्षीरंचदधिसर्पिश्चब्रह्मपत्रंतथोत्पलं॥१२॥कुरंटकत्रयंगुंजाश्चकंभद्र १३

मुस्तका॥हात्रिंशदौषधानीहयथामंभवमाहरेत्॥१३॥गत्वाश्वत्थ्यावल्मीकमंगमाद्गोकुलात्॥राजद्वारप्रदे
शाच्चमृदमानीयनिक्षिपेत्॥१४॥कुंभंस्थापनमित्याघासप्तभिर्मंत्रेणकारयेत्॥मृत्तिकौषधादीनिमंत्रेणप्रक्षि
पेत्क्रमात्॥१५॥कुंभोपरिन्यसेत्पात्रंकांस्यंवाताम्रमेववा॥मृन्मयेवेणुपात्रंवास्वस्यविद्यानुसारतः॥१६॥पात्रो
परिन्यसेद्वस्त्रंप्रतिमांभुवनेश्वरीं॥तन्मूल्यंचान्यमेतत्रइंद्राणीचपुरंदरं॥१७॥आचार्यःपूजयेद्देवीमंगलाघावरणा
नि च॥अन्योवापूजनंकुर्याद्वाय्यामंत्रसारया॥१८॥इंद्राणीपूजयेद्देवीमिंद्राणीमासुनारिषु॥क्रमेणपूजयेद्रि
द्रमिंद्रत्वावृषभंवयं॥१९॥अनेनविधिनाचार्यःपूजयेद्देवतात्रयं॥आवाहनादिसकलैरुपचारैःपृथक्पृथक्
॥२०॥तन्मध्येसंस्पृशेत्कुंभंमंत्रेणभुवनेश्वरीं॥ततोदाचार्यआहोमाच्छीसूक्तंचजपेन्ततः॥२१॥स्पृशन्वेदक्षिणंकुं
भमृत्विगेकोजपेनतथा॥चत्वारिरुद्रसूक्तानिचतुर्मंत्रोनराणिच॥२२॥संस्पृशन्नुत्तरंकुंभंधीरुद्रेरुद्रमंत्रयया
॥शंनइंद्राग्नीसूक्तंचततश्चैवस्पृशन्जपेत्॥२३॥कुंभस्यपश्चिमेदेशेशांतिहोमंसमाचरेत्॥अन्वाधानंततःकु
र्याद्धोममंत्रंसमाचरेत्॥२४॥पूर्णपात्रनिधानांतंकृत्वाचार्योद्विजैःसह॥दूर्वोमिस्त्रिलगोधूमैःपायसेनघृतेनच

॥२५॥पायसंश्रपयेत्तत्रसावित्रंचहविश्चतत्॥कृत्वाज्यभागपर्यंतंहविरुद्वासनादिकं॥२६॥तिसृभिश्चैवदूर्वाभि
रेकैकाचाकृतिर्भवेत्॥कृतिमंत्रप्रयुक्ताभिर्गोयज्याज्जुहुयाक्रमात्॥२७॥अष्टोत्तरसहस्रंतुशतमष्टोत्तरं
तुवा॥तिलमिश्रैश्चगोधूमैर्द्रव्येणाज्याहुतीर्हुनेत्॥२८॥जुहुयात्पायसेनैवआज्येनैवहुनेत्क्रमात्॥हविश्च
तुष्टयेनैवप्रत्येकंसमसंख्यया॥२९॥गायत्र्यैवतुहोतव्यंहविरत्रचतुष्टयं॥ततःस्विष्टकृतंहुत्वारज्जुप्रहरणं
तथा॥३०॥अथाश्चेत्यादिभिर्हुत्वासमुद्रादूर्मिसूक्तनः॥संतन्तामाज्यधारांतंपूर्णाहुतियथाचरेत्॥३१॥परि
षेचनपर्यंतंहोमशेषंसमापयेत्॥सहौषधिस्थितैस्तत्रप्रतिकुंभस्थितोदकैः॥३२॥ऋतुमत्याःस्त्रियाःशांत्यै
दपतीभ्यांसुखायच॥अथाभिषेकमंत्राश्चप्रोच्यंतेशौनकादिभिः॥३३॥आपोहिष्ठेतिनवभिःश्रीसूक्तेनततः
परं॥इंद्रोअंगतृचेनैवपावमान्यैकमेणतु॥३४॥उभयंशृण्वच्चनःस्वस्तिदादित्रएकया॥त्र्यंबकेनचमंत्रेण
ज्ञातवेदसएकया॥३५॥समुद्रज्येष्ठाइत्यादिचतुर्भिश्चप्रसिद्धकैः॥त्रायंतामितिमंत्रैश्चत्रिभिरृग्भिर्यथाक्र
मं॥३६॥इदमापःप्रवहेनैवदेवस्यत्वेतिमंत्रतः॥मंत्रेणाथतमीशानंतमग्नेरुद्रइत्यथ॥३७॥तमुष्टुहीतिमंत्रे १५

णभुवनस्यपितरंतथा॥यातेरुद्रेतिमंत्रेणशिवसंकल्पमंत्रतः॥३८॥इद्वत्सरुषभंपंचमंत्रैश्चाभिषेचयेत्॥
३९॥माचवस्त्रांतरंधृत्वापुनश्चोपवसेत्सती॥३९॥विप्रानभ्यर्चविधिवद्गंधपुष्पाक्षतादिभिः॥धेनुंपयस्विनी
दद्यादाचार्यायचभूषणैः॥४०॥सदक्षिणामनड्वाहंप्रदद्याद्दैवज्ञायिने॥ऋत्विग्भ्यश्चाप्यसर्वेभ्योदद्याद्दक्षि
णांततः॥४१॥ब्राह्मणाञ्छोभनेयत्यश्चाशुंजीयात्स्वजनैःसह॥स्मृतौतु॥ब्राह्मणाञ्छोभयित्वातुदैवज्ञन्भोजयेन्ततः
॥४२॥एवंयःकुरुतेशांतिंशौनकोक्तप्रकारतः॥तदारिष्टंतुसकलंसद्यएवविनश्यति॥४३॥ ॥इतिशौनकी
येरत्नस्वल्पशांतिः॥ ॥अथसमागमविधिःस्नातायाःसुस्नायाश्चऋतुमत्याःसमेहनि॥प्रातरभ्युदयंश्राद्धं
त्वापुण्याहमीरयेत्॥१॥ततस्तदीरितंपुण्यंस्वयमन्यैरपिद्विजैः॥अधीतोपनिषद्येषुअपराह्णेसमापयेत्॥
२॥विप्रैःसहैवभुक्त्वानुस्वस्तिवाचनमेवच॥ततोस्तमयवेलायांकृतकृत्योभवेन्नरः॥३॥मुद्वर्तंसंततंगंधपुष्पा
क्षतसमन्वितं॥धूपितंज्वलितंदीपैर्गृहंपत्न्यासमाविशेत्॥४॥अलंकृतेगृहेतस्मिन्वितानोपरिमंडितं॥शयनं
मुमुखस्यशंसवोपकरणान्वितं॥५॥आचम्यारोपयित्वातांपत्नीसम्यगलंकृतां॥स्वयंचालंकृतस्तद्वच्छ

यनंसमुपविशेत्॥६॥कपिलापयसामिश्रंकांस्यपात्रेगतंशुभं॥अश्वगंधारसंशुभ्रवस्त्राग्रेणविगुंठितं॥७॥
दक्षिणायांनासिकायांसिंचेन्मंत्रेणतत्पतिः॥विद्यामंत्रमुदीर्घेतिरसेस्मिन्नुदरंगते॥८॥तांपूषन्निति मंत्रेण
तामुपेयाद्यथाविधि॥एवंकृत्वासकृद्वर्तीसमेनित्यंसदाव्रजेत्॥९॥असकृच्चेद्व्रजेन्नस्याद्गर्भोनभवतिस्त्रि
यः॥गर्भाधानस्याकरणात्तस्यांज्ञानंतुदुष्यति॥१०॥अकृत्वागांद्विजेदद्यात्कुर्यात्पुंसवनंपतिः॥ऋग्विधा
नेविशेषः॥विष्णुर्नेजनयेत्पूर्वेयोनिंस्रष्ट्रात्रिभिर्व्रती॥११॥गर्भाधानंततःकुर्यात्सुपुत्रोवैप्रजायते॥अनृतु
मत्यांभार्यायांनकार्यंगर्भलंभनं॥१२॥ऋतुमत्यास्तुतस्यांवैतत्कार्यंब्रह्मचारिणी॥इतिसमागमविधिः॥
॥षोडशरात्रृतुसंज्ञेषुदिनेष्वाद्येचतुर्दिनं॥आर्तवाशौचसंयुक्तंवर्जयित्वापरेषुतु॥१॥दिनेषुद्वादशास्व
न्यतरस्मिन्पतिभार्ययोः॥उभयोरपिजन्मर्क्षेनुगुणेतारकेध्रुवं॥२॥स्नापयित्वाथगंधाद्यैर्भूषयित्वाचशो
भने॥मुदूर्तेत्वश्वगंधायामूलंसंपीड्यतत्पुनः॥३॥कृत्वानवंवराच्छिन्नंपरिगृह्यतुपाणिना॥उदीर्घो
तःपतिवतीन्याद्यामृचमुदीर्यतु॥४॥उपगच्छेद्धूमवंविधानोपगमेकृते॥गर्भःस्थिरःस्यादित्येवंगर्भलं

MEMORIAL

भनमूचिरे॥५॥इतिशौनकीयेगर्भाधानं॥अथपुंसवनं॥व्यक्तेगर्भेतृतीयेतुमासेपुंसवनंभवेत्॥गर्भोव्यक्तस्तृ
तीयेचेच्चतुर्थेमासिवाभवेत्॥१॥तत्कुर्योत्तिष्यनक्षत्रेश्रवणेवाथवास्त्रियः॥नन्मर्क्षानुगुणेज्योतिःशास्त्रज्ञैर्वि
हितेशुभे॥२॥नक्षत्रेविद्धतिदंतिथिवारगुणान्विते॥गर्भस्यवैद्यशास्त्रोक्तपोषणानुपरोधतः॥३॥पूर्वस्मिं
दिवसेपत्नीहविष्यैकाशनाभवेत्॥वृद्धिःश्राद्धंपतिःकुर्याद्ब्रह्मचारीभवेत्तदा॥४॥समानवर्णवत्सायागोक्षी
रात्मवैभेदधि॥त्रीन्यवान्माषषट्कांश्चसंपाद्यैतानिनिक्षिपेत्॥५॥किंचिद्दूर्वैकदेशंतुरमणीयावशोकं॥
वृनाकारंतुतच्छायासंपन्नंपरिकल्पयेत्॥६॥वधूमपिकृतस्नातांधृतधौतांवरद्वयां॥भूषितांगंधमाल्याद्यैः
कृतपुण्याहवाचनं॥७॥कृतकौतुकबंधांतांकारयित्वातुशोभने॥मुदूर्तेज्वलितंकृत्वावह्निमोयासनंततः
॥८॥तत्रान्वाधानमारभ्यप्रणीतासादनावधि॥पुरस्तात्तंत्रमाचार्यःप्राजापत्यंचरुंततः॥९॥निरूप्यश्रपयि
त्वाज्यसंस्कारविधिपूर्वकं॥अनुयाजनिधानांतंतंत्रंकृत्वाततोवधुं॥१०॥आचांततोयान्नीत्वाग्निमात्मानंचाज्य
मंतरा॥आत्मनोदक्षिणेपार्श्वेप्राङ्मुखीमुपवेशयेत्॥११॥ततःकरणंस्मरंश्चब्रध्नेध्याधानपूर्वकं॥पुरस्तात्तंत्र

शेषंतुसमाप्यचयथाविधिः॥१२॥ततःप्रक्षालितंपाणिंभार्यायाःप्रसृतीकृतं॥दध्नाप्रसृतिमात्रेणपूरयित्वाथत
स्यतु॥१३॥दध्नोयोपरिनिष्क्षिप्यपुंलिंगानुकृतेयवं॥अंडानुकारिणोमाषौक्षित्वातुयवपार्श्वयोः॥१४॥ततःकिं
पिंबसीतित्रिवधन्यच्छेदंधूंततः॥त्रिपुंसवनमित्युक्त्वाधूःसयवमाषकं॥१५॥पीत्वातद्दधिनिःशेषमाचमेदु
दकंततः॥अनेनैवप्रकारेणपुनर्दद्यादधिपाययेत्॥१६॥ततःप्राश्ननस्तोयमाचामेदवधानतः॥एवंपुंसव
नंप्रोक्तमथचानवलोभनं॥१७॥तत्कुर्यान्मंडलागारच्छायेपूर्वेकृतेनया॥दूर्वायुजंदृढपुत्रोदृढत्रेणकन्य
या॥१८॥पेषयित्वातुनत्रनिष्पिंडीकृत्यपाणिना॥आदायतत्पुनःसुद्धंवस्त्राच्छन्नंप्रगृह्यच॥१९॥आतेगर्भो
योनिमैत्यित्यादंसूक्तंलिखोद्भवं॥अथाग्नेरेतुप्रथमइत्यादंचयथाक्रमं॥२०॥खिलंसूक्तद्वयमिदंजपित्वाख
वधानतः॥प्रत्यङ्मुखेस्त्रियास्तिष्ठन्दक्षिणेनासिकाबिले॥२१॥तयादूर्वारसंसिंचेद्यथोदरगतोभवेत्॥उदरस्थे
रसेतस्मिन्नाचांतोदकयातथा॥२२॥स्रुशेवदायजुहुयात्प्राजापत्यंचकृतंततः॥प्रजापतयइत्येतत्स्वाहांतंसमुदी
रयन्॥२३॥ततःपाणितलेनास्याहृदयंसंस्पृशेत्पति॥यतेसुशीमेहृदयेहितमित्यादिमंत्रतः॥२४॥ततःस्वि

ष्टकृताद्यैतंत्रेपरिसमापयेत्॥प्रतिगर्भमिदंकर्मकार्यंपुत्रीयथाखिलं॥२५॥ ॥इतिशौनकीयेपुंसवनं॥ ॥अथसी
मंतोन्नयनं॥ ॥चतुर्थेगर्भमासिस्यात्सीमंतोन्नयनक्रिया॥षष्ठाष्टमेवाकुर्वीतसूत्रोक्तविधानतः॥१॥अभावेपूर्व
पूर्वस्यविदधीतोत्तरोत्तरे॥शुक्लपक्षेतुपुंलिंगनक्षत्रस्थेनिशाकरे॥२॥मृगशिष्यपुनर्वस्वनूराधाश्रवणाश्वयुक्
॥एवमादिषुदंपत्योर्जन्मर्क्षानुगुणेशुभे॥३॥नक्षत्रेविदधीतैतन्मुहूर्तेचसुशोभने॥पतिःपूर्वदिनेदृद्धिश्राद्धं
कृत्वापरेहनि॥४॥वधूमलंकृतांविप्रैःकृतपुण्याहवाचनं॥कृतकौतुकबंधांचवंदितांभीष्टदेवतां॥५॥वृद्धनारीस
मुद्दिष्टमंगलाचारसंयुतां॥कारयित्वास्त्रियंपश्चान्मुहूर्तेशोभनेनलं॥६॥औपासनंसमिध्यास्मिन्नाधान
पुरःसरं॥आज्यसंस्कारपर्यंतंतंत्रंकृत्वापुरस्तनं॥७॥ततोग्नेःपश्चिमदेशेस्वस्यदक्षिणपार्श्वतः॥ग्रहप्रवेशहोमो
क्तमार्गेणानड्वाजिनं॥८॥प्राचीगतगलोदेशेमुपरिस्थितरोमकं॥आसीर्यतस्मिन्नासीनांधौतवासोयुगान्वि
तं॥९॥प्राचींतस्यलिलांनारीमुपवेश्यततस्तया॥स्पृष्टःकरेनपरिधीनिधानांतंपुरस्तनं॥१०॥तत्रशेषंविधाया
ज्यभागहोमावसानकं॥कुर्याद्यस्रुवेणाज्यहोमानशेक्रमादिमान्॥११॥धातादद्यात्तयेताभ्यामृग्भ्यांप्रागा

कुतिदयौ॥कुत्वाराकामहमितिद्वाभ्यांचजुहुयात्क्रमात्॥१२॥राकाद्यृचातमुत्कीर्थयदमुक्यामितिस्मृतं॥तदंतकं
चयदोमंकुर्यादृदोपदेशतः॥१३॥नेत्रमेषपरेत्यादिरेवलिकेनतृचेनतु॥तथाप्रजापतेनत्वदेतान्यित्याद्ययातृचा
॥१४॥कुत्वोत्थायस्त्रियाःप्रत्यक्प्रदेशेप्राङ्मुखस्थितः॥औदुंबरंचस्तबकंयुग्मपक्वफलान्वितं॥१५॥भिन्नैः
शुक्लैःस्त्रिभिर्युक्तशलली त्रिकुशैःकुशान्॥एकीकृत्यगृहीत्वातुसमस्तानिवपाणिना॥१६॥तस्यपुंजस्यमूलेन
नार्याःकेशललाटयोः॥संधिप्रदेशमारभ्यभ्रूमध्योर्ध्वप्रदेशकं॥१७॥केशाङ्कूर्ध्वंप्रथक्कुर्यादामूलंपरभागतः॥
त्रिःस्पृशतुर्वीभूर्भुवःस्वरोमित्येतमुदीरयन्॥१८॥प्रतिप्रयोगंमंत्रंचसावधानमुदीरयेत्॥ग्रंथांतरेत्रैण्याज्यलव्या
दर्भेणउदुंबरयवांकुरैः॥विभज्यतस्माःकेशेषुमध्येसीमंतमुन्नयेत्॥सोमंराजानमित्यादिप्रैषेणप्रेषितोद्विजो
॥२०॥ऋचंसोमोनइत्याद्यांगायेतांसहचीणया॥ततःसोमोनइत्यादेऋचोधीत्यंतसंयुतान्॥२१॥निविष्टचक्रा
इत्यास्मापदानुसमनंतरं॥नोदंपतीमहानद्यास्तीरनिवासिनौ॥२२॥तंनामसंबुध्यंतंतौवदेतांगायकोद्विजौ॥
निविष्टचक्राकावेरीत्येवमादिनिदर्शनं॥२३॥यदिचेत्सामनाधीतंत्रिर्जपेनामृचंतदाप्रैषस्यानंतरंकुर्यादुपरिष्टा १७

त्तनंविधिं॥२४॥ब्राह्मण्योजीवपत्यश्चजीवपुत्राचपोधिकाः॥यद्यद्ददेयुस्तत्तत्तुकुर्यादद्यात्तथादृषं॥२५॥विदुषेद्वि
जमुख्यायब्राह्मणान्भोजयेत्ततः॥ ॥इतिशौनकीयेसीमंतोन्नयनं॥ ॥अथजातकर्म॥जातंकुमारंजननादन्य
संस्पर्शनात्पुरा॥स्नापयित्वाकुमारोप्यप्राङ्मुखंचोपवेश्यतं॥१॥मानतोविषमेहृत्वासंमृज्यंमधुसर्पिषा॥सिक्ता
सिलायांतंत्रैवसुवर्णबद्धशःकषान्॥२॥मधुसर्पिःसुवर्णानिमिश्रीकृत्यांथरैवलिकी॥प्रतेददामिमधुनोघृतस्ये
त्यादिकादिकामृचं॥३॥उल्कातानिसुवर्णेननेनैवप्राशयेच्छिशुं॥मंत्रमस्माभवेत्याद्यमुल्कामोयुगपच्छिशोः
॥४॥स्पृष्ट्वातथेन्द्रश्रेष्ठानिद्रविणान्यादिकंमृचं॥अस्मेप्रयंधीत्यादिंचजपित्वासोपुनस्पृशेत्॥५॥इदंकर्मेकु
मार्याश्चसर्वकार्यममंत्रकं॥केचित्तुहोमकर्मेदंकर्मेदंकर्मेच्छेदिमनीषिणः॥६॥तिप्राकृत्वापुनस्तत्रमनादेशा
द्धृतीस्वतः॥कृत्वाग्निरिंद्रत्यादेशेदेवतापंचकस्यच॥७॥पश्चात्कर्मेदमाचार्यैतत्सिष्टकृतादिकं॥उपरिष्टान्नो
तंनत्रकुर्वीरश्वयायाक्रमं॥८॥ ॥इतिशौनकीयेजातकर्मः॥ ॥यस्यजाताप्रमीयेरन्पुत्रानेवभवंतिवा॥ऋतुका
लेदिनेशुवदंपतीसमलंकृतौ॥१॥कृत्वाभ्युदयिकंश्राद्धंस्वस्तिवाचनपूर्वकं॥पूर्णपात्रनिधानांतमुपलेपादि

पूर्ववत्॥२॥श्वेतायाश्वेतवत्साया गोः क्षीरेण चरुं पचेत्॥हुत्वाज्यभागपर्यंतमाज्यस्योत्पवनादिकं॥३॥जुहुयात्पा
यसंतत्रऋग्भिः पंचदशाहुतीः॥प्रजावत्सूक्तपंचभिर्जपेत्पुत्रस्य पंचभिः॥नेजमेषेतिनिसृभिः सोमो धेनुमृचैक
या॥इहैवस्तमृचावैवतत्सिष्टकृदादिकं॥५॥अपश्यंत्वेतिमंत्राभ्यांहोमशेषंचदंपती॥प्राश्नीयेतत्रआचम्यदंप
तीनाभिमालभेत्॥६॥पिशंगभृष्टिमित्यृचानावुभायेतिमंत्र्यच॥प्रायश्चित्तादिकंसर्वंहोमशेषंसमापयेत्॥७॥सव
त्सांदक्षिणार्थंचगांदद्यात्सुपयस्विनीं॥पुत्रार्थमाचरेदानंविप्रेभ्योहेमवस्त्रयं॥८॥रात्र्यास्तुपश्चिमेयामेशयीना
दर्भसंस्तरे॥मनसाचतुहोतारंमनुद्रुत्यामितिब्रुवत्॥९॥उपगम्यततःपत्नींव्यजेयाच्चयथाविधिः॥एवमुत्पादि
तःपुत्रानलभ्यंतेकदाचन॥१०॥ ॥इतिशौनकीयेमृतप्रजाजीवपुत्रोत्पादनविधिः॥ ॥अजातपुत्रायांसुपुत्रोत्पा
दनविधिः॥ ॥शौनकोहंप्रवक्ष्यामिपुत्रसंग्रहमुत्तमं॥अपुत्रोमृतपुत्रोवापुत्रार्थंसमुपोषवं॥१॥वाससीकुंडलेद
त्वाउष्णीषंचांगुलीयकं॥आदायधर्मसंयुक्तंवेश्मवंवेदपारगं॥२॥बर्हिःकुशमयंचैवपालाशंचेध्मंचेध्ममेव
च॥एतानादृत्यवधूश्चज्ञानाद्भ्रुतम॥३॥वधूनांतेसंभोज्यब्राह्मणानांविशेषतः॥अग्न्याधानादियत्तत्रकृ १८

त्वाज्योत्पवनात्मकं॥४॥दातुंसमक्षंगत्वानुपुत्रदेहीतियाचयेत्॥दानैःसमर्थोदातास्मेयेयज्ञेतेनपंचभिः॥५॥देवस्य
त्वेतिमंत्रेणहस्ताभ्यांपरिगृह्यच॥अंगादंगेत्यृचंजप्त्वाआघ्रायशिरसिमूर्धनि॥६॥वस्त्रादिभिरलंकृत्यपुत्रंच्छायाव
दंसुतं॥नृत्यगीतश्चवाद्यैश्चस्वस्तिराद्यैश्चसंयुतं॥७॥गृहमध्येध्ममाद्दायचरुंकृत्वाविधानतः॥यस्त्वाहृदेत्यृ
चाचैवतुभ्यमग्नऽऋचैकया॥८॥सोमोददादित्येताभिःप्रत्यृचंपंचभिःस्तया॥सिष्टकृदादिहोमंचकृत्वाशेषं
समापयेत्॥९॥ब्राह्मणानांसपिंडेषुकर्तव्यःपुत्रसंग्रहः॥तदभावेसपिंडेवाअन्यत्रंनतुकारयेत्॥१०॥क्षत्रिया
णांस्वजातौवागुरुगोत्रसमेपिवा॥वैश्यानांवैश्यजातेषुशूद्राणांशूद्रजातिषु॥११॥सर्वेषांचैववर्णानांज्ञातिष्वेव
चनान्यतः॥दौहित्रंभागिनेयंवाशूद्राणांचपतिर्यदि॥१२॥नैकपुत्रेणकर्तव्यपुत्रदानंकदाचन॥बहुपुत्रेण
कर्तव्यंपुत्रदानंप्रयत्नतः॥१३॥दक्षिणांगुरवेदत्वायथाशक्तिद्विजोत्तमः॥नृपोराष्ट्रार्धमेवापिअशक्तश्चेद्धयाव
लि॥१४॥इतिशौनकीयेऽपुत्रस्यज्ञातीयपुत्रग्रहणविधिः॥अथनामकरणं॥ ॥शिशोर्नामाथपित्रादिदेशमे
द्वादशेऽह्निवा॥कुर्याद्वागुणैर्युक्तेनक्षत्रेनुगुणेशिशोः॥१॥इदमार्यःकुमारस्यनामास्यविदधाम्यहं॥इतिवि

ज्ञापितैर्विप्रैर्विदद्भिरनुमोदितं॥२॥नामघोषवदादित्यायुक्तलक्षणसंयुतं॥पुण्येमुहूर्तेबालस्यविधेयंवेदपारगैः॥३॥ ब्राह्मणैःसार्द्धमारभ्यपूर्वंपुण्याहवाचनं॥तत्रपुण्याहपर्यायंयथाविधिसमाप्यच॥४॥स्वस्तिपयायमध्यानुनाम धेयंविधित्सितं॥चतुर्थ्यंतमुदीर्योदीपितातेनामकर्मणः॥५॥अस्मैअमुकायशतंशरदोजीवनायस्वस्ति॥भवंतो ब्रुवंत्वितिकर्तोब्राह्मणान्प्रार्थयेत॥६॥तेब्रूयुरस्मैअमुकायशतंशरदोजीवनाय॥स्वस्त्यास्तितिविप्रार्चोदिभिर्ब्रू युःसर्वनामसु॥७॥स्वस्तीत्यादिब्रुवत्यंतेभवत्यदमुदीरयेत्॥वक्कारश्चचतुर्थ्यंतंबालनामोक्तिपूर्वकं॥८॥स्वस्ती त्येवप्रतिब्रूयुरथसर्वेरपिद्विजैः॥सहक्रांतमुदीर्योदीपितातेनामकर्मणः॥९॥पुण्याहशेषंतत्सर्वंतेसर्वेपिसमा प्नुयुः॥येननाम्नोपनीतोसौकरिष्यत्यभिवादनं॥१०॥तच्चास्मिन्नेवसमयेकर्तासौनामकर्मणः॥अभिवादनना मदमस्मित्यालोच्यतेतस्य॥११॥उपांशुनिर्दिशेच्चैतन्नज्ञानीपुत्रिशुर्यथा॥ज्ञातीयातच्चनोमेनयन्नामेभिपितरौशि शौः॥१२॥अत्रादिहोमपक्षश्चेज्ज्ञातकर्मवदावितः॥पुरस्तात्तंत्रमाचार्यःकृत्वानादेशआकृतीः॥१३॥ततस्तेनैवपुण्या हेप्रकारेणयथापुरं॥नामाधित्सितमत्रयाततस्विष्टकृतादिकं॥१४॥उपरिष्टात्तनंतंत्रंकुर्याच्चैवयथाक्रमं॥कु १९

मार्योश्चेदमखिलंकर्मकुर्यादमंत्रकं॥१५॥पुमांयुग्माक्षरंनामस्यात्स्त्रीणामयुताक्षरं॥यत्किंचिद्धायविप्रादेनामंद द्याद्यथेष्टता॥१६॥मासनामदद्यादित्याहगार्ग्यः॥ ॥मासगुरोनेमिदद्याबालकंतुवैपिता॥कृष्णोनंतोच्युतश्चकी वैकुंठोयज्ञनार्दनः॥१७॥उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः॥योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमात्॥१८ ॥इतिनामकरणं॥ ॥अथातःसंप्रवक्ष्यामिशौनकःशांतिमुत्तमं॥वैधृतौचव्यतीपातेमहादोषाभिजायते॥१॥कु मारजन्मसमयेव्यतीपातादिदोषतः॥कुमारजन्मकालेतुव्यतीपातोचवैधृतिः॥२॥संक्रमश्चरवेस्तत्रदुःखदारि द्र्यकारकः॥दरिद्राणामहंदुःखंव्याधिपीडामहद्भयं॥३॥अथियंमृत्युमाप्नोतिनात्रकार्योविचारणा॥स्त्रीणांच शोकदुःखंचसर्वनाशकरोभवेत्॥४॥शांतिंवापुष्कलाकार्यातत्रदोषोनकश्चन॥गोमुखात्प्रसवंकुर्याच्छांतिंकु र्यात्प्रयत्नतः॥५॥जपाभिषेकदानैश्चहोमादपिविशेषतः॥नवग्रहमखंकुर्यानस्यदोषोपशांतये॥६॥प्रथमं गोमुखाज्जन्मततःशांतिंसमाचरेत्॥ग्रहस्यपूर्वदिग्भागेगोमयेनानुलिप्यच॥७॥भलंकृतस्वदेशेतुव्रीहिगिरिं प्रकल्पयेत्॥पंचद्रोणमितंधान्यंतदर्धंतंदुलेनच॥८॥तदर्धंतुतिलैःकुर्यादन्योन्यपरिकल्पयेत्॥द्रव्यत्रितंय

शसोतुअष्टपत्रंलिखेद्बुधः॥९॥पुण्याहंवाचयित्वातुआचार्यंवृणुयात्ततः॥आचारवंतंधर्मज्ञंकुलीनंचकुटुंबि
नं॥१०॥मंत्रतत्त्वार्थतत्त्वज्ञंशांतिकर्मणिकोविदं॥पंचांगभूषणंदद्यात्पदवस्त्रांगुलीयकं॥११॥शशेःप्रतिष्ठितंकुंभं
अक्षतंसुमनोहरं॥तीर्थोदकेनसंपूर्त्यसमृदौषधिपल्लवं॥१२॥सगंध्यगंधरत्नंचवस्त्रयुग्मेनवेष्टयेत्॥तस्योपरि
न्यसेत्पात्रंसूक्ष्मवस्त्रेणसंयुतं॥१३॥प्रतिमास्थापयेद्वीमान्साधिप्रत्यधिदेवतां॥चंद्रादित्याकृतीपार्श्वेमध्येवैधृ
तिमर्चयेत्॥१४॥एकमेवव्यतीपातेशांतौसंक्रमणस्यवा॥धान्योरुत्तरतोरुद्रमग्निंदक्षिणतोऽर्चयेत्॥१५॥निर्वि
घ्नवाद्धिमात्रेणतद्धानचपादके॥प्रतिमाकारयेद्वीमांस्तत्रलक्षणलक्षितः॥१६॥प्रतिमांपूजनार्थायवस्त्रयुग्म
निवेदयेत्॥अधिदेवंभवेत्सूर्यंश्चंद्रप्रत्यधिदेवतं॥१७॥तत्रव्याहृतिपूर्वेणतन्नन्मंत्रेणपूजयेत्॥त्र्यंबकेनचमंत्रे
णप्रधानप्रतिमांजपेत्॥१८॥उत्सूर्यइतिमंत्रेणप्रधानंप्रतिमांजपेत्॥उत्सूर्यइतिमंत्रेणसूर्यपूजांसमाचरेत्॥
॥१९॥आप्यायस्वेतिमंत्रेणसोमपूजांसमाचरेत्॥उपचारैःषोडशभिर्यद्वापंचोपचारकैः॥२०॥अर्चितंगंधपुष्पा
द्यैःफलैर्नैवेद्यमर्चयेत्॥मृत्युंजयेनमंत्रेणप्रधानप्रतिमांस्पृशेत्॥२१॥अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥अ

MEMORIAL

ष्टाविंशतिरष्टौवाप्रजप्यात्तत्स्वशक्तितः॥२२॥सर्वेषांप्रजप्यात्यसोमार्यसोममंत्रतः॥आनोभद्रेतिसूक्तेनभद्राऽग्ने
श्चसूक्तकं॥२३॥जपेच्चपौरुषंसूक्तंत्र्यंबकेनमतःपरं॥कुंभंस्पृष्ट्वाचतुर्दिक्षुजपंकुर्यादथर्वित्॥२४॥कुंभस्यपश्चि
मेदेशेस्थंडिलेग्निंप्रकल्पयेत्॥स्वगृह्योक्तविधानेनकारयेत्संस्कृतानलं॥२५॥त्र्यंबकेनचमंत्रेणसमिदाज्यंचरुं
कुर्यात्॥अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥२६॥अष्टवाचाहुतीःकुर्यात्स्वस्यशक्त्यानुसारतः॥मृत्युंजयेनमंत्रे
णतिलहोमंसमाचरेत्॥२७॥ततःस्विष्टकृतंकृत्वाअभिषेकंचकारयेत्॥अभिषेकाप्लुतंवस्त्रमाचार्यायप्रदाप
येत्॥२८॥श्वेतवस्त्रधरोभूत्वाभूषणाद्यैरलंकृतः॥यजमानस्त्रियायुक्तआज्यावेक्षणमाचरेत्॥२९॥आचार्यं
पूजयेत्पश्चावस्त्रहेमांगुलीयकैः॥गोदानंवस्त्रदानंचसवर्णादानंविशेषतः॥३०॥तद्दोषशमनार्थायआचार्यायप्रपू
जयेत्॥प्रच्छादनपटंदद्यात्ततःशांतिर्भविष्यति॥३१॥जपकेभ्योब्राह्मणेभ्योदक्षिणाभिश्चतोषयेत्॥दीनांधकृ
पणेभ्यश्चप्रदद्याद्बहुदक्षिणा॥३२॥ब्राह्मणाशतसंख्याकान्मिष्टान्नंभोजयेच्चतत्॥बंधुभिःसहभुंजीतयथावि
भवसारतः॥३३॥एवंयःकुरुतेमर्त्योनैवदुःखमवाप्नुयात्॥आयुरारोग्यमैश्वर्यंमातापित्रोःस्त्रियोरपि॥३४॥स

वैदुःखनिवृत्यर्थंपुत्रपौत्रप्रवर्धनं॥सर्वान्कामानवाप्नोतिसुखीभूत्वाचिरंवसेत्॥३५॥इतिशौनकीयेवैधृतिव्य॥नीपा
तसंक्रांतिमहादोषाभिभूतदिनेजातबालकस्यउउक्ताशांतिः॥ ॥ग्रहणेचंद्रसूर्ययग्रसूतिर्यदिज्ञायते॥व्याधिपीडाजनदा
स्त्रीणांमादौतुऋतुरदोनान्॥१॥इत्थंसंजायसेयस्तुतस्यमृत्युर्नसंशयः॥व्याधिपीडाचदारिद्र्यंशोकश्चफलंहोभवे
त्॥२॥शांतिंतेषांप्रवक्ष्यामिनराणांहितकाम्यया॥यस्मिन्ऋक्षेविशेषेणग्रहणंयदिजायते॥३॥एतदक्षाधिपंरूपं
सुवर्णेनप्रकल्पयेत्॥यथाशक्त्यानुसारेणविनश्याद्धेनकारयेत्॥४॥सूर्यग्रहेसूर्यरूपंसुवर्णेनरचशक्तितः॥चंद्र
ग्रहेचंद्ररूपंरजतेनविशेषतः॥५॥राहुरूपंप्रकुर्वीतनागेनैवविचक्षणः॥शुचौदेशेप्रयत्नेनगोमयेनप्रकल्पयेत्॥
॥६॥तस्योपरिन्यसेद्वीमांनववस्त्रंसुशोभनं॥त्रयाणांचैवरूपाणांस्थापयेत्तत्रकारयेत्॥७॥रक्ताक्षतंरक्तगंधंरक्त
पुष्पांबराणिच॥सूर्यग्रहेप्रदातव्यंसूर्यप्रीतिकरायच॥८॥श्वेतवस्त्रंश्वेतमाल्यंश्वेतगंधाक्षतादिभिः॥चंद्रग्रहेप्र
दातव्यंचंद्रप्रीतिकरायच॥राहवेचैवदातव्यंकृष्णपुष्पांबराणिच॥दद्यान्नक्षत्रनाथायश्वेतगंधानुलेपनं॥१०॥
सूर्यंचपूजयेद्वीमानाकृष्णेनेतिमंत्रतः॥चंद्रग्रहेतथ्वासम्यगाप्यायस्वेतिमंत्रतः॥११॥स्वर्भानोरितिमंत्रेणराहुंयले २१

नपूजयेत्॥एवंसंपूज्यधीमांसमिद्भिश्चार्कसंभवैः॥१२॥चंद्रग्रहेचपालाशैःसमिद्भिर्हुतुयान्नरः॥दूर्वाभिर्हुतुयाद्वी
मान्राहोसंप्रीणनायच॥१३॥समिद्भिर्बिल्वरंध्रैर्यैर्भशायहुतुयान्नतः॥आज्येनचरुणाचैवतिलैश्चहुतुयान्नमः॥१४
॥पंचगव्यैःपंचरत्नैःपंचलवकषंचपल्लवैः॥मूलैरोषधिकल्कैश्चसहतैःकलशोदकैः॥१५॥अभिषेकंप्रकुर्वीतयज्ञ
मानेप्रयत्नः॥मंत्रैर्वारुणसंभूतैरापोहिष्ठादिभिस्त्रिभिः॥१६॥इमंमेगंगेतिपरंतत्वायामीतिमंत्रकैः॥अभिषेकं
निवृत्तेतुयजमानःसमाहितः॥१७॥आचार्यंपूजयेत्पश्चात्सुशांतोविजितेंद्रियः॥तस्मैदद्यात्प्रयत्नेनभक्त्याप्रति
कृतित्रयं॥१८॥दक्षिणावस्त्रसंयुक्तंयथाशक्त्यानुसारतः॥ब्राह्मणान्भोजयित्वातुप्रणिपत्यक्षमापयेत्॥१९॥
तेभ्योपिदक्षिणांदद्याद्यजमानसमाहितः॥अनेनविधिनाशांतिंकृत्वासम्यग्विशेषतः॥२०॥अकालमृत्युशोकं
चव्याधिपीडामवाप्नुयात्॥सौख्यसौमनसंनित्यसौभाग्यंलभतेनरः॥२१॥इत्थंतुग्रहजातानांसर्वारिष्टविनाशि
नं॥कथितंभार्गवेणेदंशौनकायमहात्मने॥२२॥इतिशौनकीयेचंद्रसूर्यग्रहणदिनेजातबालकस्यस्त्रीणांप्र
थमशांतिंकृत्वाशांतिः॥ ॥मासेचतुर्थेषष्ठेवात्रिशोनिष्क्रमणंग्रहात्॥विदधीतांश्चपित्रादिहितैषेयश्चरक्षकः

॥१॥पूर्वपक्षेशिशोर्जन्मनक्षत्राणांगुणेशुभे॥नक्षत्रेगुणसंपन्नेतिथि वारादि संयुते॥२॥स्नापयित्वाशिशोःपूर्व
भूषयित्वातनोद्विजान्॥भोजयित्वाचसंतृप्तैःकृतपुण्याहवाचनं॥३॥निर्गम्यतगृहादीनांनीत्वाचदेवतालयं॥त
नःप्रदक्षिणंकृत्वाबालंतंदेवतालयं॥४॥गंधमाल्यादिभिस्तत्रपूजयित्वाचदेवतां॥प्रणिपत्यचतंबालंततोदेवाल
यस्थितैः॥५॥द्विजद्विर्द्वोस्मणैराशीर्वादाद्यैरभिवंदनं॥परिगृह्यतथास्नानंनिष्क्रम्यचततःशिशुः॥६॥मातुरादेःस
मासीनंबंधोश्चापद्यमंदिरं॥तत्रापहारदानाद्यैराशिर्भिश्चाभिलीप्सितं॥७॥कुमारपरिगृह्यैनंप्रापयेत्स्वगृहंततः॥
॥इतिनिष्क्रमणं॥ ॥आचार्येस्मृतौ॥चतुर्थेमासिकार्यंस्यादुपनिष्क्रमणंशिशोः॥षष्ठेवादेवतास्थानमादग्यतंत
तःशिशुं॥१॥प्रत्यक्षैकृत्रिमैर्वातमलंकृत्वाशिशुंपिता॥नयेदाकल्पकैःसम्यग्देवतायतनंगृहात्॥२॥अभ्यर्च
देवतामूर्तिमंत्रघोषपुरःसरं॥भोजयित्वाद्विजान्वीहस्तिवाचनमाचरेत्॥३॥साकुंतेप्रजपेत्सूक्तेशिशोर्निष्क्र
मणेपिता॥द्विजाश्चादर्शपूर्वोणिमंगलानिपुरोदयेत्॥४॥दर्पणःपूर्णकलशःकन्यासुमनसोक्षताः॥दीपमा
लाध्वजालाजासंप्रोक्तंचाष्टमंगलं॥५॥सुमनसःसुपुण्यानिविवाहेनिष्क्रमेकाम्येवृद्धौपूर्तेसमागमे॥उत्सवेषुच २२

यात्रायांप्रशस्तंचाष्टमंगलं॥६॥अत्रविशेषोबृहस्पतिनोक्तः॥अलंकृत्यशिशोःसम्यगभ्यर्च्यचसभाक्षतैः॥स्वस्ता
ययाश्वसमारूढवाहनंनिर्मयेगृहात्॥७॥मातुलोवाहयेत्तत्रनिवाहनंशिशोस्वयं॥शिशुनासहमित्राणिनिर्ययुस्व
गृहात्स्वयं॥८॥सर्वदुंदुभिर्घोषैश्चबाद्यशब्दैःसमान्वितैः॥चतुरस्रेशुचौदेशेगोमयेनोपलेपिते॥९॥धान्यपुं
जेसमासीनंबालबालानथापिवा॥अर्चयेद्गंधपुष्पाद्यैस्तस्मिन्मूर्तिललाटके॥१०॥अस्यरक्षांततःकृत्वामृतमंत्री
विनाजपेत्॥तत्रार्चयेद्गृहेशानांभूतेशानांतथैवच॥११॥भक्ष्यैर्विचित्रैःसफलैःशिशुंतंसम्यर्चयेद्बुधः॥विघ्नु ध
र्मान्नरेयरशरामप्रत्याहपुष्करेण॥चतुर्थेमासिकर्तव्यंशिशुनिष्क्रमणंगृहात्॥दिगीशानांदिशांतत्रतथाचंद्रा
र्कयोर्द्विजः॥१२॥पूजनंवसुदेवस्यगगनस्यचकारयेत्॥ततःस्वलंकृतांधात्रीबालमादायपूजितः॥१३॥बहिर्नि
ष्क्रमयेद्गृहाल्लंबपुष्याहनिस्वनैः॥ततस्तत्रपठन्मंत्रंयनद्वामनिबोधमे॥१४॥चंद्रार्कयोर्दिगीशानांदिशांचग
गनस्यच॥निक्षिपेत्यात्रमिदंतेदक्षक्रतुसर्वदा॥१५॥अप्रमत्तंप्रमत्तंवादिवारात्रमथापिवा॥रक्षंतुसतंसर्वेदेवा
नांशपुरोगमाः॥१६॥स्त्रीणामविधवानांचद्विजानांचमुधांतथा॥नदानपूजाकर्तव्यागीतनृत्यैर्महोत्सवैः॥१७॥

॥इतिप्रयोगपारिजातेनिष्क्रमणं॥ ॥अथबालोपवेशनं॥ ॥तत्रविष्णुधर्मोत्तरेपरशुरामप्रतिपुष्करेणोक्तः॥ ॥पंचमे चतथामासिभूमौतुमुपवेशयेत्॥तत्रसर्वागृह्योक्तास्तान्नरमारामविशेषतः॥१॥तिथिंविवर्जयेद्रिक्तांश्रुतास्तानिशृणु भामिनि॥उत्तरात्रितयंसौम्यंपुष्यर्क्षंशक्रदैवतं॥२॥प्राजापत्यंचहस्तंचशस्तमस्मिन्नमित्रभं॥वराहंपूजयेद्देवंशथिवीचतथाद्विजान्॥३॥पूर्ववत्पूजनंकृत्वागुरुदेवद्विजन्मनां॥भूभागमुपलिप्याथकृत्वा तत्रमंगलं॥४॥शेषपुण्याहशब्देनभूमौतमुपवेशयेत्॥अत्रशेषवचनंसर्वव्यापलक्षणं॥५॥एतदुक्तंतुपूर्वोक्तवत्स्वस्तिवाचनं॥कृत्वामंगलतूर्योदिनिःस्वनैःक्रियमाणेबालंधरण्यामुपवेशयेदिति॥तत्रमंत्राश्चात्रभवद्भामतन्मेनिगदितःशृणु॥रक्षेध्वंवसुधेदेविसदासर्वगणंशुभे॥६॥आयुःप्रमाणसकलंनिक्षिपस्वहरिप्रिये॥अचिराद्यायुषस्यस्यकेचित्परिपंथिना॥७॥जीवितारोग्यवित्तेषुनिर्दहस्वचिरेणतान्॥धारिण्यःसर्वभूतानांमातस्त्वमधिकात्वसि॥८॥अजरार्चमयाचसर्वभूतनमस्कृते॥त्वमेवविश्वेषजगतांप्रतिष्ठावाश्रयोत्वसि॥९॥कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतामिति॥तस्योपवेशनंकृत्वाभूमौब्राह्मणभोजनं॥१०॥ततःकृत्वाततःकार्योसुत्सवेवद्विजः॥उत्सवःपुन २३

र्निगतनादिएवंकुमार्योप्यलक्षणार्थंतथाप्रकृत्वाबालरक्षांत्वावपेत्॥इतिशौनकीयेबालोपवेशनं॥ ॥जन्मप्रभृतिषष्ठेह्न्यान्मासेन्नप्राशनंशिशोः॥प्रशस्तेहनिमेकूर्तेविहितेशोभनापिच॥१॥सुकूर्तेब्राह्मणान्नदानाद्यैःपरिपूर्यचापुण्याहंवाचयित्वातैर्गंधपुष्पाद्यलंकृतः॥२॥उपवेश्यासनेशुभेप्राङ्मुखंबालमंतिके॥अंकेवाधीतमध्याद्यंमिश्रमन्नंसुमंस्कृतं॥३॥मंत्रेणान्नपतेन्नस्येत्यादिनाप्राशयेत्सकृत्॥ययेष्टंप्राशयेत्यश्चाच्छोधयेत्सुखंशिशोः॥४॥इदंकर्मकुमार्योश्चसर्वंकार्यंसमंत्रकं॥होमपक्षत्रयेत्रापिजातकर्मवदाचरेत्॥५॥वृद्धिश्राद्धंतुपूर्वेद्युस्मिन्यक्षेसमाचरेत्॥उत्तरेद्युस्तुबध्नीतुकौतुकंचयथाविधिः॥६॥होमोयदेशायत्रास्तिनतुमंत्रोपवेशनं॥तत्रान्नादेशाहोमास्युरितिसूत्रकृतोमतं॥७॥तत्रजातक्रियानामकर्मान्नप्राशनादिषु॥होमस्यापिविधानेनत्वन्नादेशाकृतीभवेत्॥८॥ ॥इत्यन्नप्राशनं॥अथजीविकापरीक्षामार्कंडेयेमहर्षितः॥अग्रतोयेप्रविन्यस्यशिल्पभांडादिसर्वशः॥१॥अस्त्राणिचैवशस्त्राणितनयंपरीक्षयेत्तलक्षणं॥प्रथमंयःस्पृशेद्बालंतेनांडस्वयंतथा॥२॥जीविकातस्यबालस्यतेनैवतुभविष्यति॥ ॥इतिजीविकापरीक्षा॥ ॥अथसूजन्मनक्षत्रेस्नातःशुक्लांबरोनृपः॥कृतकौतुकबध्नश्चसर्वाभरण

भूषितः॥१॥नक्षत्रदेवतापूजांकुर्याद्गुरुसमन्वितः॥आचार्येणैवहोतव्योहोमःसर्वत्रभूपतेः॥२॥स्थंडिलाद्याज्यभागांतंकृ
त्वासर्वंयथाक्रमं॥दूर्वाघृताक्तंजुहुयादष्टोत्तरशताहुतीः॥३॥यद्देवताकंनक्षत्रंमत्रंदैवतस्मृतः॥ततःस्विष्टकृतंसर्वं श्लो२
होमशेषंसमापयेत्॥४॥गोभूहिरण्यवस्त्राद्यैर्ब्राह्मणान्भोजयेन्नृपः॥तस्मिन्नहनिसर्वत्रदेवतायतनानिच॥५॥पूजा
येद्दुःखितांस्तान्बांधवान्मोदयेन्नृपतिस्ततः॥द्विजात्मबांधवानभ्यर्च्यतस्मिन्नहनिकारयेत्॥६॥पूजयित्वाविधानेनपूजि
तव्याःस्वबांधवात्॥नहिस्यात्सर्वभूतानितदहस्तुविशेषतः॥७॥सर्वसमावरंराज्ञासुखीभवतिसर्वदा॥ ॥इतिजन्म
नक्षत्रविधिः॥ ॥चौलकालउक्तोमनुना॥ ॥चूडाकर्मद्विजातीनांसर्वेषामेवधर्मतः॥प्रथमेब्दृतृतीयेवाकर्तव्यंश्रु
तिचोदनात्॥१॥यमस्तु॥ततःसंवत्सरेपूर्णेचूडाकर्मविधीयते॥द्वितीयेवातृतीयेवाकर्तव्यंश्रुतिचोदनात्॥२॥आ
चारस्मृतौ॥तृतीयेपंचमेवाब्देचौलकर्मप्रशस्यते॥प्राग्वासप्तमेवाब्देहोपनयनात्॥३॥इत्यादिविरुद्धवचनानांकु
लधर्मानुसारतोव्यवस्था॥येषांकुलेयस्मिन्वर्षेतत्कर्तव्यं॥यादृशःकुलधर्मोस्यात्तादृशंकुलधर्मंच॥आद्येब्देकु
र्वतेकेचित्पंचमेन्येद्वितीयके॥४॥उपनीत्यासहैवेतिविकल्पःकुलधर्मतः॥सर्वेतृतीयेवाबालकस्यचौलकर्मस श्लो२५

माचरेत्॥५॥अथवापूर्वपुरुषःसमाचारवशाद्भवेत्॥तदोनारायणेपक्षेशुक्लेमुहूर्तसमन्विते॥६॥नक्षत्रेगुणसंपन्नेमुहू
र्तेचसमाचरेत्॥पूर्वेद्युरभ्युदयिकंश्राद्धंकृत्वापरेहनि॥७॥स्नातबालमलंकृत्यपुण्याहंवाचयेद्द्विजाः॥ततःकौतुक
माबध्यमुहूर्तेशोभनेनले॥८॥प्रतिष्ठाप्योत्तरेतस्माद्भौत्संस्त्रीयेनेष्टथ॥नूतनानिशरावाणिचत्वारिह्रीहिभिर्यवैः
॥९॥माषैस्तिलैश्चप्रत्येकंपूरितान्येकशःक्रमात्॥प्राक्संस्थास्थापयेत्तत्रयवालाभेतुतत्समौ॥१०॥व्रीहिभिःपूरयेत्पा
त्रंप्रत्यक्देशेततोनलात्॥सव्येतरेचौलकृतःसमीपेजननीशिशोः॥११॥अंकेनबिभ्रतीपुत्रमासीतप्राङ्मुखीसती॥
तस्याःपुरस्तादग्नेःपश्चान्नानडुहंसकृत्॥१२॥अस्पृष्टंभूविविन्यस्यशरावेसादयेत्ततः॥शमीपर्णानिचान्यस्मिन्छ
रावेन्यस्यभूतले॥१३॥तत्रैवस्थापयेद्दर्भंसकृत्तात्रस्यपार्श्वतः॥ततःकुमारस्यपिताहस्तेबिभ्रत्क्षुरंक्षुरान्॥१४॥
एकविंशतिमामीनशिशोर्मातस्मुदक्शिरे॥पितुरन्योभवेदर्थान्पक्षेस्मिन्चौलकृन्नरः॥१५॥ब्रह्मत्वेनहियोविप्रो
धारयेद्वाक्षुरंक्षुरान्॥यस्मिन्पक्षेपितैवास्यकर्तोचौलस्यकर्मणः॥१६॥अत्रैवसमयेकुर्यात्सुरस्थापिपरिग्रहे॥
अन्वाधानाद्यनृत्यांतमिधानंतंपुरस्तनं॥१७॥तत्रंकृत्वानिषण्णेनदक्षिणेशिशुमात्मनः॥अन्वारब्धोविधायेध्मनि

धानादितुशोषितं॥१८॥पुरस्कृत्वाज्यभागौचप्रधानाकृतिमाचरेत्॥अत्राग्न आयूंषित्याद्यैकृत्वामंत्रैस्त्रिभिःपुना॥१९॥प्र
ज्ञापतेतत्वदर्चोव्याहृतित्रितयेनवा॥द्वाभ्यांनादौसमस्तेनक्रमेणजुहुयाद्दचौ॥२०॥बालस्यप्रत्यगासीत्त्वाशीतोष्णे
वारिणाप्रथक्॥पात्रद्वयेऽभिसिंचेद्धस्ताभ्यामन्यभाजने॥२१॥उष्णेनवाथवित्यादिमंत्रेणस्याप्यनंतुनः॥न
वनीतेनदध्नावासंमिश्रीकृत्यपाणिना॥२२॥समायादग्नेःकेशान्वपतित्यादिमंत्रतः॥शिशोस्यतामकर्णौतमा
रभ्यत्रिःप्रदक्षिणं॥२३॥उंदनेप्रत्युंदनंयत्रपुनरुदीरयेत्॥दक्षिणेकेशपक्षेथबालस्यत्रिःकुशाकुरान्॥२४॥बा
लाभिमुख्यपर्यंतान्पठित्वामंत्रओषधेः॥त्रायस्वैनमितिन्यस्येदन्यमंत्रैःप्रथक्प्रथक्॥२५॥उच्चार्यमंत्रसंधितेमेनं
हिंसीरितिक्षुरं॥संधायसांकुरैःकेशान्क्षुरेणावपनादिकं॥२६॥यथासंदितिपर्यंतंमंत्रमुच्चार्यखेलिकं॥प्रच्छिद्यतां
शमीपर्णैःसंयोज्यचकुशांकुरान्॥२७॥केशान्प्राक्कूलान्बालस्यतस्यमातुःकरेदिशेत्॥साचतान्निक्षिपेत्सर्वान्मंत्र
त्यात्रेडुहासह॥२८॥अनेनविधिनाकुर्यादितीयेकेशकर्तनं॥मंत्रस्तुयेनधौतेतिकर्तनमेतत्रमन्यते॥२९॥पुनस्तृतीये
वकुर्वीततृतीयंकेशकर्तनं॥मंत्रस्तुयेनभूयश्चतंत्रंपूर्ववदाचरेत्॥३०॥पूर्वोक्तमंत्रत्रितयंक्रमेणचसमाचरेत्॥च

तुर्थंकर्तनंकुर्यात्सावधानमनंदितः॥३१॥एवमुत्तरतःकेशपक्षेपिच्छेदनत्रयं॥कुर्याद्दक्षिणआरभ्यनचतुर्थंसमाचरे
त्॥३२॥मंत्रंतुपक्षुरेणेतिप्रक्रांतंसमुदीरयेत्॥क्षुरस्यधारामुपरिप्रारभ्याधःपरामृशेत्॥३३॥बभाद्यतोयैःशीतोष्णैःपू
र्वंसेवशशेषितैः॥बालस्यसकलान्केशानार्द्रीकृत्वार्द्रपाणिना॥३४॥वंशाचारक्रमोपेतांशिखांकृत्वावपेच्छिरः॥अथो
सकेशंसुस्नातमुपवेश्ययथापुरा॥३५॥आरभ्यस्विष्टकृद्धोममूर्ध्वंतंत्रंसमाचरेत्॥ ॥इतिशौनकीयेचौलः॥ ॥अथो
पनयनं॥ ॥कुमारस्योपनयनंश्रुताभिज्ञनटनवात्॥तपसाधूतनिःशेषपाप्माकुर्याद्द्विजोत्तमः॥१॥सुद्वाष्टमादौसू
त्रोक्तवत्सरेदोषवर्जिते॥लग्नद्वयस्यापिवशेशुभस्थानस्थितेगुरौ॥२॥अथोत्तरायणेचैवशुक्लपक्षेगुणान्विते॥नक्षत्रे
गुणसंपन्नेतिथिवारसमन्विते॥३॥मुहूर्तेबहुमोहूर्तेविहितेदोषवर्जिते॥पूर्वेद्युरेवसकलान्संभारांश्चयथोचितान्॥
४॥संभृत्याभ्युदयश्राद्धमपिकुर्याद्यथाविधि॥तत्रादौपरिधानार्थंकल्पयेन्नववस्त्रकं॥५॥शिरोवगुंठनंचैवनवमन्य
त्सकल्पयेत्॥एवंसंभृत्यसंभारान्पूर्वेद्युश्चयथोचितान्॥६॥अपरेद्युःकृतस्नानंभूषणस्रस्रिवाचनांकृतकौतुकबंधं
चकुमारंकृतभोजनं॥७॥उपेतमातृगंभूयोपिस्नानमाचरसमीपतः॥सन्निधायगुरुःपुण्येमुहूर्तेपुरुतस्तनं॥८॥तं

त्रंहुत्वाज्यसंस्कारपर्यंतमवधानतः॥अथोत्थायगुरुर्वह्नेःपश्चात्स्थित्वातुमाणवं॥९॥प्राङ्मुखंसमस्थाप्यपरिधाय्ये
करंकिंचिदूर्ध्वंप्रसारितं॥१०॥स्थापयित्वादितीयेनवाससावाग्निनेनवा॥अवकुंड्यततस्तस्यकरस्याग्रेवकुंठिते॥११॥
निक्षिप्यब्रह्मसूत्रंतुवितत्याधःप्रसार्यच॥वामांसेस्थापयित्वातुतथाकृष्णमृगाजिनं॥१२॥शिरोवकुंडमुपरिनिक्षिप्यो
पनिधायच॥ततःशास्त्रोक्तविधिनायत्नेनाचामयेदयः॥१३॥आचांतवंतमाज्यादियङ्गांगादुत्तरेणतु॥नीत्वामाणव
माचार्योवह्निरात्मानमंतरा॥१४॥गमयित्वात्मनःपार्श्वेदक्षिणेचोपवेश्यतं॥परिध्याधानमारभ्यानुयाज्यस्थापनावि
धि॥१५॥तंत्रंकृत्वाततस्तेनसंस्पृष्टःपाणिनागुरुः॥इध्माधानादिकंशेषमाज्यभागाहुतीविना॥१६॥पुरस्तात्तंत्र
माचार्यःप्रधानाकृतिमाचरेत्॥अग्नआयूंषिइत्याद्यैःचौलेहोमःकृतःपुरा॥१७॥तैरेवमंत्रैरत्रापिजुहुयात्ताननुस्म
रन्॥कृत्वैवमत्यायाचार्योवह्नेरुत्तरतोंतिके॥१८॥प्रदेशेप्राङ्मुखस्तिष्ठेच्छिष्योप्युत्थायवह्निना॥व्यवधावनंपरि
हरन्नाचार्यस्यपूर्वतः॥१९॥आचार्याभिमुखस्थित्वाधारपेत्वयमंजलिं॥निदधातितमप्यन्योवारिणापूरयेत्ततः॥२०
॥तत्सवितुर्वृणीमहेवयमित्याद्यृचानया॥शिष्यांजलौस्रवत्यस्मवक्ष्यार्योदकंगुरुः॥२१॥शिष्यांजलिगतास्त्रापो २६

वक्षार्यस्तेनपाणिना॥देवस्यत्वेतिगृह्णामीत्यंतंयजुरुदीर्यतु॥२२॥शर्मोतंनामसंबुध्यानिर्दिश्यचवटोःपुनः॥सांगुष्ठं
दक्षिणंपाणिंगृह्णीयात्तेनपाणिना॥२३॥एवमेवपुनःकुर्यादंपत्योःपूरणादिकं॥हस्तग्रहणपर्यंतंकर्महस्तपरिग्र
हे॥२४॥तत्रमंत्रमुसवितेत्यादिस्यादिनरत्नमं॥पुनश्चपूर्ववत्कुर्यादंजल्योःपूरणादिकं॥२५॥मंत्रस्तत्राग्निराचार्यस्त
वेत्यादिपरिग्रहे॥भिद्यतेतोन्यदखिलंतंत्रंपूर्ववदाचरेत्॥२६॥मंत्रेणदेवसवितरेषतेत्यास्यागुरुः॥आदित्यमीक्ष
येष्टिष्यस्तथाभावपिपूर्ववत्॥२७॥विष्टनामुत्तरेणाग्निमन्योन्याभिमुखोततः॥धात्रेपरिददाम्येनमितिसंकल्पपूर्व
कं॥२८॥कस्यब्रह्मादिकंमंत्रंददाम्यंतंगुरुर्वदेत्॥युवासुवासाइत्याद्यमर्धर्चमुदीर्यतं॥२९॥प्रदक्षिणमुपावर्त्यप्रा
पयेत्यङ्मुखंवदुं॥तस्योपरितदंभाभ्यांपाणीकृत्वात्मनोगुरुः॥३०॥तंधीरासःकवयउन्नयंतीत्याद्यमुत्तरं॥अर्धर्च
मुक्तोदेशेहस्ताभ्यांयुगपत्स्पृशेत॥३१॥ततःपूर्ववदासीनगुरुःशिष्योपिचात्मना॥व्यवधानंपरिहरन्नग्नेर्गत्वांतिकं
गुरोः॥३२॥आमित्वादक्षिणेतस्यवह्निंपरिसमुह्य च॥तृणंसमिधमाद्यांप्राङ्मुखोवार्यदाग्नये॥३३॥इत्यादिकं
खिलंमंत्रंस्वाहेत्यंतमुदीर्यतु॥आदेयादेवमादायसमिधंपाणिनाततः॥३४॥अपस्पृष्ट्वाग्निनावक्त्रंसंवृतोष्ठपु

दृदयं॥तेजसामासमित्यादिमंत्रेणपरिमृज्यतं॥३५॥पाणिंप्रक्षाल्यभूयोपिस्पृष्ट्वास्पृष्ट्वानलंमुखं॥त्रिःसंमृज्यतथापा
णिंक्षालयेच्चपुनःपुनः॥३६॥अथोथायांजलिंकृत्वाहृदयेप्रणिधायच॥मयिमेधांमयीत्याद्यैःषड्भिर्मंत्रैर्विभावसुं॥
३७॥उपतिष्ठेद्गुरुरपिअग्नेःपश्चिमभूतले॥आसीतप्राङ्मुखःशिष्योप्याचार्योभिमुखोभवेत्॥३८॥भूतलेदक्षिणं
जानुंपातयित्वाभिवादयेत्॥इत्युक्त्वाप्रथमंपश्चात्मीवंगुप्तनामच॥३९॥शर्मेशब्दांतमुच्चार्यततोनामाहमस्मिभो
॥इतिचोक्त्वागुरोःपादौपाणिभ्यामुपसंस्पृशेत्॥४०॥सव्येसव्येनचरणंदक्षिणेननुदक्षिणं॥पाणिंकुर्यात्यविन्य
स्यज्ञानूपर्यभिवादयेत्॥४१॥सशर्माभूशर्मनामाहमस्मिभोरभिवादये॥इत्येवमभिवाद्यैनंविनयावनताकृतिः॥४२
॥भूत्वोपदेशंसावित्र्याःशिष्योवाच्छन्नधीहिभोः॥सावित्रीभोअनुब्रूहित्युक्त्वाथासीतंपार्श्वतः॥४३॥अथाचार्यो
पिशिष्यस्यपाणीचोदृतवाससा॥पाणिप्रदेशमाछाद्यपाणिभ्यांपरिगृह्यच॥४४॥सावित्रींस्वयमाचार्यःपूर्वंप
च्छःस्वयंवच॥शिष्यंचवाचयेत्पश्चादुच्चार्योर्धर्चशःस्वयं॥४५॥तथैववाचचयेत्पश्चादथोत्कामकलांस्वयं॥पूर्वं
तथैवशिष्यंचवाचयेदित्ययंक्रमः॥४६॥त्रिष्वप्येकोप्रयोगेषुयथाशिष्यस्तुशक्नुयात्॥वक्तुंतथैवमाचार्योवाचयेद्

बुधानतः॥४७॥ततःशिष्योरसिमम्व्रतदृत्यादिमंत्रतः॥निधायोर्ध्वांगुलिंपाणिंमथाबध्नीतमेखलां॥४८॥मौंजीत्रिवृत्स
माश्लक्ष्णादक्षिणाहृतमेखलां॥मौंज्ञाभावेतुकर्तव्याकुशाश्मंतकवल्कजैः॥४९॥दंडंचास्मैप्रदायोक्तंब्रह्मचर्यंच
निर्दिशेत्॥ब्रह्मचार्यस्यपोशानेत्यादिप्रेषमुदीरयेत्॥५०॥प्रेषस्यार्थंचनिर्दिश्यदादशाक्षादिकंततः॥कालंच
ब्रह्मचर्यस्यशिष्यायोपदिशेदथ॥५१॥सोविष्टकृतहोमादिऊर्ध्वंतंत्रंसमाचरेत्॥आमेधाजननाद्रक्षेत्तमोपनय
नानलं॥५२॥तत्रैवसायंप्रातश्चसमिधंजुहुयादसौ॥ब्रह्मचारीनिशारंभेपतुंब्रह्मोदनंचरुं॥५३॥हिज्ञाभोज्ञयि
तुंपश्चाद्व्यंभिक्षेतबांधवान्॥अप्रत्याख्यायतःपुंसस्त्रियोवाताद्दशीपुनः॥५५॥भिक्षेतपात्रहस्तःसन्प्राप्यतदंति
कं॥अग्रेभिक्षेतज्ञननीमप्रत्याख्यायनीचया॥५५॥पश्चात्पितरमन्येपिर्यैचस्युर्बांधवास्ततः॥अत्रप्रकारोभि
क्षामीत्युक्त्वापूर्वंततःपरं॥५६॥भवांद्दात्तिनिब्रूयात्पुरुषंप्रतिभिक्षणं॥स्त्रियंतुभिक्षांभवतीद्दात्तित्यभिया
चितं॥५७॥लब्धंविप्राप्यगुरवेतत्पात्रंतंनिधायच॥ततंनिधावचपलस्निग्धद्दादिवसक्षयात्॥५८॥इतिशौनकी
येउपनयनं॥ ॥सायंसंध्याविधिंकृत्वाचार्योपनयनानले॥आधायसमिधंपूर्वंततोन्वाधानपूर्वकं॥१॥पूर्ण

पात्रनिधानांतंतंत्रंकृत्वापुरस्तानं॥ततोलब्धचतद्वौक्षंदिज्ञान्भोजयितुंतथा॥२॥होमंचकर्तुपर्याप्तं--ष्टथकूनि
रूप्यच॥चरुंपचेत्सर्वथैवपकुंशाल्यांनशक्नुयात्॥३॥तदातदार्थंतद्वंधुःकश्चिन्तत्कृत्यमाचरेत्॥अथविज्ञापयेच्छि
ष्यंशृतौब्रह्मोचनंचरुः॥४॥अनुप्रवचनीयोक्त्वाचार्यस्तदनंतरं॥आज्यसंस्कारमारभ्यानुयाजस्थापनाविधिः॥
५॥तंतंत्रंकृत्वाथशिष्येणसृष्टःशेषंपुरस्तानं॥इध्माधानादिकंतत्रमाज्यभागद्वयंविना॥६॥तथावदानधर्मेणा
अवदानंहविःशुचिः॥सदस्यतिमद्भूतंप्रियमित्याघृचाकृतिं॥७॥आद्यांकृत्वाथसाविश्वादितीभादृतिमाचरे
त्॥पश्चादृषिभ्यःस्वाहेतितृतीयाकृतिमाचरेत्॥८॥चतुर्थेस्विष्टकृद्धोमंकृत्वोर्ईतंत्रमाचरेत्॥होमावशिष्टमन्नं
चब्राह्मणान्भोजयेदथ॥९॥भुक्तवद्भिश्चतुर्वेदसमाप्तिंवाचयेदपि॥ब्रूयाद्विज्ञान्गुरुर्वेदसमाप्तिंवदतेतितान्॥१०
॥समाप्तिरस्तिनिब्रूयुस्तेपिवेदपरात्परं॥अतऊर्ध्वंहविष्याशीत्रिरात्रंब्रह्मचर्यवान्॥११॥अधःशयीतवर्तेत्तगुरो
श्चितंप्रसादयेत्॥एवंद्वादशरात्रंवावर्तेतादृमथापिवा॥१२॥शक्त्यपेक्षयाकल्पःस्याद्व्रतेब्रह्मचारिणः॥एवंकृतं
व्रतस्यास्यचतुर्थेदिवसेगुरुः॥१३॥त्रयोदशेवाब्रांतमेधाजननमाचरेत्॥द्वादशंतुत्रिरात्रंवादेतेगुणमहात्मना॥ २८

४॥कारयेद्विधिनाकर्ममेधाजननसंज्ञितं॥कुर्याच्चिमेखलांवेदिंसर्वतोद्वादशांगुलां॥१५॥शुचौप्रगुत्तरेभागेतस्यांमे
धासमर्चयेत्॥पालाशशाखानन्मध्येपात्रंगुरुसमन्वितं॥१६॥ज्ञात्वावातत्कुशस्तंभंसमूलंस्थापयेद्गुरुः॥सवासापेक्षया
ग्नेपीदिशयाम्याचैनैऋतीं॥१७॥वर्जयित्वादिशंनिंद्यांतिस्रोन्यस्यांदिशिस्थितं॥पालाशेप्राप्यतत्रस्थंमेधाजननम्या
चरेत्॥१८॥अत्रैकमूलस्यमिपाशेलास्यविशेषणात्॥मूलप्रभृत्येवोद्भूतशाखाभेदसमन्वितं॥१९॥सर्वथायस्यक
स्यापिपलाशस्यतसंभवेत्॥कुशस्तंबमुगम्यनकुंभानीतवारिणा॥२०॥मेधामावाह्यमातीमामेधायेनमइत्यथ॥
गंधपुष्पाक्षतैःसम्यक्धूपदीपादिभिःपुरा॥२१॥दृष्ट्वानिवेदयेदन्नंसकुमिश्रसपायसं॥समोदनंचनैवेद्यंनपुनश्चा
भ्यर्चंपूर्ववत्॥२२॥प्रणम्यतत्स्यमेधायेनमइत्याज्यतिभिःसिंचयेज्जलं॥उचरंसुत्रवान्मंत्रंजलंगृहप्रदक्षिणं॥२३॥
मुश्रावतांनमस्कृत्यतथाकुर्योत्पुनःपुनः॥एवंत्रिवारमादृत्यदंडाजिनकमंडलून्॥२४॥वेद्यांनिक्षिप्यतत्पात्रावासा
सीचविनिक्षिपेत्॥वाससीनेसगुवेमेधाजननकर्मणि॥२५॥आचार्यश्रावयेन्मंत्रंमेधाजननंसूत्रकं॥पुण्याह
वाचनंकृत्वाब्राह्मणाश्चापिभोजयेत्॥२६॥अस्यवर्षेतिसामेधामेधाजननकर्मणः॥तत्कर्तव्यंप्रयत्नेनव्रत

स्यचसमापयेत्॥२७॥प्रदक्षिणत्रितःसिंचसंततंब्रह्मचारिणंवाचयेन्मंत्रमाचार्यमुश्रवःसुश्रवाअसि॥२८॥इत्येवमा
दिकंभूया-समवधानतः॥प्रतिप्रदक्षिणंमंत्रमद्यभ्यावर्त्यवाचयेत्॥२९॥ततःपूर्वधृतंवस्त्रमेरवल्लामखिलंबटुः॥प
थिस्वस्त्ययनान्मंत्रान्ब्रूयुर्युःबांधवैसह॥३०॥अग्रतोस्वनतेयुस्तेवारिधारांघसंततः॥ततन्मंगलैर्दीपैःस्तुपूर्णकुंभा
दिभिर्युतः॥३१॥प्रापयेद्गृहमाचार्यःपुण्याहंवाचनेद्विजैः॥इतिशौनकीयेमेधाजननं॥ ॥अथपुनरुपनयनं॥ ॥
योवेदांतरमध्येतुतत्सूत्रविधिनाततः॥कृतोपनयनोधीत्यतंवेदंसकलंद्विजः॥१॥द्वितीयमिममृग्वेदमध्येतुमभि
वांच्छया॥एतद्दृष्ट्वोक्तविधिनापुनरप्युपनीयते॥२॥केशानावपनंतस्यनक्रियेतक्रियेतवा॥मेधाजननंकर्मापि
विज्ञेपंचहतादृतं॥३॥कर्तव्यपक्षाश्रयणेमेधाजननकर्मणः॥ब्रह्मौदनस्यहोमस्यात्रिरात्रादिव्रतंतथा॥४॥क
स्यब्रह्मादिमंत्रेणपरिदानंनचेष्यते॥तत्रोपनयनादिश्चकापोनापेक्ष्यतेननु॥५॥तत्सावित्रुद्वेणीमहेवयमित्येव
मादिका॥ऋक्सावित्रीपरिग्राह्यायत्यद्यदन्नत्सामीरितं॥६॥अन्योपनयनेतत्रदलंकारविवर्जितं॥इहापिमंत्रैकु
र्वीतेत्युपनीतःपुनर्भवेत्॥७॥इतिशौनकीयेपुनरुपनयनं॥ ॥अथोपाकर्म॥ ॥अथाःनश्रावणेमासिश्रवणर्क्षेयु

तेदिने॥श्रावण्यांश्रावणेमासिपंचम्यांहस्तसंयुतं॥१॥दिवसेविरधीतेतदुपाकर्मयथोदितं॥अध्यायोपाकृतंकुर्यात्त्रो
पासनवह्निना॥२॥कृत्वापुरस्तनंतंत्रप्रणीतासादनाविधिः॥अथाज्यसंस्कारपर्यंतंनानूयाजस्थापनाविधिः॥३॥तंत्रेकृ
त्वायथाध्यायेरन्चारब्धसमाप्तिमाचरेत्॥इध्माधानादिकंकुर्यापुरस्तंत्रयथाविधिः॥४॥आज्यभागाविहावश्यंहोतव्ये
नकृताकृतौ॥सावित्र्येब्रह्मणइतिऋतुभ्यःपदितेक्रमात्॥५॥कुर्यान्मंत्रैश्चतुर्थ्यंतैःपूर्वमाज्याहुतीर्नवा॥अथावृदान
नुदुःयादधिमंथ्यत्रचोदितः॥६॥अग्निमीळेपुरोहितंयज्ञस्येतिऋचैकया॥कुषुंभकस्तदित्याद्यैर्गृह्योक्तैर्नवभिर्ऋचैः॥
७॥ऋचोषदशम्नातानवमंडलगोचराः॥ताभिःसर्वाभिरेकैकामुच्चार्यैजुहुयात्क्रमात्॥८॥कुषुंभकस्तदब्रवीत्तम
ग्नेद्युभिरेवच॥आवदस्तंचसोमस्यगृणानाजमदग्निना॥९॥त्वांह्यग्नेसदमित्समिधामंतेविष्वमित्यपि॥अबोध्यग्निश्चगं
तानस्त्वंह्यग्नेप्रथमस्तथा॥१०॥योनस्सोअग्निंनरश्चप्रतिचक्ष्वचविचक्ष्वच॥माचिदन्यद्विशंसताग्नेयाहिमरुत्सखा॥
११॥स्वादिष्ठयामदिष्ठयायतेराजंछूनंहविः॥अग्रेवह्नित्वेतताभिऋग्भिरष्टदशाहुतीः॥१२॥क्रमेणानेनविधिवद्विधा
यदधिमन्थनं॥शाकल्यवाक्यात्कृत्वाचार्यमंहितांदितयंतिमे॥१३॥ऋचोसमानीयइतितच्छ्योरितियाश्रुता॥ता

भ्यांयथाक्रमंकृत्वास्विष्टकृद्धोमंमाचरेत्॥१४॥दधिसकृन्स्वयंप्राश्यशिष्याश्चापिततःपरं॥प्राश्येदपःआचम्यकुर्युः
सर्वेपिमार्जनं॥१५॥परिस्तरणदर्भाणामधस्तान्निहितैंजलौ॥अपामासेचनंतत्रमार्जनंसंप्रचक्षते॥१६॥ततोग्नेःपश्चि
मेदेशेप्राकूलकुशसंस्तृते॥कृत्वाब्रह्मांजलिंपूर्वमासीनःप्राङ्मुखोगुरुः॥१७॥जपित्वासकृदोंपूर्वाःसमस्ताव्याहृतीर्गु
रुः॥प्रणवाद्यंचसावित्रीसकृदुच्चारयेत्ततः॥१८॥पश्चाद्वेदादिमारभ्याध्यायंसूक्तमेववा॥तृचंवाधीत्यतांसर्वो[illegible]
ष्यानध्यापयेत्ततः॥१९॥अनुयाजप्रहरणादुपरिष्टाननंविधिं॥यथोक्तमाचरेद्देवउपाककर्मविधिंक्रमं॥२०॥ ॥इ
तिशौनकीयेउपाकर्मे॥ ॥पौर्णमासीतुयाधीतस्यामुत्सर्जनंभवेत्॥तत्रयामाद्बहिर्भूतशुचौदेशेमनोरमे॥१॥अ
विक्लेस्थंडिलंकृत्वातत्रलेखनपूर्वकं॥पुरस्तत्रंनिधायाज्यसंस्कारांतंयथाविधिः॥२॥पश्चादन्नंगृहेपक्वंपृथक्कृ
त्वानुभाजने॥तत्रलग्नावधिश्रित्यतत्रस्थामभिघार्यच॥३॥प्रत्यगग्नेर्निधायाज्यंभाजनस्यसमीपतः॥ततःपरिधा
धानादितंत्रंशेषंसमापयेत्॥४॥कृत्वोपाकर्मवदिद्धाथाज्यभागांविनस्मरन्॥सावित्र्यादिनवभ्यश्चविधायाज्याहुती
नवा॥५॥ततोग्नेरुदुत्यादभिरग्निमीळेपुरोहितं॥इत्याद्याभिरुपाकर्मेविहिताभिर्यथाक्रमं॥६॥तर्पयित्वाथऋ

ष्यादीन्यित्वनपिचतर्पयेत्॥स्वयंचकुर्याच्छिष्याश्चकारयेन्नर्षेणंत्विदं॥७॥इत्युत्सर्जननामेदंकर्मसाचार्यमीरितं॥
॥इतिशौनकीयेउत्सर्जनं॥ ॥उदगयनेशुक्लपक्षेशोभनतारके॥वेदव्रतानिचत्वारिविदधीतयथाविधिः॥१॥तेषामद्य
महानाम्न्याश्रवणंतदनंतरं॥महाव्रतंततःपश्चाद्वेदुपनिषद्व्रतं॥२॥ततोगोदानमित्येवकार्याण्येतान्यनुक्रमात्॥
तत्रादितोमहानाम्नीश्रवणेविधिरुच्यते॥३॥तत्रःप्रथममाचार्यःशिष्यायव्रतमादिशेत्॥कर्मोपनयनेप्रोक्तंयत्पूर्वं
वापनादिकं॥४॥परिधानांतमेतत्तुव्रतादेशनमीरितं॥तस्यव्रतस्यानुष्ठानंपूर्ववत्संवत्सरमादिशेत्॥५॥ततःसंवत्सरेपू
र्णेसंप्राप्तेचोत्तरायणे॥पूर्वपक्षेप्रशस्तेचनक्षत्रेसौगुरोर्मुखात्॥६॥ऋचोष्यन्महानाम्नीग्रामान्निष्कम्यशोभ
ने॥शुद्धेदेशेचरुपक्वंमाचार्योयनिवेदयेत्॥७॥व्रतलोपनयाचार्यःशिष्यंवत्सरचेद्वहेत्॥शिष्योमहाल्लोपोव्र
तेतुकृतइत्यर्थः॥८॥आचार्यस्तदुपक्रांततंत्रावस्थासमाननं॥तत्कर्ममध्येतुतप्येवव्रतलोपोनिमित्तकं॥९॥प्रा
यश्चित्तंविधायेनंकारयितोचितंतथा॥ततोस्यपरिशुद्धस्यपुनरारभ्यपूर्ववत्॥१०॥वत्सरव्रतमादिश्यतत्पैवानु
ष्ठितंव्रतं॥बुध्याचास्मिन्महानाम्नीरनुब्रूयाद्यथाविधिः॥११॥तद्यसोगुरुणाप्टोव्रतलोपोवदेन्मया॥व्रतलोप

हुतोल्पस्रुसचापकरणादिति॥१२॥तदातमनुगृह्यैतमाचार्यःकलिनंव्रतं॥व्रतलोपमनादृत्यशेषंप्रक्रांतकर्मणः॥१३॥अनुष्ठीयमहानाम्नीरनुवर्कुहुतोद्यमः॥आज्यसंस्कारपर्यंतान्याज्यस्थापनविधिः॥१४॥कर्मकृत्वाथसंस्थाप्यस्रुनेध्माधानपूर्वकं॥शेषंहुत्वापुनस्तंत्रंभवद्यपपुनश्चषट्॥१५॥अग्नावग्निश्चहुत्वाघेमित्रेहुत्वाषडाहुतीः॥ततोव्याहृतिभिर्व्यस्तरूपाभिस्रिस्रआहुतीः॥१६॥हुत्वातेतोवदाम्नायानकिंचित्स्विष्टकृतस्रुचि॥तांनिधायतिलाःप्रत्यक्समास्तीर्णेषुबर्हिषि॥१७॥ततःशिष्यंगुरुब्रूयाद्भुतशिष्टमिमंचरुः॥सर्वैमुक्तेतिमुंजीनहोमशेषंचसंशनैः॥१८॥भुक्तवंतमपांपूर्णमंजलीदधतिस्थितं॥तमुपस्थापयेच्छिष्यंत्वंव्रतानांव्रतादिनं॥१९॥मंत्रेणानेनराध्यासमित्यंतेनदिवाकरं॥ब्रूयात्सर्वंचतन्मंत्रंगुरुःशिष्यंचवाचयेत्॥२०॥उपस्थायैवमादित्यंसादयेब्रह्मचार्यथ॥नेत्रेनिमील्यवाचंचनियच्छेदवधानतः॥२१॥आचार्योप्यथशिष्यायउदङ्मुखप्रदेशतः॥आरभ्यनवंचरेणमुखयुक्तंचतच्छिरः॥२२॥वामशंखप्रदेशेवागत्यललाटभागतः॥शंखेनिधोललाटास्थिकंवाभित्यभिधानात्॥२३॥प्रदक्षिणंत्रिवेष्यवदेच्चनामिदंवच॥एकरात्रंत्रिरात्रंवात्वमेषंभूतवेषधृक्॥२४॥आसीनस्वापहीनश्चसमाभ्यांशे

वसेरिसि॥शक्त्यपेक्षेविकल्पस्यात्कालयोर्ब्रह्मचारिणा॥२५॥गुरुस्तमनुशिष्येवंततस्विष्टकृदादिकं॥उपरिष्टात्तनंतंत्रमाचरेच्चयथाविधिः॥२६॥ततःशिष्यकर्तव्यमितरद्ब्राह्मणादिकं॥अनुवोणागुरुःपार्श्वेत्युक्त्वासीतवाग्यतः॥२७॥अपरेद्युःश्वभूतेर्यवादिवसेत्रयतोगुरुः॥अनुवच्चमहानाम्नीस्वागतारोपेक्षयोदिशि॥२८॥पूर्वोत्तरामनुप्राप्तेदेशेग्रामाद्बहिर्भवेत्॥शुद्धेदेवालयेतत्रकृत्वास्थंडिलमादितः॥२९॥अग्निमभ्यानमापूर्णसलिलंचकमंडलुंन्यस्यवत्सतरीबध्वातस्याग्रेप्रत्यगुत्तरे॥३०॥ततोग्नेःप्रत्यगास्तीर्यदर्भान्त्रागुत्तराग्रकान्॥तेषासीतगुरुःपश्यन्प्रागुदीचिसमंततः॥३१॥शिष्योपिमुखलेपादीन्प्रमृज्याचम्याचोदकं॥कृत्वागुरोश्चवङ्क्रेश्चप्रदक्षिणमियेगुरुः॥३२॥अभिवाद्यगुरोःप्रत्यग्दक्षिणेतस्यपृष्ठतः॥तस्यैवासनदर्भाणामूलाग्रेवचनेनर्क्रती॥३३॥विलोकादिविरामासीततःपृष्ठनवात्मनः॥आचार्येस्यचसंयोज्यवचनंमनसाततः॥३४॥उदीरयेन्महानाम्नीर्भोअग्निरित्येवमादिकं॥ब्रूहीत्यंतमथाचार्योज्ञात्वाकालप्रमाणतः॥३५॥वचनंतेनशिष्येणप्राक्तमप्येक्षणादिकं॥ततश्चारण्यकस्यांतेसमाम्नातारुक्यातृचाः॥३६॥विदामघवन्निदागातुमित्युपसंयुता॥स्पृष्ट्वाचव्रतलोपानांमेकंगौरव

लाघवं॥३७॥अत्येनव्रतलोपेनसतंचानुकंप्यच॥तामहानाम्नइत्युक्तःपुरीषपदसंज्ञिकैः॥३८॥एवाद्येवादि
भिःसार्द्धंसंमीलितविलोचनः॥त्रिरनूच्याथशिष्यस्यमूर्द्धवासोविवेष्टितं॥३९॥उन्मूच्यस्वयमाचार्योमित्रस्यते
तिनामतः॥मंत्रद्वयेनशिष्यंतमादित्यमभिवीक्षयेत्॥४०॥अथास्यास्यप्रभृतिभिःसंभारैःसहितादिशः॥मित्रस्य
त्वाचक्षुषादितिमंत्रतःसम्यगीक्षिपेत्॥४१॥मित्रस्यत्वादितिमंत्रंमृच्छालित्येकमादिकं॥वाचयित्वापुनश्चार्क
मीक्षयेदथतावुभौ॥४२॥जपित्वामंत्रसंघातंक्रमेणाग्नद्व्यादिकः॥भवद्देवमंतंचसंस्पृशेसांचभूतले॥४३॥अ
थशिष्यस्तमाचार्यमनुज्ञाप्ययथापुरा॥अनुप्रवचनीयार्थंभिक्षित्वागुरवेचतत्॥४४॥भिक्षालब्धंवेद्यस्मैचरुंप
क्त्वायथाविधिः॥आवेदयेयत्यकृतस्मैयथापुरं॥४५॥गुरुरण्याज्यसंस्कारमुपकृम्ययथोदितं॥अनुयाज्ञनि
धानांतंतंत्रंहुत्वाततःपुरं॥४६॥इध्माधानादिशिष्येणस्रष्ट्वापुत्रकर्मनं॥तत्रशेषयथान्यायंमवदापचरुंततः
॥४७॥चतस्रोत्राकृतिःकुर्याद्यथाब्रह्मौदनेपुरा॥ब्रह्मौदनच्छेदशयीहोममंत्रास्मुरत्रतु॥४८॥महानाम्नीभ्याकु
त्स्नेषद्वितीयोमंत्रद्वष्यते॥अथोपनिष्क्रांतंतंत्रंचयथाविधिसमापयेत्॥४९॥महाव्रतेविप्रथमंव्रतादेशनमारभेत॥

पूर्णेब्देविजनेस्युद्देदेशेग्रामात्बहिर्भवेत्॥५०॥प्राक्कूलदर्भेषासीनंप्राङ्मुखःसंयतंगुरुं॥शिष्योभिवाद्यप्रथमेश्रोतु
कालोमहाव्रतं॥५१॥भोद्दत्युक्त्वाप्रथमंचाचार्यतदनंतरं॥अनुब्रूहीतिचवदन्याचित्वातत्समीपतः॥५२॥आसीतः
प्राङ्मुखःशांतःप्राक्कूलेदर्भसंस्तरे॥प्रार्थितस्त्विरनुब्रूयादाचार्योयमहाव्रतं॥५३॥द्वंद्वपक्रमसंयुक्तंप्रथमारण्य
कश्रुतिः॥मित्रस्यत्वादिभिर्मंत्रैःपूर्ववच्चार्कमीक्षयेत्॥५४॥जपित्वामंत्रसंघार्थितमुभावग्नद्व्यादिकं॥गुरुःशि
ष्योस्यशेषंवैयथापूर्वंमहीतले॥५५॥अनुप्रवचनीयंचपूर्वोयज्ञुदुयादथ॥महाव्रतायस्वाहेतिद्वितीयोमंत्रद्व
ष्यते॥५६॥व्रतादेशनपूर्वंचयत्कृतंकर्ममहाव्रते॥सकलंतदनुष्ठेयंतथैवोपनिषद्व्रतं॥५७॥अत्रोपनिषदंभो
स्त्वमनुब्रूहीतिवाचितः॥आचार्योयातदित्याघातृतीयारण्यकश्रुतिः॥५८॥त्रिरनुष्योपनिषदंपूर्ववच्चार्कमी
क्षयेत्॥अत्रोपनिषदेस्वाहेत्यनुप्रवचनीयके॥५९॥द्वितीयोहोममंत्रस्यादन्यत्संवयथापुरा॥गोदानंनामय
ज्ञोनंचनुर्यंव्रतमम्यनु॥६०॥महानाम्न्यादिभिःसार्द्धंपौर्वावर्यांतुविद्यते॥अतालव्याज्ञलंज्ञन्यैनिवशोप्यस्यने
ष्यते॥६१॥केशश्मश्रोर्वपेत्पुत्रमश्रुशब्दमुदीरयेत्॥श्मश्रूमेवसकोत्रनकेशानासमीरितं॥६२॥केशान्वपयित्व

त्रापिश्मश्रूणीतिसमावपेत्॥यज्ञोतोष्माभिरद्भिरित्यामंत्रोनापिशासनः॥६३॥तत्रकेशश्मश्रुलोमनखानीतिपदानु
रं॥उदकुंभस्थानिकुशलीकुर्वंस्त्वेवमुदीरयेत्॥६४॥ततःस्नानेसमीपस्थेतस्मिंस्विष्टकृदादिकं॥उपरिष्टातनंकर्म
माचार्यस्तुसमापयेत्॥६५॥शिष्यस्नात्वाततोवाचंनियम्यादिवसक्षयात्॥तिष्ठेदस्तमितेसूर्येगुरोरंतिकमागततः॥
६६॥वरंददामीत्युक्तारंगोवृषोगुरवेदिशेत्॥असंभवेगावृषयोभिक्षित्वावागुरोर्दिशेत्॥६७॥उत्तरेद्युर्गुरुस्नस्यव
स्त्रव्रतमादिशेत्॥सर्वासुव्रतचर्यासुप्रसिद्धंकेशधारणं॥६८॥ ॥इतिशौनकीयेव्रतचतुष्टयं॥ ॥अधीत्यवेद
शास्त्राणिकृत्स्नवेदव्रतानिच॥चत्वारिगुरवेदत्वायथाशक्त्याचदक्षिणं॥१॥ततस्तेनाभ्यनुज्ञातःसमावर्तनमाचरे
त्॥समावर्तनमानस्तुपूर्वमेवोपकल्पयेत्॥२॥मण्याद्युष्णीषपर्यंतान्भारांत्सकलानपि॥गोदानेनानिर्दिष्टत्वात्क
र्मणश्चोत्तरायणं॥३॥पूर्वपक्षादियोगंचप्रतीक्ष्यैतदाचरेत्॥मत्रांत्सन्नमयेद्यत्रनियुंक्तेतत्रकर्मणि॥४॥कुर्व
तस्वपमेवेदंकर्माचार्यानपेक्षतः॥विधायाभ्युदकश्चाद्यं पूर्वेद्युरपरेहनि॥५॥प्रातःसमिधमादायकृतस्नस्ययनो
दिशे॥यस्ययज्ञियवृक्षस्यस्ववासापेक्षयास्थितिः॥६॥प्रागुदीच्यादिशिभवेतस्यचप्रागुदक्भवेत्॥यज्ञियखातद्वा

मेकांसमिधमाहरेत्॥७॥योब्राह्मकामःपुष्यर्क्षतेजस्कामोपिवाभवेत्॥आर्द्रोसंछिद्यात्समिधंयस्तिच्छेद्रस्रवर्चसं
॥८॥पुष्यांच्छिंद्यात्समिधंयस्यतूभयकामना॥सत्सत्यर्धसमिधंआहरेदुभयेच्छया॥९॥आसामन्यंतमयाह
त्वासमिधःस्वस्वकामतः॥भूस्पर्शेवर्जितेदेशेनिधायोपरिकुत्रचित्॥१०॥दत्वाचंगांचविप्रेभ्यःकर्मगोदानंचरेत्
॥तत्रोपलेपनाद्राज्यभागवधिपुरस्तनं॥११॥तंत्रंकृत्वाथगोदानप्रकृतेचौलकर्मणि॥यथोपदिष्टंयत्कर्मतथात्रा
पिसमाचरेत्॥१२॥केशश्मश्रुशब्दानित्यादिनवधानतः॥एतमित्यस्यशब्दस्यस्थानेमामितिनिर्दिशेत्॥१३
॥तथास्नुत्वादिकंकर्मगोदानिकमपीहनी॥नानुष्ठेयमितिप्राहुराचार्याःकल्पकोविदः॥१४॥कारंजेनैवबीजेन
संपिष्टेनफलेनतु॥उन्मृज्यांगंततःस्नायान्मिश्रैरुष्णोदकैर्जलैः॥१५॥स्नात्वाचैवाग्निपार्श्वस्थोयुवंवस्त्राणिपी
वसा॥दत्वाद्यांसकृदुच्चार्यततोवस्त्रयुगंनवं॥१६॥वसित्वोदकमाचम्यगृहीत्वापाणिनोजलं॥अश्मनस्तेजइत्याद्यं
मंत्रेयाहीतिसंस्थितं॥१७॥उत्क्रांत्यर्थवाममंत्रीतनेत्रंपश्चात्तुदक्षिणं॥तेनैवमंत्रेणांत्रीततःकर्णंतुदक्षिणं॥१८॥श्रो
त्रंमेपाहिपर्यंतमश्मन्तेजसादिकं॥मंत्रमुक्त्वाक्रमाबध्वामणिबंधंतुकुंडलं॥१९॥अथानुलेपनालिप्तपाणि

भ्यांप्रथमंमुखंच॥अनुलिप्येनराण्यंगान्यनुलिंपेत्तुपश्चिमं॥२०॥ततोनार्तस्यनार्तोहंभूयासमितिमंत्रतः॥स्रजंचमूर्ध्नि बध्नीयानुन्नमालेपितांवदे॥२१॥स्रजंचेत्यमादेनब्रूयुर्मालेतिकांचनं॥तंदेवतास्रगित्येवमभिधायादिज्ञानमेः॥२२॥ततोमूर्ध्निचबध्नीयात्स्रीजंतांसावधानतः॥योदेवानांप्रतिष्टेत्यादिःखिलसंभवं॥२३॥मंत्रसंसक्तुद्वायेअध्यारोहेदुपानहौ॥तत्रदक्षिणपादेनसमारोहेदुपानहं॥२४॥पश्चात्सव्येनपादेनसमारोहेदितिक्रमः॥तत्रछत्रंदिवश्छुद्मासीनिमंत्रेणधारयेत्॥२५॥वेणुरस्यादिमंत्रेणवेणुवंदंडमुद्वहेत्॥सूक्तमायुष्यमित्याद्यैरखिलोद्भवमुदीर्यतु॥२६॥ग्रीवायांमणिमाबध्यमूर्धानंतस्यवाससा॥वेष्टयपश्चात्सपादाभ्यामुन्मुच्योपानहौस्थितः॥२७॥यापूर्वेयज्ञियात्॥दक्षात्लिंलेकासमिधाहृता॥विन्यस्तोपरिदेशेतामाधायसमिधंकरे॥२८॥स्मृतमित्यादिकंमंत्रंगृह्यस्वाहांतमीरितं॥उच्चार्यवक्ष्यादध्यादत्रैवंप्रक्रमेष्यतां॥२९॥स्मृतंनिदाचविद्याचेत्यादिसूत्रेक्रमोदितात्॥शब्दाद्यादशसंस्मृत्यमनसाःप्राक्तनःपरं॥३०॥स्मृतंचमेअस्मृतंचमेतन्मउभयत्रतं॥इत्युच्चार्यैवमुक्त्वाचलिंगादाघंयथाक्रमं॥३१॥ततोयदग्नेसेन्द्रस्यद्याद्यंमंत्रंयथादितं॥पश्चात्समिधमादध्यात्तिष्ठन्नग्नौविधानतः॥३२॥व्रतोभवा ३५

मिस्वाहेतिपर्यंतसमुदीरयेत्॥ममाग्नेवर्चइत्याद्यैनवर्चमिहरेवतिकी॥३३॥दशमीतृचमवीचमिद्रमित्यादिकांक्रमात्॥उच्चार्यप्रत्यृचंतिष्ठेनादध्यात्समिधोदश॥३४॥अत्रप्रत्यृचमित्युक्तेस्वाहाकारात्पुरेवतु॥ऋगंतेसमिधंक्षिप्त्वापश्चात्स्वाहेत्युदीरयेत्॥३५॥उपविश्यततःकृत्वासिष्टकृद्धोमपूर्वकं॥उपरिष्टान्नमंतंत्रंपुण्याहंवाचयेत्ततः॥३६॥नस्नायान्नक्तमित्याद्यैविहितंस्नानकव्रतं॥ततुसंकल्यपूर्वंतुविधिनाचसमाचरेत्॥३७॥ ॥अथसंवत्सरलोपेप्रायश्चित्तमाह॥ ॥पिताभ्रातापरोवापिप्राज्ञापत्यव्रतंचरेत्॥महापगासुसंस्नाप्यपाहिनोऽग्नऽआकृती॥३८॥पंचमिरिदंमहाव्रतलोपेप्रकृतेसति॥व्रतानिविधिवत्कृत्वास्वशाखाध्ययनंचरेत्॥३९॥अकृत्वाभ्यस्यतेयेनसपापीविधिघातकः॥प्रत्येकंकृच्छ्रमेकैकंचरित्वाज्याकृतीशतं॥४०॥कृत्वाचैवनुगायत्र्यास्त्रायादित्याहशौनकः॥अथदेवलः॥कालातिक्रमणेकुर्योत्प्रायश्चित्तंविधानतः॥४१॥कृच्छ्रद्वादशरात्रंनुचरित्वाज्याकृतीशतं॥अष्टाविंशतिमंशैवाक्रमात्कुर्याद्धुतानिच॥४२॥अथव्ययनदभ्यसंवेदंतावत्पुनःपठेत्॥४३॥ ॥इतिशौनकीयेसमावर्तनः॥समावर्तनमिमंयेतुपूजयिष्यंतुबांधवाः॥मधुपर्कप्रदानाद्यैःस्नातृहेतांनिशांवसेत्॥१॥वैष्वदेवंग्रहस्थस्यप्रातरा

रंभणंभवेत्॥स्नापितेनापितत्कार्यंपृथक्पृथकोगृह्येदि॥२॥लब्ध्वाप्यनुज्ञांगुरुतोद्विजोलक्षणसंयुतां॥बुद्धिशी
लगुणोपेतांकन्यकामन्यगोत्रजां॥३॥आत्मनोवरर्षोचविवहेद्विधिपूर्वकं॥कन्योद्वाहनकालेचदानुकूल्येन
विद्यते॥४॥ब्राह्मणस्योपनयनेगुरोर्विधिरुदाहृतः॥सुवर्णेनगुरुंकृत्वापीतवस्त्रेणवेष्टयेत्॥५॥ईशान्येधव
लंकुंभंधान्योपरिनिधायच॥दमनंमधुपुष्पाणिपत्रपात्राशमंषेपान्॥६॥मांसीगुडूच्यपामार्गविडंगीश्रीखिनी
वचा॥सहदेवीविष्णुक्रांतासर्वौषधिशतावरी॥७॥कृत्वाज्यभागपर्यंतंस्वशाखोक्तविधानतः॥ग्रहोक्तमंडलेभ्य
र्चेपीतपुष्पाक्षतादिभिः॥८॥देवपूजोत्तरेकालेततःकुंभानुमंत्रणं॥अश्वत्थसमिधश्चाज्यंपायसंसर्पिरन्वितं
॥९॥चवव्रीहितिलास्त्याज्यामंत्रेणैवबृहस्पते॥अष्टोत्तरंशतंसर्वेहोमशेषंसमापयेत्॥१०॥दारपुत्रसमेतस्य
अभिषेकंसमाचरेत्॥कुंभाभिमंत्रणोंकैश्चसमुद्रज्येष्ठमंत्रतः॥११॥प्रतिमांकुंभवस्त्रंचआचार्यायाप्रदापयेत्
॥ब्राह्मणान्भोजयेत्पश्चाच्छुभदःस्यान्नसंशयः॥१२॥ ॥इतिशौनकीयेबृहस्पतिशांतिः॥ ॥ब्राह्मणस्योपनयने
नानुकूलोभवेद्विधिः॥तस्याशांतिंप्रवक्ष्यामिपूर्वैःप्रोक्तांमहर्षिभिः॥१॥उपनयनात्पूर्वेयुःकृत्वापुण्याहवाचनं॥

MEMORIAL

गृहस्येशानदिग्भागेगोमयेनोपलेपयेत्॥२॥कुंभमेकंलिखेत्पद्ममष्टपत्रंसकेसरं॥सुवर्णेनरविंकृत्वाद्विभुजंप
द्मधारिणं॥३॥कृत्वाज्यभागपर्यंतंतंत्रेकृत्वातुपूर्ववत्॥स्वशाखोक्तविधानेनआचार्योहोममाचरेत्॥४॥आ
कृष्णेनेतिमंत्रेणसमिदाज्यचरून्कुनेत्॥अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा॥५॥तिलव्रीहींश्चकृत्वाथहो
मशेषंसमापयेत्॥दारपुत्रसमेतंतमृत्विजश्चाभ्यषेचयेत्॥६॥कुंभाभिमंत्रणोंकैश्चसमुद्रज्येष्ठमंत्रकैः॥
ऋत्विभ्योदक्षिणांदद्याद्दन्येभ्यश्चस्वशक्तितः॥७॥प्रतिमावस्त्रकुंभंचआचार्यायप्रदापयेत्॥एवंयःकुरु
तेसूर्यसर्वदोषाविनश्यति॥८॥ ॥इतिशौनकीयेआदित्यशांतिः॥ ॥आत्मनःकन्यकायाश्चजन्मर्क्षानुगुणे
शुभे॥नक्षत्रेगुणसंपन्नेतिथिवारमसंयुते॥१॥पुण्येमङ्गलकर्मेनविवाहंविधिवद्दिजः॥अथयाष्टपिंडग्र
यणविधानेनविचक्षणः॥२॥अक्षतानिपरिक्षंतंततःकन्यायथातथा॥सेत्रादुमयतःसम्यङ्नोष्ठादूर्द्धंतन्न्र
दपि॥३॥अन्योन्याच्चत्रदाद्यंतुस्थानादन्यत्रतुव्यथात्॥इरिणाच्चश्मशानाच्चगृहीत्वाष्टमृदंपृथक्॥४॥ताभि
र्गृहितिवायाम्यांपिंडान्यन्योन्यन्योन्यतःसमात्॥तिलपत्रैकदेशश्चेषुमृदासंज्ञाःपृथक्पृथक्॥५॥तिस्रि

त्वातांश्चपिंडानामतनो—म्ययंक्रमात्॥शुद्धपात्रेविधायैवानांधाद्यैरर्चयेदतः॥६॥ऋतमप्रंथमंजज्ञइत्याद्यांस्व
लिकीमृचं॥दृश्यतामितिपर्यंतामुक्त्वापिंडाभिमंत्रणं॥७॥कृत्वाग्रपाणिनाध्यायंस्वामिश्रंदेवतांवरः॥एषामे
कंगृहाणेतिकुमारीप्रत्युदीरयेत्॥८॥तंपिंडमेकंगृह्णीयात्तापिस्वामिमतंततः॥गृहीतपिंडमध्यस्थलेखातन
—पूर्वकं॥९॥गृह्याकृंतत्फलंबुध्वातनःकुर्याद्यथाकृतिः॥पिंडेषुषुप्रथमतश्चत्वारःशुभसूचकः॥१०॥कन्या
याःपंचतश्चान्येचत्वारोशुभसूचकः॥क्षेत्रमुह्हणेतस्यास्त्रीषुक्रमुह्हे॥११॥द्यूतमुह्हणेधूर्तास्याच्चतुष्पथ
मुह्हे॥उग्रोढाविरमित्येषाव्यभिचाररताभवेत्॥१२॥दारिद्र्यात्यादिभिर्भर्तुर्मस्वैरिणिमुह्हे॥श्मशानमुह्
हेभर्तुर्मुनिहेतुर्भवेदियं॥१३॥कुलिनायवरिष्ठायश्रुतशीलादिभिर्गुणैः॥द्विजन्मनेसमासाद्यननवस्त्रेणक
न्यकां॥१४॥अलंकृत्यचयद्दात्तादरंसोदकंततः॥अयंब्राह्मोविवाहस्यादेवर्षिपितृपूजितः॥१५॥याब्राह्म
णविवाहेनसम्यक्दत्वाकुमारिका॥यज्ञातःपंचयेत्पुत्रोमातापित्रोःकुलोद्भवात्॥१६॥द्वादशद्वादशान्यातापु
रुषान्भाविनस्तथा॥वस्त्रेणचसमासाद्यभूषयित्वास्वशक्तितः॥१७॥ऋत्विजेकन्यकादानंवितते यज्ञकर्मणि॥दै

वोनामविवाहोसौज्ञेयोदेवसमंततः॥१८॥दैवोढःकन्यकाज्ञातोमातापितृकुलोद्भवात्॥दशावरान्दशपरान्पुनात्यु
भयतोनरात्॥१९॥सहधर्मंचरतइत्युक्तायत्रकुमारिका॥प्रदीयतेविवाहोसौप्राजापत्यइतिस्मृतः॥२०॥अन्यच्च
पिविवाहेषुधर्मस्याचरणंमहत्॥यद्यप्युक्तयथाप्यत्रविशेषोस्तिगृहाश्रमात्॥२१॥आश्रमांतरसंप्राप्तिनिषेधार्थं
निगद्यते॥नरात्रतस्यांजीवत्यांविवाहस्यपरिग्रहः॥२२॥आश्रमांतरयोगेवामृतायांभवतःश्रुतौ॥प्राजापत्यविवा
होढवधूपुत्रसयंप्रजात्॥२३॥अष्टावरान्दशपरान्पुनात्युभयतोनरान्॥यत्रगोमिथुनंदत्वाप्रदातृभ्यःकुमारि
का॥२४॥उद्वहेदार्षजामासौविवाहोऋषिसंमतः॥तस्यांजातसुतोमातुःपितुश्चकुलसंभवात्॥२५॥सप्तावरात्स
प्तपरान्पुनात्युभयतोनरान्॥यत्रकन्यावरौछन्नकृत्वाश्रमयमादितः॥२६॥जायेतेतिवावेतिपश्चाद्वंधुर्जनेर
पि॥अनुज्ञातोछनोछनोद्वाहोभवतीविधिपूर्वकं॥२७॥सागंधर्वोविवाहस्यात्पक्षस्त्रियसेवितः॥यत्रोपतोष्य
वितेनदातृकामोयमन्यते॥२८॥आसुरोनामविज्ञेयोविवाहःसबहिःश्रुतः॥यस्मुमुक्षुप्रमनेवाकन्यायारक्षके
नरः॥२९॥चौर्योदयहरेत्कन्यांपैशाचोनामसोधमः॥यस्मिन्बलमुपाश्रित्यमहायैःसहमाधकः॥३०॥संमत्व

कन्याबंधुभ्योरक्षोपिययाबलं॥हत्वाभित्वाचशीर्षाणिरुदद्भ्योरुदतींहरेत्॥३१॥सराक्षसोविवाहस्यात्पापक्षत्रि
यशीर्षतः॥ब्राह्मप्रजापतिश्चैवदैवआर्षसएववा॥३२॥एतेविवाहमुख्याश्चवैब्राह्मणानांप्रकीर्तितः॥गांधर्वराक्षसा
श्चैवक्षत्रियाणांप्रकीर्तिताः॥३३॥आसुरश्चैववैश्यानांपैशाचःसर्वगर्हितः॥प्राजापत्यंब्रह्मदेवर्षेसंज्ञाःकालेषूक्ते ३७
षेवकार्योदिविवाहः॥३४॥गांधर्वःस्यासुरोराक्षसारव्यःपैशाचोवासर्वकालंविधेयः॥३५॥ ॥इतिश्रीनर्कीये
अष्टौविवाहः॥ ॥पंचांगशुद्धिदिवसेचंद्रताराबलान्वितैः॥विवाहमेस्योदयेवाकन्यावरणमाचरेत्॥१॥आ
लोड्यज्योतिषंशास्त्रंलग्नाशाद्दृहमीक्षणं॥यस्मिन्कालप्रदेयानिकन्यानविधीयते॥२॥शुक्लांबरेगुरुवाद्यै
र्विप्राशीर्वचनैःसह॥गच्छेच्चकन्यकागेहेवरःप्रणवपूर्वकं॥३॥तदाकुर्यात्पितातस्याःप्रदानंप्रीतिपूर्वकं॥
कुलशीलवपोरूपविद्यादृतायच॥४॥वराय रूपसंयुक्तांकन्यांदद्याद्यवीयसीं॥संपूज्यप्रार्थयित्वाच्श
चीदेवीगुणाश्रयां॥५॥त्रैलोक्यवल्लभांदिव्यांगंधमाल्यांबरान्वितां॥सर्वलक्षणसंयुक्तांसर्वाभरणभूषितां
॥६॥अनर्घ्यमणिमालाभिर्भासयंतींदिशंबरां॥विलसंतींसहस्रौघैःसेव्यमानामहर्निशं॥७॥एवंविधांकुमा ३७

रीमापृच्छांतेप्रार्थयेदिति॥देवेंद्राणिनमस्तुभ्यंदेवेंद्रप्रियभामिनि॥८॥विवाहंभाग्यमारोग्यंपुत्रलाभंचदेहिमे॥ ॥अ
थमधुपर्कविधिः॥ ॥पुण्येमुहूर्तेकुर्वीतविवाहंविधिवज्ज्ञः॥तत्राभ्युदयिकंश्राद्धंकुर्यात्तस्मिंश्चवाचयेत्॥१
॥अपरेद्युःकृतस्नातोधृतधौतांबरद्वयः॥भूषितोगंधमाल्याद्यैर्वंदिताभीष्टदेवताः॥२॥ब्राह्मणान्भोजयित्वा
तैःकृतपुण्याहवाचनः॥कृतकौतुकबंधश्चमित्रबांधवसंयुतः॥३॥यानेनयथाहेमारुह्ययातव्यंचवधूगृहं॥
तस्याद्वारादृहिस्थित्वाप्राङ्मुखोभिमुखागतैः॥४॥प्रदीपपूर्णकुंभादिपाणिभिर्नियताग्रनैः॥कृतात्मानमनो
गेहंप्रविशेत्सहबंधुभिः॥५॥मधुनासर्पिषावापिसुसंपक्वंभवेद्दधि॥मधुपर्कइतिप्राज्ञैर्योज्ञकैःसोभिधीय
ते॥६॥मधुपर्कंततोदद्याद्वरायसमवधूपिता॥६॥तत्रदद्यादासनंदद्याद्कूर्चंदर्भैर्विनिर्मितं॥वरायविष्टरइतित्रि
रुच्चार्यवरोप्यथ॥७॥अहंवर्ष्मसज्ञातानामित्याद्यासिलिकीमृदं॥उच्चार्योपविशास्मिन्नुदगग्रेतुकूर्चके॥८
॥अथवाऽक्ष्मयापदाभ्यांकूर्चमासीनपूर्ववत्॥निवेद्ययंस्त्रिभिःपाद्यमित्यद्भिर्मधुपर्कदः॥९॥प्रक्षालयेद्वरस्या
ग्रिंदक्षिणंप्रागथोत्तरं॥वरोथलौकिकंतोयमाचम्यात्रिर्निवेदितं॥१०॥आदायाचमनीयांशंतस्मादुद्धृत्यकिं

कन्याबंधुभ्योरक्षोपिययाबलं॥हत्वाभित्वाचशीर्षाणिरुदद्योरुदतींहरेत्॥३१॥सराक्षसोविवाहस्यात्यापक्षत्रियशीर्षतः॥ब्राह्मप्रजापतिश्चैवदैवआर्षसएववा॥३२॥एतेविवाहमुख्यावैब्राह्मणानांप्रकीर्तितः॥गांधर्वराक्षसाश्चैवक्षत्रियाणांप्रकीर्तिताः॥३३॥आसुरश्चैववैश्यानांपैशाचःसर्वगर्हितः॥प्राजापत्यंब्रह्मदेवर्षसंज्ञाःकालेषूक्तेषेवकार्योदिविवाहः॥३४॥गांधर्वःस्यासुरोराक्षसास्व्यःपैशाचोवासर्वकालंविधेयः॥३५॥ ॥इतिशौनकीयेअष्टौविवाहः॥ ॥पंचांगशुद्धिदिवसेचंद्रताराबलान्वितैः॥विवाहमेस्योदयेवाकन्यावरणमाचरेत्॥१॥आलोड्यज्योतिषंशास्त्रंलग्नाशाहृहमीक्षणं॥यस्मिन्कालप्रदेयानिकन्यानविधीयते॥२॥शुक्लांबरेगृहीत्वाद्यैर्विप्राशीर्वचनैःसह॥गच्छेच्चकन्यकागेहेवरःप्रणवपूर्वकं॥३॥तदाकुर्यात्पितातस्याःप्रदानंप्रीतिपूर्वकं॥कुलशीलवपोरूपवृत्तिविद्यावृतायच॥४॥वराययरूपसंयुक्तांकन्यांदद्याद्यवीयसीं॥संपूज्यप्रार्थयित्वाचशचीदेवीगुणाश्रयां॥५॥त्रैलोक्यवल्लभांदिव्यांगंधमाल्यांबरान्वितां॥सर्वलक्षणसंयुक्तांसर्वाभरणभूषितां॥६॥अनर्घ्यमणिमालाभिर्भासयंतींदिशांवरां॥विलसंतींसहस्रांथैःसेव्यमानामहर्निशं॥७॥एवंविधांकुमा ३७

रीमापृच्छांतेप्रार्थयेदिति॥देवेंद्राणित्वमस्मभ्यंदेवेंद्रप्रियभामिनि॥८॥विवाहंभाग्यमारोग्यंपुत्रलाभंचदेहिमे॥ ॥अथमधुपर्कविधिः॥ ॥पुण्येमुहूर्तेकुर्वीतविवाहंविधिवत्॥ज्ञः॥तत्राभ्युदयिकंश्राद्धंकुर्यात्तस्मिंश्चवाचयेत्॥१॥अपरेद्युःकृतस्नातोधृतधौतांबरद्वयः॥भूषितोगंधमाल्याद्यैर्वंदिताभीष्टदेवताः॥२॥ब्राह्मणान्भोजयित्वातैःकृतपुण्याहवाचनः॥कृतकौतुकबंधश्चमित्रबांधवसंयुतः॥३॥यानंयथार्हमारुह्ययातव्यंचवधूगृहं॥तस्याद्वारद्वहिस्थित्वाप्राङ्मुखोभिमुखागतैः॥४॥प्रदीपपूर्णकुंभादिपाणिभिर्नियताज्ञनैः॥कृतात्मानमनोगेहंप्रविशेत्सहबंधुभिः॥५॥मधुनासर्पिषावापिसुसंपक्वंभवेद्दधि॥मधुपर्कइतिप्राज्ञैर्योज्ञकैःसोभिधीयते॥६॥मधुपर्कंततोदद्याद्वयोरग्रेवधूपिता॥६॥तत्रदासनंदद्याकूर्चंदर्भैर्विनिर्मितं॥वरायविष्टरइतित्रिरुच्चार्यवरोप्यथ॥७॥अहंवर्ष्मसज्ञातानामित्याघासिलिकीमृचं॥उच्चार्योपविशत्तस्मिन्नुदगग्रेतुकूर्चके॥८॥अथवाक्रम्यपादाभ्यांकूर्चमासीतपूर्ववत्॥निवेद्ययंस्त्रिभिःपाद्यमित्यद्भिर्मधुपर्कदः॥९॥प्रक्षालयेद्वरस्यापिदक्षिणंप्राग्यथोत्तरं॥वरोथलौकिकंतोयमाचम्यात्रिर्निवेदितं॥१०॥आदायाचमनीयांशंतस्मादुद्धृत्यकिं

चत॥ अमृतोपस्तरणमसीत्युच्चार्यैवतुनत्पिबेत्॥११॥पीनशुद्ध्यर्थमाचम्यलौकिकंसलिलंततः॥मधुपर्कमवे
क्षेतपूर्ववद्विधिर्तिवेदयेत्॥१२॥आनीयमानंमागेस्यंमित्रस्यत्वेतिमंत्रतः॥देवस्यत्वेतियजुषाजनिनाप्रतिगृह्यतं
॥१३॥मधुवाताऋतायतेत्याद्यैतृचमुदीरयेत्॥वीक्ष्याञ्जलिस्थमेवायतत्पुनर्दक्षिणेानरे॥१४॥हस्तेनिधायतं
गुष्ठानासिकाभ्यांप्रदक्षिणं॥त्रिरालोड्यततोमंत्रैर्वसवस्त्वादिकैश्चतं॥१५॥किंचिच्छित्वाप्रतिदिशंततोमध्या
च्चकिंचन॥आदायभूतेभ्यस्त्वेतिमंत्रमुच्चात्रिरुक्षिपेत्॥१६॥मंत्रस्योक्षेपणस्यापित्रिरभ्यासंत्वमाचरेत्॥त
तोविराजोदोहोमीत्याद्यैमंत्रत्रयंक्रमात्॥१७॥उक्तास्यमधुपर्कस्यकिंचित्किंचित्पिबेदथ॥प्रतिप्राशनमा
चामेल्लौकिकंचापिशुद्धये॥१८॥नसर्वंप्रपिबेत्तुनतृप्तिमपिभावयेत्॥मधुपर्कावशिष्टंचविप्रायादद्युरे
वाभवन्॥१९॥प्रदद्याद्ब्राह्मणालाभेप्रक्षिपेत्सलिलेपिवा॥स्वयंपिबेद्वानिःशेषमाचामेच्चयथापुनः॥२०॥अ
पिधानमसीत्यंतममृतेत्यादिकंयजुः॥उच्चायोचमनीयांभःशेषंकिंचित्पिबेत्पुनः॥२१॥आचामेच्चयथापू
र्वंलौकिकंसलिलंततः॥सत्यंयशश्रीरित्याद्यैयजुषाचमनोदकं॥२२॥पीत्वानिःशेषमाचामेद्विःशुद्ध्यैलौकि ३८

कंजलं॥अथाचांतोदकायास्मैदातारंगांनिवेदयेत्॥२३॥हत्वानलेयसक्रुमिच्छेत्तांगांयदिवरस्वयं॥ततोहतो
मेपाप्मादियजुषोज्झपमाचरेत्॥२४॥पश्चादोंकरुतेत्येवंब्रूयाद्दायज्ञिहासति॥तदापिमातरुद्राणांदुहितेत्या
दिकामृचं॥२५॥अथोमुत्मृजतेत्येवंब्रूयादोमुत्सृष्टंपूर्वकं॥दातायंगंधमाल्याद्यैर्विधितोभ्यर्चयेद्वरं॥२६॥पश्चा
नेनसहायांतांस्तद्धूपनपिपूजयेत्॥२७॥ ॥इतिश्रौनकीयेमधुपर्कः॥ ॥नानाविधाजनपदाग्राम्याश्चोद्वाह
कर्मणि॥क्रीयंतेलौकिकाधर्मातेषुस्वकुलपोरुषैः॥१॥पूर्वैरनुष्ठितान्कृत्वाकुर्योदारपरिग्रहः॥सर्वेसाधारणंक
र्मयतुनावदिहोच्यते॥२॥तत्रप्रदेशेकस्मिंश्चिन्नद्धूपरिकल्पिते॥विष्टरैःप्राङ्मुखःसम्यगासित्वाम्बरणोस्वयं
॥३॥प्रक्षाल्याचम्यकृतप्राणायामःसमाहितः॥उपलिप्यततोलिख्यस्थंडिलेग्निंनिधायच॥४॥पश्चादग्नेः
प्रतिष्ठाप्यपेषणीमश्मनिर्मितां॥प्रागुत्तरेचसंस्थाप्यपूर्णंकुंभमथोवरः॥उत्थाप्यप्राङ्मुखस्थित्वाप्रत्यगुत्तरतोन
लात॥तदानिमात्मनादर्शंनृतनंचासनद्वयं॥६॥वसित्वावाससलिलंभूषितांकुसुमादिभिः॥प्रत्यङ्मुखप्राङ्मु
खीतास्थित्वामात्ममसीपतः॥७॥कन्यकामात्मगृह्यीतदत्तापित्रादिभिर्वरः॥कन्यादानप्रकारश्चपूर्वोक्तरि

नउच्यते॥८॥वरस्याभिमुखंस्थित्वाकन्यायाःप्रतिपादिकः॥चतुर्थ्यंतंवरस्योक्त्वानामंतद्वोत्रपूर्वकं॥९॥ततः संहत्यकर्मभ्यइत्युच्चार्यततःपरं॥पाद्यंगृह्णीतिवैद्यचार्यप्रतिपूर्वंततःपरं॥१०॥वरस्यहस्तंयोदद्याद्द्वितीयेन ज्ञानधिः॥तद्यथागाग्र्यगोत्रायपरमेश्वरशर्मणे॥११॥आत्रेयगोत्रप्रभवांपावतीप्रददाम्यहं॥कन्यासहस्रकर्मभ्यःकरोतिप्रतिपादितां॥१२॥कन्यकादानकर्मैवमाचरंतिमनीषिणः॥विभवानुगुणंक्षेत्रंसुवर्णंरजतादिके॥१३॥सर्वैर्विहितमंत्रैश्चकालेनानुसहोदकं॥ततोमंगलसूत्रंचध्यात्वाभिष्टंचदेवतां॥१४॥बध्वाकंठप्रदेशस्याद्भूषणानिचशक्तितः॥कन्यकांप्रतिगृह्यैववरःपूर्ववदासने॥१५॥तत्रैवोपविशेत्पश्चात्तांवधूमातुलादिकः॥सज्ञेनपरिगृह्याग्नेरुत्तरेणवरस्यतु॥१६॥पश्चिमेनपथानीत्वातस्मिन्नेववरासने॥वरस्यदक्षिणेपार्श्वेप्राङ्मुखीमुपवेशयेत्॥१७॥समाधायपुरस्तत्रमन्वाधानादिकंक्रमात्॥प्रणीतासादनांतंतुविभायाथविभावसोः॥१८॥उदक्यवस्थितालाजान्विन्यस्याथाज्यसंस्कृतिः॥प्रक्रम्यकर्मनिर्वाप्यलाजनिधानांतविधायच॥१९॥ततोवधूकरस्पृष्टस्रुवेधाधानपूर्वकं॥पुरस्तात्तत्रशेषंतमाज्यभागविवर्जितं॥२०॥ततःप्रधानहोमाश्चकुर्यादाज्येन ३९.

नत्रतु॥पूर्ववत्कृत्वाग्नआयूंषित्यादिमंत्रैस्त्रिभिःक्रमात्॥२१॥त्वमर्यमाचतुर्थ्यंचपंचमीतुप्रजायते॥व्यस्ताभिश्चसमस्ताभिःकृत्वाकुर्यात्चतुष्टयं॥२२॥अथोत्थायवरोवध्वाप्राङ्मुखापुरतःस्वयं॥प्रतीच्याभिमुखस्तिष्ठेन्नासिकायाःकराग्रकं॥२३॥दक्षिणंदक्षिणेनैवपाणीनांगुष्ठसंयुता॥गृभ्णामितिऋचामम्यक्गृहीत्वोत्थायतांवधूं॥२४॥प्राङ्मुखंसमवस्थाप्यक्षालयित्वाथतत्करौ॥कारयेत्तांजलीताभ्यांतस्मिंश्चाज्यंस्रुवेणतु॥२५॥उपसीर्यवरस्तिष्ठेत्परिगृह्यतमंजलिं॥तस्यस्तत्रांजलौभ्राताभ्रातातल्लाजानेववा॥२६॥शूर्पोंजलिनावाद्यालाजानिष्ठद्विरावपेत्॥पंचावत्तिवरस्याथैवतोलाजात्रिरावपेत्॥२७॥वरोथपूर्वंभूपेस्यात्लाजात्यत्यभिघारयेतु॥अंजलिस्थानवनाश्चैत्यश्चात्यभिघारयेत्॥२८॥सर्वत्रैषोदानस्यप्रकारःपरिगृह्यतां॥वरोथार्यमणंत्वादेवीमंत्रवधूर्यमीरयेत्॥२९॥वधूस्वांजलिविच्छेदमकुर्वाणस्रुवेणतां॥लाजामंजलिपार्श्वेनजुहुयादवधानतः॥३०॥एवमेववधूपाणीगृहीत्वापूर्ववद्वरः॥अश्मानंवर्जयित्वाग्निमुदकुंभादिसंयुतं॥३१॥प्रदक्षिणंपरिणयन्वधूमग्नेस्त्वयेत्रेनेत॥अमोहमस्मिसात्वंसेत्यादिमंत्रमुदीरयेत्॥३२॥इममश्मानमित्यादिमंत्रमुत्कावरोवधूंअ

श्मानमारोप्यपुनर्लाजाहोमंसमाचरेत्॥३३॥लाजाहोमोद्वितीयेपिपूर्ववत्प्रक्रियास्मृतः॥वरुणंत्वादिकंहोमं
मत्रएवतुविद्यते॥३४॥पूर्ववत्परिणीयाग्निमश्मानमधिरोप्यच॥तृतीयवयमपिलाजानांहोमंपूर्ववदाचरेत
॥३५॥मंत्रोत्रपूषणन्त्वादिसर्वमेवयथापुरंपरिणीयतयैवाग्निमश्मानंचाधिरोपयन्॥३६॥कृतावशिष्टलाजानां
वधूस्वाभिमुखंततः॥सूर्यप्रेषेणवजुहुयात्तूष्णींनिरविशेषतः॥३७॥तस्यांतूष्णींतुजुहुत्यांवरोध्यायन्प्रजापतिं॥ऊ
र्णासूत्रेणयद्यस्यालेशपक्षस्यपार्श्वयोः॥३८॥शिरोबध्नेतदाप्रत्यामुंचामीत्यृचांतयोः॥शिरवादक्षिणपार्श्वे
स्यांविमुंचेच्चोत्तराऋचा॥३९॥प्रेतोमुंचांम्यादिकयाविमुंच्येदुत्तरांशिरवा॥अथानांपूर्वमार्गेणपरिगृह्यवधूवरः
॥४०॥अग्निःपूर्वोत्तरंदेशंनीत्वास्याःपुरोब्रजेत॥इषएकपदीत्याद्यमुक्तामंत्रससर्वकं॥४१॥उपरिष्टात्ननंतत्र
विदधीतयथाविधिः॥यस्मिन्कालेविहन्यस्याद्वज्न्यांयदिवादिवा॥४२॥तत्रहोममुपक्रम्यप्राग्विवाहसमापन
नात्॥वधूर्वोद्वियमेकृत्वावर्तेतावहितासति॥४३॥निवृत्तेतुविवाहेतांवधूंध्रुवमरुंधति॥सप्तर्षीञ्चक्षयेत्पश्चा
द्ध्रुवंतुमशकृतः॥४४॥वध्वर्थेजीवपत्यादिवाक्यंचाद्याहरेद्बुधः॥अथरक्षविवाहाग्नेकारयित्वाविधानतः

॥४५॥ततोभिवंदनासीनवध्वसंधंद्विजातिभिः॥रूपमाणंसहाग्नीभिरक्षतार्गेपमंगलं॥४६॥तत्रप्रदेशकस्मिंश्चि
दुपलेपनपूर्वकं॥विधायस्थंडिलंतस्मिन्विवाहाग्निनिधायच॥४७॥ततोग्नेःपश्चिमेदेशेप्राग्ग्रीवोपरिलोमिकां
॥त्वमानडुहावध्वासमास्तया॥४८॥उपवेश्यवधूंतत्रततोन्वाधानपूर्वकं॥अनुयाजनिधानांतंपुनस्तेत्रनि
धायच॥४९॥अन्वारब्धस्ततोवध्वायदिधाधानपूर्वकं॥पुरस्तात्तंत्रशेषंतंदिधायजुहुयाततः॥५०॥अनःप्र
जामित्यादिभिर्ऋग्भिश्चतस्रभिर्घृतं॥ततःप्रत्यृचमित्युक्तेमंत्रोक्तेनलेहविः॥५१॥प्रक्षिप्यपश्चात्स्वाहेतिशा
ब्दहोतासमीरयेत्॥ततःसमंजंस्त्वित्याद्यमृचमुक्तास्वयंदधिः॥५२॥किंचित्प्राश्यावशिष्टंचदधितोप्राशयेद
धुं॥अथवाजुहुतिशिष्टाभ्यांशेषेणोवोरसीउभे॥५३॥समंजंस्तवयैकर्चासस्यवयाअपिकर्मात्॥ततःसिष्टकृ
तादृर्ध्वंतंत्रंपरिसमापयेत्॥५४॥अतऊर्ध्वंत्रिरात्रंतौद्वादशाहमथापिवा॥शक्तिविस्यतथाब्देवाचरेतांदंपति
व्रतं॥५५॥अक्षारलवणाहारौभवेतांभूतलेशयौ॥शयेयातांसमावेक्षानकुर्योतांवधूवरौ॥५६॥व्रतेसमाप्तेवध्वा
श्चविवाहेममधेधनं॥वस्त्रंप्रदद्यात्ततस्मैब्राह्मणायविनिश्चितं॥५७॥सूर्योनाग्निरृचोयेनिशब्दार्थेसरतश्च

याः॥सत्येनोत्तप्तदीक्षातपसैब्राह्मणायविनिश्चितं॥५७॥सूर्योनाग्निरुच्यतेमित्रेत्याद्यारुचामारभ्ययारुचा॥
॥५८॥दिहिमोनोरमक्षतनेंद्रमित्याद्याःपुराभवि॥अधितास्निहोच्यतेसूर्यशब्देनसूरिभिः॥५९॥
ब्राह्मणांभोजयित्वातैःपुण्याहमथवाचयेत्॥दंपतीरोहिणीसोमौभूत्वाप्राप्यमिहेदिने॥६०॥दाक्षायणिय
ज्ञेयातांद्वितीयेदिवसेपितौ॥पूजयेतांमहादेवीगंधर्वाप्सरसेवतौ॥६१॥अग्निस्विहृतृतीयेदिपूजयेतांचक
ल्पिकां॥चतुर्थितौयजेयातांशंकरीमनवस्त्रियौ॥६२॥एवंव्रतीदीनकर्तुपूजायोदंपतीदनि॥चतुर्थेतैवदिवसे
र्घचयेब्राह्मणान्बहून्॥६३॥वस्त्रहेमादिभिश्चान्नतांबूलाद्यैःप्रदानतः॥आशीर्वादैर्बहुविधैश्चतुर्थेदोदतैः॥६४
॥इतिशौनकीयेविवाहः॥ ॥अथतृतीयविवाहः॥तृतीयेतुविवाहेतुसंप्राप्तेपुरुषस्यतु॥अर्ककन्याप्रदानार्थेआ
चार्यंकल्पयेत्पुरा॥१॥जीवितावामृतावापिवास्यभार्यादितीयच॥तृतीयंदोषहंत्रीचविवाहार्थेतृतीयके॥२॥
अर्कविवाहंवक्ष्यामिशौनकोहविधानतः॥अर्कसविधिमंगल्यतत्रस्वस्त्यादिवाचयेत्॥३॥नांदीश्राद्धंप्रकु
र्वीतस्थंडिलेमुपकल्पयेत्॥अर्कमभ्यर्चसौवर्श्चगंधपुष्पाक्षतादिभिः॥४॥स्वपंचिलकृतसद्वस्त्रमाल्यादि ४१

भिःसुभैः॥अर्कस्योनरदेशेतुसमन्वारभ्यएकया॥५॥उलूखलादिकंकुर्यादाघारांतमतःपरं॥आज्याकृतीचजु
हुयात्तंगोभिरनयैकया॥६॥यस्मैत्वंकामकामायेत्येकयर्चोनतःपरं॥व्यस्ताभिश्चसमस्ताभिःस्तवश्चस्विष्टकृद्ध
वेत्॥७॥परिषेचनपर्यंतमयाश्चेत्यादिभिःक्रमात्॥इतिशौनकीयेतृतीयविवाहः॥ ॥यस्मिन्नद्रिविवाहस्यात्ता
यमारभ्यतस्यतु॥परिचर्योविवाहाग्नेर्विदधीतस्वयंद्विजः॥१॥यदिरात्रौविवाहाग्निरुत्पन्नस्यानथासति॥उत्प
न्नस्योनरःस्याद्वःसायंपरिचरेदमुं॥२॥पत्नीकुमारःपुत्रीवाशिष्योवापियथाक्रमं॥पूर्वःपूर्वस्यचाभावेविद्ध्या
दुत्तरोनरः॥३॥तत्रोपयमनीयाग्निमुपक्लेपादिसंस्कृते॥देशेनिधायज्वलितंकृत्वापरिसमुह्यच॥४॥परिस्ती
र्यचपर्युक्ष्यगंधाद्यैःपरिपूज्यच॥अग्निहोत्रवदित्येतच्छौनकेनप्रपंचितं॥५॥पुनःपर्युक्ष्यचांगारानुद्गग्नेरपो
ह्यच॥होम्यानांदादशानांचपक्वमेतेनधिश्रयेत्॥६॥पयोयवागूःसर्पिश्चओदनंदधितंडुलाः॥सोमस्तिलंपयो
व्रीहीद्वादशैतेतिलायवाः॥७॥पयआदीनिचत्वारिदुःपक्वानिचयाद्विकाः॥दध्यादीनामपक्वानामधिश्रयणमि
ष्यते॥८॥दर्भेणसर्वंज्वलयेदपक्वंपक्वमेवच॥अधिश्रितेस्रुवेणायःपरिषिंचेत्तवापिच॥९॥पुनस्त्रिज्वलताने

नपरीत्यपरिहृत्यतत्॥उदक्कूर्पेनिवोह्यास्यांगारानतिसृज्यच॥१०॥अग्नेःपश्चात्तृणेष्वेवनिधायसमिधासह।ने
ध्मेकंसंस्रुतंचगृहीत्वासायमग्नये॥११॥स्वाहेतिमंत्रमुच्चायेकुर्वेतप्रथमाकृतिं॥प्रातर्होमेचसूर्यायस्वाहेति
प्रथमाकृतिं॥१२॥विधायोभयतस्सृष्मीद्वितीयाकृतिमाचरेत्॥तत्रप्रजापतिंध्यायेदुभयत्राप्यविस्मरन्॥१३॥
प्रागुदगुत्तरतोवाप्राज्ञापत्यांचभूयसीं॥असंसृष्टांप्रथमयास्वाहेतिजुहुयादथ॥१४॥स्रुवेणजुहुयाद्द्रव्यंस
र्पिरादिद्रवात्मकं॥पाणिनादक्षिणेनैवजुहुयादंगुलैर्दृढैः॥१५॥एषामभावेद्रव्याणांजुहुयाद्धीहिभिर्यवैः॥ति
लैर्वाविकृतैःकुर्योत्पुनःपरिसमूहनं॥१६॥परिसमुह्यचपर्युक्ष्याप्युपतिष्ठेदविमुंचन्॥अग्नेसूक्तेश्वेसौर्यैश्चप्रा
जापत्येश्चनित्यशः॥१७॥अग्निंप्रजापतिंसायंप्रातःसूर्यंप्रजापतिं॥भग्नआयूंषितिसृभिर्द्वाभ्यामग्नेत्वमित्य
था॥१८॥सूर्योनोदृतिमंत्रेणत्युदुत्यंचद्वितीयया॥तृतीययाचित्रमितिनमोमित्रस्यचान्यया॥१९॥प्रजापत
तेनत्वदेतंतुतन्वंद्वितीयया॥हिरण्यगर्भःसमितिउपतिष्ठेदुताशनं॥२०॥सौर्यैवैश्वानरीयैर्वासमस्येसति
पंचभिः॥द्विदैवत्यंहविष्यांतमितिसूर्योग्निदैवतं॥२१॥यावज्जीवंपरिचरेद्दैवमौपासनंगृही॥ ॥इतिशौनकी ४२

यैनित्याग्निपरिचरणविधिः॥ ॥अथनित्यहोमकालातिक्रमप्रायश्चित्तविधिः॥ ॥जायत्येवानतेहोमावतिक्रामेद
दून्यपि॥तदाहृत्याज्यसंस्कारंयथोक्तविधिनाततः॥१॥आज्यंचतुर्गृहीत्वैतत्स्रुवेणप्राकृतसुचिः॥उत्कामंत्रम
नाज्योतिर्जुषतामिनिपूर्ववत्॥२॥हुत्वासकृदतीतांश्चहोमान्हुत्वायथाक्रमं॥पश्चात्स्वकालहोमंचविदधीतयथा
पुरा॥३॥प्रायश्चित्तमिदंकेचित्प्रतिहोमंव्यतिक्रमं॥स्मृतिचंद्रिकायां॥कालांतरेषुहोमेषुउत्तरेष्वागमेषुच॥४
॥कालातीतानिहुत्वैवउत्तराणिसमापयेत्॥अतीतान्यनुक्रम्यउत्तराणिसमापयेत्॥५॥नदेवानपिपित्र्यश्च
नतदिस्रुपतिष्ठंते॥आचार्यस्मृतौ॥एथक्पर्यागृहीतास्रुकतेदाकृतिमाखिलाः॥इतिनित्याग्निहोत्रिनद्विप्र प
रिक्षीये॥अथशौनकः॥अतीतहोमान्हुत्वादौकालहोमंततश्चरेत्॥७॥प्रतिहोमंविस्मृत्वाकुर्योत्परिसमूहनं॥
पर्युक्षणंचेत्युक्तोयमौपासनविधिःक्रमात्॥नाप्रोषितेतुयदापत्नीयदिग्रामांतरंव्रजेत्॥होमकालयतिक्रा
म्त्यानसदोषेणयुज्यतइति॥९॥इतिशौनकीयेसमारोपणविधिः॥ ॥अथप्रयाणाद्यापत्नुसमारोपणमुच्य
ते॥अरण्याग्निस्त्वेवगृह्यस्था——नेयथाविधिः॥अग्नौप्रज्वलितेगृह्येप्रतपेदरणीद्वयं॥१॥समिधंवापिअ

यंतेयोनिर्ऋत्वियइत्यृच॥यातेअग्नयइत्येतिपाणिनायुगपत्तपेत्॥२॥आपद्येवसमारोप्यततःप्रत्यवरोहयेत्॥अथारण्योसमारूढामरणीभ्यामथात्मनः॥३॥प्रत्यवरोहत्यनपाच्यात्मारूढंततस्वसन्॥आत्मारूढाग्निनादग्ध्वौलौकिकाग्नाहचानया॥४॥समिधारूढमग्निंतुलौकिकाग्नाभूचानया॥समिधंतंसमाध्यायकालेहोमंसमाचरेत्॥५॥अरण्यात्मसमित्स्वग्निवारूढासंप्रणश्यति॥ऊर्ध्वेद्वादशरात्रंतुपुनराधानमर्हसि॥६॥अवीक्षद्वादशरात्राच्चचांडालंपतितादिभिः॥स्पृष्टेनष्टेग्निनारूढात्सरण्यात्मसमीत्मुनः॥७॥अरण्यात्मसमित्स्वग्निसमारोहावधिःक्रमात्॥एषांत्रयाणांपक्षाणांपूर्वेपूर्वेप्रशस्यते॥८॥अथशानकीयेप्रवासगमने॥॥प्रोष्यकार्यवशाद्वेश्मपुनःप्रत्यावतोगृहे॥मंत्रग्रामाविभीतइत्याद्यैरिषदंतकं॥९॥जपित्वाथसमीक्षेथबह्निद्वौस्थिरौतोगृहं॥तद्गृहानहमित्यादिमंत्रेणप्रविशेद्गृहं॥२॥प्रविश्यतुशिवंवाग्मंशंयोःशंयोरितीरयेत्॥इषित्वोतगतस्तत्रप्रपद्यासनमात्मनः॥३॥ज्येष्ठानुपूर्वेपुत्राणांप्रत्येकंसवेनःशिरः॥पाणिभ्यांपरिगृह्याथत्रिरुज्जिघ्रेज्जपेत्तथा॥४॥अंगादंगात्संभवसीत्येवमाद्यामृचेततः॥कुमारीणांचकर्मेदंविदध्यान्मंत्रवर्जितं॥ ४३

॥५॥अथाग्निविच्छेदः॥ ॥यदिकाष्ठाद्यभावेननष्टेवाग्निर्भवेन्नरः॥भस्मापनीययतनाद्धोमयेन्नोपलेपयेत्॥१॥उल्लिख्यचाग्निमाध्यादादायश्रोत्रियानलात्॥विनाशकालादाभ्यंपरस्माद्धोमकालतः॥२॥पूर्वेगृहीत्वुपवसेन्नत्रसंकल्पपूर्वकं॥होमकालेतुजुहुयाद्यथापूर्वेपतिस्थितः॥३॥गृहणीथरोगाद्यैरुपवसेन्नशक्नुयात्॥तदाप्रयोगमाश्रित्यतेतरीयप्रकल्पितं॥४॥अग्निंविहृत्यकाष्ठाद्यैस्त्रिःपरिसमुह्यच॥पारस्तीर्यचपर्युक्ष्यततोग्नेरुत्तरेकुशान्॥५॥आस्तीर्यतेषुक्षण्यासमयात्मादयेत्स्रुवं॥आज्यपात्रेणसंमार्गंतृणानिसहसादयेत्॥६॥कृत्वापवित्रेतुतयोर्मध्येग्रंथिंप्रकल्प्यच॥ततःप्रोक्षणपात्रंतुनिषिच्यसलिलंशुचिः॥७॥ताभ्यांतूष्णीत्रिरुत्पूयपवित्राभ्यांयथापुरं॥स्रुवाज्यपात्रेकृत्वात्रेहृत्वाप्रोक्ष्यत्रिरंभसा॥८॥आज्यस्थाल्यांनिषिच्याज्यंतस्याधिश्रयणादिकं॥हृत्वोद्वास्यानरेवङ्गेत्रिःस्रुचीमेवतत्पुनः॥९॥पुनराहारमुत्पूयपवित्राभ्यांततस्तुते॥पवित्रेग्रंथिमुन्मुच्यप्रोक्ष्याग्नेर्मंप्रहृत्यच॥१०॥परिषिच्यततोवह्निंसकृदेवसमंततः॥अलंकृत्यचपुष्पाद्यैःसंमृष्टेनस्रुवेणतु॥११॥आज्यंगृहीत्वायाश्चाग्नेस्त्वनभीत्येवमादिकं॥मंत्रमुक्त्वाविधायैकामाहुतिंतदनंतरं॥१२॥कुर्योद्दोपासनंहोमंयथा

पूर्वमतंद्रितः॥यद्वास्मच्छास्त्रविहितप्रयोगेणाज्यसंस्कृतिं॥१३॥कृत्वामंत्रमथाश्वाग्नेस्यनभीत्येवमादिकं॥उक्त्वाकु
त्वासकृत्यश्चाज्जुहुयाच्चयथापुरं॥१४॥ऊर्ध्वंचाष्टदिनेशस्मिन्द्वादशाहाद्यमित्यथ॥अहोरात्रानतिक्रामेत्तद्वास्मृतिषु
चोदितं॥१५॥उपपातकिनोयत्तुप्रायश्चित्तंविधायतत्॥पूर्वोक्तेनप्रकारेणाभिधायाग्निपरियहं॥अथगृह्यस्यनष्ट
मेंपुनराधानमुच्यते॥उपोष्यदंपतीदत्वाहोमद्रव्यंद्विजायते॥१॥द्रव्यंकिंचिद्यथाशक्तिंब्राह्मणायादितामग्नये
॥आदध्यादपराह्णेग्निमाधानद्रव्यसंज्ञितैः॥२॥सिकतापद्मपत्रंचवराहविहताचमृत्॥मृद्मास्वल्करंचोषाव
ल्मीकमृदश्वकराः॥३॥उदुंबराश्मनिहतंपर्णाश्वत्थविकंकता॥शम्यंकरास्तुविज्ञेयाआधानद्रव्यसंज्ञिताः॥४॥अ
ग्न्यायतनयेवानिपुनराधानकर्मणा॥निधायेषामलाभेतुयथाकालंनिधापयेत्॥५॥उपलिप्योल्लिखेद्वेदांसिक
तादिनिधायच॥इदंतएकमित्यग्नेसव्याहृतितयाहुते॥६॥तंत्रंकृत्वाज्यभागांतमन्वाधानादिकंततः॥चतुर्गृही
तमाज्यंतुजुहुयादियथाक्रमं॥७॥अग्नयेपवमानायाग्नयेपावकायच॥अग्नयेशुचयेचाप्यग्नयेपथिकृतेन
तः॥८॥अग्नयेतंतुमनइत्येतेभ्यःपंचाहुतीः॥सौविष्टकृतमारभ्यहोमशेषंसमापयेत्॥९॥इतिशौकीयेपुनराधा ४४

नं॥ ॥अथद्विभार्योसंधानंद्विभार्योग्निमंसर्गः॥ ॥अथाग्न्याधृत्वयोर्योगंसपत्नीभेदज्ञातयोः॥सहाधिकारसिध्य
र्थंभिहवस्यामिशौनकः॥१॥अप्रजोद्वादशेवर्षेस्त्रीप्रजाद्वादशोत्सजेत्॥मृतप्रजापंचदशेसद्यस्त्वप्रियवादिनी॥२
॥ततोन्यामुद्वहेत्कन्यांधर्मलोपभयात्स्वयं॥कृतेतत्रविवाहेचव्रतांतेतुपरेहनि॥३॥इष्टयकृत्स्थंडिलयोरग्नीस
माधाययथाविधिः॥तंत्रंकृत्वाज्यभागांतमन्वाधानादिकंततः॥४॥जुहुयात्पूर्वपत्न्यग्नेतयान्वारब्धयाहुतीः॥
अग्निमीळेपुरोहितंसूक्तेननवचेनतु॥५॥समिध्येनंसमोष्यायंतेयोनिरित्यृचा॥प्रत्यवरोहेत्यनयाकनिष्ठाग्नौ
निधायतां॥६॥आज्यभागांततंत्रादिकृत्वारभ्यतदादितः॥समन्वारब्धएताभ्यांपत्नीभ्यांजुहुयाद्धुतं॥७॥चतुर्गृही
तमेताभिर्ऋग्भिःषड्भिर्यथाक्रमं॥अग्नावग्निश्चरतीत्यग्निनाग्निःसमिध्यते॥८॥अग्नीदमितितिसृभिःपाहिनोऽ
ग्नएकया॥ततःसिष्टकृदारभ्यहोमशेषंसमापयेत्॥९॥गोयुग्मंदक्षिणादेयाश्रोत्रियायाहिताग्नये॥पत्न्या
रेकार्यादमृतादग्ध्वातेनैवतांपुनः॥१०॥आदिधीताग्न्युपासाद्यमाधानविधिनागृह्यविदुपत्नीकपक्षेतुज्येष्ठाचेत्सू
र्यमाग्निणी॥११॥तांदहेदग्निहोत्रेणपुनराधानमित्यथ॥कनिष्ठातुमृतापूर्वंदहेन्निर्मथ्यवह्निना॥१२॥निर्मथ्येनै

वसर्वोसामाहितेनलसूक्तके॥स्मार्तोस्विष्टकृतेनाग्निभिर्दग्धाएतांपत्नीसमंत्रिभिः॥१॥शिष्टंधेनोर्दहेत्कन्यांपुनश्चैवाग्नि
माहरेत्॥२॥पौर्णमासीतुसंप्राप्तायाविवाहादनंतरं॥ततःप्रक्रम्यकुर्वीतस्थालीपाकंतुपर्वसु॥३॥तत्रयद्यप्यमा
वास्याविवाहानंतरंपतेत्॥तथापिपौर्णमास्यादिस्थालीपाकक्रियास्मृता॥४॥उत्तरत्रदिनेकृत्वाप्रातरौपासनं
ततः॥तत्परिस्तरणाद्ध्वंप्रणीतासादनांतकं॥५॥तंत्रंपुनस्तनंसर्वंसमाचीर्णंयथाविधिः॥यद्धातद्दहरेवैतद्
न्वाधानंपुरःसनं॥६॥पुरस्तात्तंत्रमस्विलमाचरेदवधानतः॥चरुनिर्वपणंकुर्योत्पौर्णमास्यांपुरोग्नये॥७॥वि
र्वोपमग्नीषोमाभ्यामपिपश्चात्समाचरेत्॥निरुप्यत्वग्नयेपूर्वममावास्यातिथावपि॥८॥इंद्राग्नीभ्यांतुनिर्वोपं
पश्चात्कुर्याद्यथाविधि॥चरुनिर्वपणाद्ध्वंतत्रत्रेषंपुरस्तनं॥९॥विधायपूर्ववत्सर्वंहोमेतुसमुपस्थिते॥पौ
र्णमास्यांतुतंत्रेणजुहुयात्पूर्वमग्नये॥१०॥स्वाहेत्यथाग्नीषोमाभ्यांस्वाहेतिजुहुयाक्रमात्॥पूर्वंहुत्वाग्नयेस्वाहे
त्यमावास्यातिथौक्रमात्॥११॥पश्चादुदीर्यैंद्राग्निभ्यांस्वाहेतिजुहुयाक्रमात्॥अथापरिशतंत्रंचयथाविधिसमाप
येत्॥१२॥हुतशेषंहविर्यच्चदक्षिणात्रप्रकीर्तिताः॥स्थालीपाकमतिक्रामेद्यदितद्यत्रकुत्रचित्॥१३॥दिवसेतत्रक



र्तव्यमेतत्तुस्मार्तकर्मणः॥तत्रापियद्यतिक्रामेत्कार्यपर्वण्यनंतरे॥१३॥पयिहुत्वापूर्वंतुकर्तव्यंव्यवधानतः॥चरुनि
र्वपणंतत्रपूर्वंपयिहुतेग्नये॥१४॥अन्वाभ्योदेवताभ्यस्तुचरुपज्जुहुयाक्रमात्॥अन्यैतुपयिहुत्वोमंस्तंत्रंकर्ममे
तरे॥१५॥तंतुहुत्वापुरस्तंत्रंप्रणीतासादनांतकं॥निर्वापेत्प्रोक्षणेहुत्वाचरुंपयिहुतेग्नये॥१६॥अथोपरिशतंत्रं
चययथाविधिसमाप्यच॥अतिक्रांतंचकुर्वीतस्थालीपाकंयथापुरा॥१७॥वरोप्ययविवाहाग्निंनीत्वाज्ञस्त्रकमग्रतः
॥वधूंगृहीत्वाहस्तेननिर्गेत्यस्वगृहंनयेत्॥१८॥पूषात्तेतोनयत्वाद्यामृचमुच्चार्यतोवधूं॥आत्माधिकारसदृशंया
नमारोहयेतताः॥१९॥ब्राह्मण्याजीवपुत्रायाजीवपत्यश्चवेश्मनि॥विवाहरज्जतीमेतामावसेतांवधूवरौ॥२०॥देशां
तरेस्थंस्ववेश्मवधूंप्रापयिष्यतः॥वरस्ययदिनौतार्यानदीयदिसमापयेत्॥२१॥अश्मन्वतीरीयतेत्यस्याऋ
चोर्दनंतांवधूं॥आरोप्यप्रथमेनावमारोहेच्चवरस्वयं॥२२॥अत्राज्ञहामेत्याद्येनतंधर्वेनोत्तरेणतं॥नावोवरोहेत्ता
चेत्स्वज्ञनादरणादिना॥२३॥अश्रुमुंचेततांजीवंरुदतीमामृचंजपेत्॥मनोरमेषुदेशेषुदृक्षेषुचचतुष्पथे॥२४॥
शंळंज्नरुपंनिवसतोयस्मादीनांप्रशांतये॥माविदन्यरिपंथिनइत्याद्यांचक्रुंचंजपेत्॥२५॥मार्गस्थेषुनिवासे

सुवधूंपश्येतियोजनाः॥तदृष्टिदोषशांत्यर्थंप्रतिवीक्षेततांवरः॥२६॥सुमंगलीरियंवधूरिमामित्याघ्रचेज्जपेत्॥इत्यधिनि
स्वकेवेश्मवधूंप्रापैयतांवरः॥२७॥तयासहगृहद्वारप्रदेशेप्राङ्मुखस्थितः॥प्रदीपपूर्णकुंभादिपाणिभिर्वनिताजनैः॥
२८॥कृत्वाप्युद्गमनस्तत्रैतैःसंपतमयादृणं॥प्रदक्षिणाप्रक्रमणमनुभूयक्षणांतरं॥२९॥ततस्तांपूर्ववत्पाणौपरि
गृह्यवधूंवरः॥प्रवेशयेद्गृहंमिहप्रियमित्याघ्रचंब्रुवन्॥३०॥त्रिरात्रादित्रतेषेषुदंपत्योःशक्रपेक्षया॥अनुष्ठिते
त्वन्यतमेव्रतेयाचीतिमानिशा॥३१॥पुण्याहवाचनंतस्यांकारयित्वादिजैर्वरैः॥मुहूर्तेशोभनेगंधमाल्यादिभिर
लंकृतां॥३२॥उपगच्छेद्धूंयद्वाकामांतरसमुद्भवे॥उभयोरपिदंपत्योर्नक्षत्रानुगणेगुणैः॥३३॥मुद्देविवाह
नक्षत्रेरात्रौदोषविवर्जिते॥पुण्येमुहूर्तेपुण्याहंवाचयित्वाद्विजोत्तमैः॥३४॥अलंकृत्यमनोज्ञांतामुपगच्छेद्धूं
वरः॥ ॥शौनकोहंप्रवक्ष्यामिस्नंभबल्याख्यमुत्सवं॥पंचमेहनिकुर्वीतामभ्यंगस्नानपूर्वकं॥१॥ब्राह्मणैर्बंधु
भिःसार्धंपुण्याहंवाचयेत्ततः॥पूर्वेद्युरर्चितेकुंभेवसंतोदकपूरिते॥२॥वसंतंपूजयेत्तत्रध्यानाद्यैर्नकादिभिः॥ ४६
कनकारुणभासुरप्रमन्नहयवक्त्रंमदनस्यसाहचर्यंद्विभुजंधृतयत्नवप्रसूनभजतामिष्टमर्चयेद्वसंतं॥नै

वेद्यंचनिवेद्यैवंबलिंचैवसमर्चयेत्॥३॥स्नंभस्त्वथबलिंदद्यान्नानाभक्ष्याद्यविस्तरैः॥इत्थंसंपूज्यविधिनाअभिषे
कंचकारयेत्॥४॥पूर्वंकुंभेचमंत्रेण्यांभृंगुलीयकमुत्तमं॥क्षौनुकंचरयेत्तत्रदंपतीभ्यांप्रयत्नतः॥५॥वेदोक्तैर्वि
विधैर्मंत्रैरभिषेकंसमाचरेत्॥वसंतादिश्चसंप्रार्थ्यदिङ्नादिकुपतीनपि॥६॥ब्राह्मणैर्बंधुभिःसार्धंभिक्षं
चतज्जलं॥तत्रस्नंभबलिंसर्वेब्राह्मणेभ्योनिवेदयेत्॥७॥दक्षिणांचयथाशक्त्यादत्वाभुंजीतैःसह॥इत्थंस्नंभब
लिंकृत्वासर्वान्कामानवाप्नुयात्॥८॥ ॥श्रावण्यांपौर्णमास्यांश्रवणाकर्मसंज्ञितं॥कर्मकृत्वापुनःसर्पबलिंचा
स्यसमापयेत्॥१॥व्रीहीणांचयवानांचयेस्युःखंडनवर्जिताः॥तंस्नंदुलवस्नैःसत्याद्यसकुस्नैःकलशेनवा॥२॥
पूरयित्वायदर्वश्चबलीपक्षेयसाधिनी॥वैकंकतिस्रुचाकारंनिर्मोपोभयथथ॥३॥नवेशिक्येनिधायेतशि
क्यंकृपिनिवेशयेत्॥धानाश्चारंडिताकाराःसंपाद्याःप्रस्थिमात्रिकाः॥४॥तासांमध्येपृथक्कृत्वलौकिकेनैव
सर्पिषा॥अलंकृत्यविधानेनधानास्युःपात्रयोर्द्वयोः॥५॥एवंसंभारान्याहृत्यप्रत्यगस्तमितेरवौ॥सायंमोपास
नंकृत्वातत्रान्वाधानपूर्वकं॥६॥पूर्णेपात्रनिधानांतंनंत्रंकृत्वापुरस्तनं॥निर्वापकालेहविषःपुरोडाशस्यचोभयो

॥१॥व्रीहीन्निरूप्ययथाप्राप्तंनिधायप्रोक्षणंतथा॥अवहन्यपृथक्कृत्यतंदुलानथपा।कं॥८॥प्रज्वाल्यैकपार्श्वे
वचरोश्रपणमाचरेत्॥पार्श्वेन्यत्रपुरोडाशंश्रपयेदेककालकं॥९॥पुरोडाशार्थमन्यस्मिन्कृत्वानिर्वपणंपृथक्
ततश्चरुपुरोडाशौपचनेतयथापुरा॥१०॥यद्ययोरुभयोःपूर्वंहविरुद्वास्यबर्हिषि॥स्त्रीर्णनेःपश्चिमेन्यस्यपुरोडा
शमतःपरं॥११॥उद्वास्यपात्रेकस्मिंश्चिदंतर्धायततःपरं॥ययादृश्येकपात्रस्थंमनोदायघृतेभवेत्॥१२॥इध्माधा
नादिकंचाज्यभागहोमावसानकं॥अविशिष्टंपुरस्तेत्वा—थोहविषःशुचिः॥१३॥अवदायावदायाग्नेनयेत्याद्यं
चतुर्ऋचं॥क्रमात्पत्यृचकुत्वामय्येनपाणिना॥१४॥निधायदक्षिणेपाणावुपस्तरणमिघारणं॥उल्काच्युताय
भौमायस्वाहेतिजुहुयात्ततः॥१५॥अस्यसर्वंकृतत्वेननात्रद्विरवदानतः॥ ॥इतिशौनकीयेश्रवणाकर्मे॥ ॥ततः
सर्पबलिंहृत्वापूर्वंशिक्यंनिवेदितं॥दर्वेःसादायसंपूर्यमनुभिःकलशंहितं॥१॥तामुपादायनिष्क्रम्यप्राच्यां
दिशिनिवेशनात्॥ततःस्वभार्योपुंसोदेशेरण्यादिसंभवेत्॥२॥आसिच्यपुरतःपश्चात्सर्पदेवत्युपक्रमं॥सं
त्रंस्वाहेतमुच्चार्यदर्वेःसैर्यैरमनुभिः॥३॥सर्पेभ्योबलिमादायपेसर्पइतिपूर्वकं॥उपाकरोमीत्यंतंचमंत्र ४१

मुत्कानमन्वृतः॥४॥विधायसर्पानुद्दिश्यप्रदक्षिणमथोबलिं॥परीत्यपश्चिमेतस्माद्गृहंविश्यमहीतले॥६॥मंत्रंहि
मिषुरित्यंतंसर्पोमीत्येवमादिकं॥जपित्वाथध्रुवेत्येवमंबोध्यतदनंतरं॥६॥ज्येष्ठानुपूर्वंभार्योश्चसमस्तापरिदा
यतुं॥अथात्मनोपिमंत्रोनेपरिदानसमाचरेत्॥७॥आत्मनःपरिदानेतुध्रुवंमातरितीतरेत्॥दारापुत्रोगत्मनश्च
सूत्रहृद्वचनात्तथा॥८॥स्वयंकर्तृकमेतच्चकर्मणोदयमर्थतः॥अन्यकर्तृकपक्षेपियोधिकार्यत्रकर्मणि॥९॥
तस्यैवपरिदानेस्यात्तदर्धत्वेनकर्मणा॥बलिप्रक्षेपमारभ्यप्रागंतादस्यकर्मणः॥१०॥कर्तुर्बलेश्चमध्येतुनगच्छे
द्यत्रकुत्रचित्॥ ॥मार्गशीर्षस्यमासस्यपौर्णमास्यामथापिवा॥११॥तस्यपुरुकुचतुर्दश्यानाम्नाप्रत्यवरोहणं॥
करिष्यमाणंयत्कर्मततःप्रागिनउत्तरं॥१२॥कुर्वीतेप्रत्यवरोहोतंसायंप्रातरिमंबलिं॥तेनैवमंत्रेणतथापूर्वोक्ति
श्चमनुभिः॥१३॥अत्रोपवेशनंप्रत्यक्बलेर्मंत्रजपस्तथा॥नमस्कारश्चमंपेभ्यइदंसर्वंनिवर्तनं॥१४॥यदा
तत्रैवमयेतांत्मर्वोनेष्यतोबलिं॥सखायोपहरेदेवआचार्योकेचिदूचिरे॥१५॥इतिशौनकीयेसर्पबलिः॥ ॥
यापौर्णमास्याश्चपुंजीत्युक्तनक्षत्रयोगतः॥तस्यामाश्वयुजीकर्मत्येवमन्वर्थसंज्ञया॥१॥तत्कर्मग्रथितंतस्यप्र

योगोत्रनिबध्यते॥पूर्वेद्युरुपनेयाद्यौरलंकृत्यनिवेशनं॥२॥प्रभातकालेयस्नात्वाशुक्लांबरधरोभवेत्॥प्रातरौपास
नंकृत्वातस्मिन्नग्नौपुरस्तनः॥३॥अन्वाधानादिकंतंत्रंप्रणीतासादनावधि॥कृत्वाचपशुपत्यर्थंचरुमुक्तप्रकारतः
॥४॥पशवशेषतंत्रस्यमाज्यसंस्कारपूर्वकं॥आज्यभागांतमाचार्यस्तवदायचरुंततः॥५॥मंत्रमुच्चापशुपत
यइत्यादिजुहुयात्पुनः॥पुरःकृत्येत्यजुहुयुःशुचिवाससइत्यपि॥६॥होमस्यबर्हिःकृत्वाछुतेःपुत्रादयोपि
च॥स्नात्वाशुक्लांबरधरोभूत्वाप्रयतमानसः॥७॥अन्वारभेरंकतोरंमारन्वारंबुतदंतिके॥ऊनंमेपूर्यतांपूर्णमि
त्युपक्रमसंयुतं॥८॥एषातकायस्वाहेति——पर्येतमादितः॥उदीयोजलिनापश्चाज्जुहुयाच्चैषातकं॥९॥
अंजलौपाणियोगस्यविनियोगार्तिहापिच॥धानाहोमवदन्यस्माकर्त्तेपिस्तरणादिके॥१०॥क्षीरेणयद्धूतंमि
श्रंतंषातकउच्यते॥तत्सौविष्टकृताद्यर्धेतंत्रेपरिसमापयेत्॥११॥ ॥इतिशौनकीयेआश्वयुजीकर्म॥ ॥क
र्तुमाग्रयणेष्टीनामाहिताग्निर्नशक्नुयात्॥ऋत्विक्द्रव्यादिभावेनतस्यकालोपमुच्यते॥१॥प्रज्वाल्यगार्हप ३८
त्याग्निंतदन्वाधानपूर्वकं॥चरुश्रपणपर्यंतंतंत्रंकृत्वापुरस्तनं॥२॥पश्चादाहवनीयाग्निमपिप्रज्वाल्यतंतु॥

अन्वाधानंविधायाथकृत्वापरिसमूहनं॥३॥परिस्तीर्यचपर्युक्षामय्यतप्रियतादिभिः॥ततोग्नेर्गार्हपत्यस्ययमीद्या
द्धर्हिरादिकं॥४॥होमोपकरणंसर्वंसमादायपृथक्पृथक्॥अग्नेर्गार्हपत्यस्यपार्श्वेन्यस्ययथाक्रमं॥५॥तस्मि
न्गार्हपत्याग्नौपरिध्या धानपूर्वकं॥आज्यभागविधानोंतंपुरस्तंत्रेनिधायच॥६॥ततोवदाप्यवदानधर्मेणहृ
विषास्रुचिः॥मनूर्क्रतुभिरित्याद्यैस्त्रिभिर्मंत्रैर्यथाक्रमं॥७॥हुत्वास्विष्टकृतार्द्धंतंत्रंपरिसमापयेत्॥अनाहि
ताग्निरप्यग्निंविहृत्यौपासनंततः॥८॥स्थालीपाकप्रकारेणचरुंपक्त्वावदायच॥एतैरवत्रिभिर्मंत्रैर्हुत्वास्विष्ट
कृतादिकं॥९॥हुत्वोपरितनंतंत्रमथान्नपरिशेषितं॥वैश्वदेवावशिष्टंचपात्रेनिक्षिप्यकुत्रचित्॥१०॥तत्पात्रंमं
त्रमद्रिनंमव्येपाणौनिधायच॥तत्प्रज्ञापतयेत्वेतिमंत्रमुच्चार्यपाणिना॥११॥दक्षिणेनाभिमृज्याथभद्रान्नश्रेयआ
दिकं॥उच्चार्यमन्त्रंप्राश्यान्नमाचम्यद्विरंतर्द्रितः॥१२॥अमोसिप्राणतदेतंब्रवीमीत्येवमादिकं॥मंत्रमुच्चार्यहस्तेन
नाभिदेशंपरामृशेत्॥१३॥ ॥इतिशौनकीयेआग्रयणं॥तन्मलमासेपिकुर्यात्॥ ॥तथाचोक्तंकृत्वापरिशिष्टे॥अ
वषट्कारहोमाश्चपर्वचायग्रयणंतथा॥मलमासेपिकर्तव्यंकाम्यादृष्टिश्चवर्जयेत्॥१॥मार्गशीर्षस्यमासस्यपौ

र्णमास्यामथापिवा॥तस्यशुक्लचतुर्दश्यांनाम्नाप्रत्यवरोहणं॥२॥शास्त्रांतेषुहेमंतशब्दोयंदृयमुच्यते॥वर्षासु
वारिछिन्नस्यवेश्मनोलेपनादिभिः॥३॥कुर्योत्पुनर्नवीकारंपूर्वमेवावधानतः॥मृदश्वेनवकुंभ्यादेववारिमिश्रेण
शुद्धे॥४॥भिन्नानिरोपणार्थंचपरामृज्यावलेपनं॥छिद्रापिधानंतन्मृज्यतृणैस्तरणमुच्यते॥५॥निस्नस्योन्न
मनयस्यानदुपस्तरणंमतं॥एवमेतैर्नवीकृत्यनिवासलेपनादिभिः॥६॥करादेयन्नार्थस्याप्यहन्येवविशोधनं॥
कृत्वापन्चाहमेकंसंगतेत्वौपासनंमतं॥७॥विहृत्यकृत्वाथस्थालीपाकधर्मेणपायसं॥श्रपयित्वाचरुंहोमं
मयेसमुपस्थिते॥८॥अन्वारब्धस्वपुत्राद्यैरपश्चेतपदाग्रहि॥इत्यादिभ्यांखिलार्थाभ्यांमृग्भ्यांकृत्वायथोभ
यं॥९॥अथाभयन्नइत्याद्यंमंत्रंपश्यकृतानं॥जपेत्तचसुहेमंतशब्दस्यमनसाग्रयं॥१०॥संबुध्यंतस्य
कृत्वाथशिवोनःसुमनाभव॥इत्येतस्यापिमंत्रस्यमनसाजपमाचरेत्॥११॥पश्चिमेग्नेःपलाशाद्यैरथात्मश
यनोचितं॥शयीशोभनयास्त्रीयंतत्रासित्वायथासुखं॥१२॥जपेदृचमयस्योनापृथिवीत्येवमादिकं॥जपित्वा
तत्रभार्याभिःपुत्रैश्चसहसंगतः॥१३॥शयितोदङ्मुखप्राच्यशिशोर्दक्षिणपार्श्वतः॥यथावकाशमितरपुत्रा ४९

द्यास्तत्रशेरते॥१४॥अनुज्येष्ठशयीरंश्चगृहीणानंतरंसुतः॥शयानोसावतस्योनापृथिवीत्यादिकामृचं॥१५॥ज
पित्वोत्थायशयनादासत्वाप्राङ्मुखःसह॥अतोदेवाअवंत्वाद्यत्रिभिर्जपेत्समाहितः॥१६॥पाश्चादिशिदक्षिणाद
द्यात्तिस्रःप्राच्ययथाक्रमं॥पादासृचास्यानत्रीन्सर्वेजपेयुःसर्वेसंगताः॥१७॥संविश्यसंविश्योत्थायकुर्युःपश्चा
दिशंजपं॥अथचोत्थायशयनादक्षिणाप्रत्यगुत्तराः॥१८॥दिशःस्तिस्रःप्रतिदिशंप्रतीच्येवंयथाक्रमं॥जपेयु
रेतामेवर्चंसहस्तहृदयंवदितं॥१९॥संविश्यसंविश्योत्थायकुर्युःश्वाऽदिशंजपं॥ययोपदिष्टेनंत्रेचस्विष्टकृ
द्धोमवर्जितं॥२०॥विधायगत्रिंशेषंतुसंविशेयुर्यथापरं॥अथापरेद्युरुदितसूर्येसर्वेपिसंगताः॥२१॥सोयोःस
योनइत्याद्यानयास्वस्त्ययनानपि॥तयास्वस्तिनइत्यादियजेयुरवधानतः॥२२॥अथान्नंगुणवत्कृत्वास्वादु
व्यंजनसंयुतं॥ब्राह्मणान्भोजयित्वानैःपुण्याहमथवाचयेत्॥२३॥ ॥इतिशौनकीयेप्रत्यवरोहणे॥ ॥पूर्वे
द्युःप्रातरुत्थायहृणीतद्विजसत्तमान्॥निमंत्रयेतथाविप्रोविश्वेदेवार्यमादितः॥१॥ब्रह्मचर्यमनुष्ठेयमितिवे
दविदोविदुः॥अपरेद्युःकस्मिंश्चित्स्यतिदेशेपरिश्रिते॥२॥उपलिप्तेतिलाक्षिप्तादिक्षान्पूर्वंनिमंत्रितान्॥तत्रता

नासनेचेतालौकिकेभूपवेशयेत्॥३॥ततयोर्दक्षिणतोविप्रान्पित्रार्थानप्युदङ्मुखान्॥मंत्रयच्छृणुयाच्चेतन्नस्सु
श्रीभवेन्नदा॥४॥पित्रेतुहस्तेसर्वत्रप्राचीनावीतिनाभवेत्॥द्विजस्यदक्षिणंपाणिंस्वेनदक्षिणपाणिना॥५॥गृही
त्वामुकगोत्रस्यामुकसंज्ञस्यवामुके॥पुरूरवार्द्रवौचेतिसंज्ञान्याप्रथितावुभौ॥६॥उदितौपावेणआदेविश्वेदे
वौमनीषिभिः॥तस्मात्तदर्थंतयोर्वरणेसमुपस्थिते॥७॥तन्नामाविस्मरेन्नवंतयोर्वरणमाचरेत्॥अंगणाद्यक
देशेतुपरिमुंडेमहीतले॥८॥दक्षिणोदगवस्थेदेकुंडेवृत्तेप्रकल्पयेत्॥अद्भिर्गोमयमिश्रायविप्रक्षिपे
ततः॥९॥उदीच्यकुंडेप्रक्षिप्यप्राच्यमग्रेकुशद्वयं॥क्षिप्त्वावाक्षतपुष्पाणितःकुंडेचदक्षिणे॥१०॥दक्षिणा
ग्रेतुनिक्षिप्यकुशद्वयमतःपरं॥तिलान्विकीर्यचोदीच्यकुंडेदेवार्थविप्रयोः॥११॥पादानक्षतमिश्राभिरद्भिःप्र
क्षाल्येत्स्वयं॥विश्वेदेवास आगतशृणुतेत्याद्यवानयोः॥१२॥विश्वेदेवौसमावाह्यततःकुंडेनुदक्षिणे॥पादान्पि
त्रर्थविप्राणांप्रक्षाल्याग्रहयेत्पिन्दृत्॥१३॥उशंतस्त्वेत्यृगंतेषुपित्रादिषुयथाक्रमं॥एवंप्रक्षाल्यचरणांतांबूल
कुसुमामिषैः॥१४॥शृणुयात्पूर्ववच्चैतान्विश्वेरेवपुरःसरं॥प्रक्षालनंचपादानांयथापूर्वंसमाचरेत्॥१५॥दिरो

MEMORIAL

चांतस्मथाचांताआसनेस्वासनेचतान्॥अभोजनांतासर्वेषांस्यादेवासनआसनं॥१६॥एवंतुउपविष्टानांसंनिधानेद्वि
जन्मनां॥औपासनाग्निप्रज्वाल्यदर्भैःप्राग्दक्षिणाग्रकैः॥१७॥परिस्तीर्यततश्चात्रपात्रासादनपूर्वकं॥स्यातंत्रमिश्रा
धानांतेपितृयज्ञसमीरितं॥१८॥तदनुष्ठानसकलमविस्मृत्यर्थयथाविधिः॥ततःप्रदद्यात्पित्र्यैर्विप्रेभ्योवाय
थाक्रमं॥१९॥पित्रादीनांयथासंख्यंलोहाश्ममयमृन्मयं॥यद्यातेषुचलोहादिपैकद्रव्येणनिर्मितं॥२०॥पात्रांत्रि
तयमानीयतेषामग्रेनिधायच॥अंतर्धायांकुरेषुनिषिच्यापोद्यताःपुनः॥२१॥मंत्रेणशन्नोदेवीत्यादिकेनानु
मंत्र्यच॥तिलोसीत्यादिमंत्रेणप्रतिपात्रंतिलान्क्षिपेत्॥२२॥अपःप्रथमपात्रस्थाःस्वधार्घ्यइतिमंत्रतः॥निवेद्या
भिमुखंपूर्वंपित्र्यायद्विजन्मने॥२३॥तदद्यत्पितरिदंतेमितिमंत्रमुदीरयन्॥यादिव्याआपइत्यादिमंत्रमुच्चार्य
स्वेलकं॥२४॥आपोनुमात्रायेतास्यपाणेःप्राप्नुवतीर्यहं॥ततःपितामहायार्घ्यंयद्यादर्घ्यंद्विजन्मने॥२५॥द्वितीयत
स्यात्रतत्रैकंचिज्जलमादायपूर्ववत्॥तत्रेदंतेर्घ्यमित्येषपितामहपदादिकः॥२६॥मंत्रस्तुविद्यतेन्यनुमंत्रंपूर्ववदा
चरेत्॥तृतीयपात्रतःकिंचिज्जलमादायपूर्ववत्॥२७॥प्रपितामहशब्दादिमंदतेर्घ्यमितिब्रुवन्॥प्रपितामह

हविप्रायदयादर्घ्ययथापुरः॥२८॥पित्रादीनांत्रयाणांचैकमेवोपवेशयेत्॥तत्रोक्तेनप्रकारेणतस्मादेवपुनःपुनः
॥२९॥त्रीतप्युद्दिश्यपित्रादिनर्घ्योदद्याद्यथाक्रमं॥यद्येकैकपित्रेदेरेकैकमुपवेशयेत्॥३०॥ततःसंत्रेणसर्वेभ्यः
सकृदर्घ्यंनिवेदयेत्॥अर्घ्यंपूर्वोपविष्टायपूर्ववदत्वातःपरं॥३१॥उपवेश्यक्रमादर्घ्यमितरेभ्योपिनिर्दिशेत्॥दा
नमंत्रमविस्मृत्यप्रतिपद्विप्रमितीरयेत्॥३२॥आसिच्यप्रथमेपात्रेजलमुत्तरयोर्द्वयोः॥ताभिरद्भिमुखंसिंचेद्यदि
पुत्रमभीप्सति॥३३॥पात्रतन्तुतृतीयेनपात्रेणैवपिधायच॥तत्रस्थिततमाश्राद्धसमाप्तिनतुचालयेत्॥३४॥पात्र
स्याप्यविचाल्यत्वप्रतिपादनतत्परं॥यज्ञगाथाद्वयंप्रोक्तंमाचार्येणापितद्यथा॥३५॥नोद्धरेत्त्रयमंपात्रंपित्रृ
णामर्घ्यपातितं॥आहूतास्तत्रतिष्ठंतिपितरःश्वानकोब्रवीत्॥३६॥अभोज्यंतद्भवेच्छ्राद्धंकुर्द्धैःपितृगणैर्गतैः॥एत
स्मिन्नवकालेतानाधमाल्यादिभिर्द्विजान्॥३७॥श्राद्धांगंधूपदीपंचवसनाभरणादिकं॥तेभ्यःप्रदद्यात्तश्रा
द्धंविश्वेदेवपुरःसरं॥३८॥स्थालीपाकादयोहृत्यकिंचिदन्नंघृतेनच॥सिक्त्वादानधर्मेणलवदायचमेक्षणे॥ ५१
३९॥अभ्यनुज्ञाप्यतान्विप्रान्पित्राद्यर्थात्समीपगात्॥अग्नौकरिष्येकरवैकरवाणीतिवादेत्॥४०॥तेभिप्रस

भिज्ञानंतोवदेयुःक्रियतामिति॥कुरुष्वकुर्वित्यपिवाततोग्नौजुहुयात्पुनः॥४१॥सोमायेत्यादिमंत्रेणनमोंतेतत
तोग्नये॥इत्यादिनातनौतेनयदिवामंत्रयोर्द्वयं॥४२॥इदंस्वाहांतमुक्त्वात्वाप्रत्येकंजुहुयाच्चरुं॥यज्ञोपवीती
भूत्वाथवक्रौप्रक्षिप्यमेक्षणं॥४३॥ततस्तद्वोज्ञयेद्विप्रान्घृताद्यैर्मिश्रमोदनं॥चरुहोमावशिष्टंचतेभ्योदद्याद्य
थेष्टतां॥४४॥पाकसर्वंमुपानीयसंवेद्यचैथकृथक्॥विधिनोदेवपूर्वंतुपरिवेषमथाचरेत्॥४५॥दृष्ट्वा च
सोमसूक्तेनश्राद्धविघ्नोयदाभवेत्॥अग्न्याभिमोज्ञनेनस्यश्राद्धंसंपूर्णमेवहि॥४६॥भोज्ञनोपक्रमात्पूर्वंपक्व
मात्यततोयदि॥श्राद्धविघ्नेपुनःकार्यंज्ञपत्वामौनतृप्तिदौ॥४७॥तृप्तानथद्विज्ञानलाममुवाताऋतायते॥इत्यादि
कमथोन्यच्चोपास्मैगापतादिकं॥४८॥पंचचंचनक्षमित्यादिमेकाचचैघृताक्तं॥श्रावयित्वापिसंपन्नमिति
पृच्छेच्चतांस्तवः॥४९॥तेचसंपन्नमेवेतिब्रूयुःप्रीतिपुरःसरं॥अथान्नाद्भुतशिष्टंचव्यंजनेभ्यःसमर्पयेत्॥५०॥
किंचित्पिंडार्थमुद्धृत्यपात्रेनिक्षिप्यकुत्रचित्॥अन्नशेषेष्वकिंकार्यमितिपृच्छेच्चतांस्तवः॥५१॥तेभिष्टैःसहभो
क्तव्यमितिप्रत्युक्तिपूर्वकं॥प्रदद्युःसकलंतस्मैस्वीकुर्युश्चेद्यथारुचि॥५२॥अनाचांतेषुविप्रेषुविदिताचम

नोयुक्त्वा॥पिंडदानादिकंकर्मपितृयज्ञवदाचरेत्॥५३॥ ॥इतिशौनकीयेश्राद्धं॥ ॥अथपिंडपितृयज्ञस्यविधिरभि
धीयते॥कर्मैतदुच्यतेपिंडपितृयज्ञइतिद्विजैः॥१॥यस्मिन्यहन्यमावास्याविद्यतेतत्रचाहनि॥भागेपरस्मिंस्त
त्पिंडपितृयज्ञंसमाचरेत्॥२॥यथाहिताग्निःकुर्वीतपितृयज्ञंतथास्मृति॥दक्षिणाग्निंप्रज्वलयेदन्यस्तोपासनान
लं॥३॥प्रज्वाल्यतंपरिस्तीर्यदर्भैःप्राक्दक्षिणाग्रकैः॥अग्नेःप्रागुत्तरेदेशेप्रत्यगुत्तोपिवा॥४॥प्राक्दक्षिणाग्रं
संस्तीर्यदर्भास्तेषुयथाक्रमं॥चरुस्थालीमुपक्रम्यकर्मंडलुवसानकं॥५॥प्राग्दक्षिणंतंपात्राणिसादयेदेक
ग्राःक्रमात्॥ततोयथाकल्पेनतस्मिन्नग्नौचरुंश्रपेत्॥६॥तस्मादग्नेःपृथक्कृत्यगृहीत्वादीप्तमुल्मुकं॥येरू
पाणीतिमंत्रेणप्रणयेत्पूर्वदक्षिणे॥७॥सर्वेकर्माणिचाप्यत्रतांस्तेशंप्रतिसादयेत्॥तंचाग्निंपूर्ववद्दर्भैःपरिस्ती
र्यततोबलात्॥८॥अतिप्रणीतद्वाक्सकृत्वापहताइति॥एवमादिवेदिषदइत्येतंमंत्रमीरयन्॥९॥द्रप्सश्चस्क
न्नोल्लिखेत्तेलेखांपूर्वदक्षिणसंस्थितां॥तांलेखामद्भिरासिच्यसकृच्छिन्नः—शाइतं॥१०॥कृत्वाचरुंकृच्चित्यात्रेनव
नीतमथापिवानिषिच्यनवनीताचेदुत्तुनीयान्नवेतरः॥११॥पुनस्तेनैवपात्रेणध्रुवापात्रंनिषिच्यतत्॥ध्रुवपात्रंच ५२

विन्यस्येकुशेष्वग्नेस्तुदक्षिणे॥१२॥अथध्रुवगतंसर्पिर्नवनीतमथापिवा॥स्रुवेणकिंचिदादायचरुंपक्वमिघारयेत्
॥१३॥उद्धास्यानरतोवक्रैःपुनरप्यभिघार्ययेत्॥अग्नेस्तुपश्चिमेदेशेनिधायास्त्रीर्यबर्हिषि॥१४॥ओज्ञनाभ्यंज्ञनोतेचक
श्रिपूषोपबर्हणं॥अस्याग्नेःपश्चिमेदेशेसुमन्त्र्यास्त्रीर्यपावकं॥१५॥इत्येनिदध्याज्ज्वलनेतूष्मीमेवसमाहितः॥प्रा
चीनावीतिनाभूत्वासमित्यंचदशाग्रकं॥१६॥ततोवदानधर्मेणगृहीत्वाभेक्षणेचरुं॥सोमायेत्यादिमंत्रेणनमोंते
नाकुनिंपुरः॥१७॥एकादकृत्वाग्नयेकव्यवाहनायेत्युपक्रमं॥मंत्रेणनमोंतमुच्चार्यद्वितीयामाकुनीतनः॥१८॥आ
चरेन्मेक्षणेनैवयदिवामंत्रयोर्हयं॥इदंस्वाहेतमुल्कालाक्रमेणजुहुयाच्चरुं॥१९॥स्वाहाकारेणहोमेनुभवेद्य
ज्ञोपवीतवान्॥तत्रप्रागग्नयेकृत्वापश्चात्सोमायकृयतां॥२०॥अग्नेर्यज्ञोपवीत्येवप्रक्षिपेन्मेक्षणंततः॥कृत
शिष्टंचरोरन्वेकचिदित्यभाजने॥२१॥तेनपिंडत्रयंकृत्वापितृभ्योनिर्वपेत्क्रमात्॥तत्रप्रथममासिलापूर्वदक्षि
णदिङ्मुखः॥२२॥स्फ्यनालिखितलेखायांमादिमध्यांतदेशतः॥पुंधेतांपितरःपूर्वंतत्रत्रयमनुक्रमात्॥२३॥उ
च्चार्योच्चार्यमलिलंकिंचित्किंचिद्विषिच्यतत्॥तेषुस्थानेषुपित्र्यैःपिंडंदद्याद्यथाक्रमं॥२५॥अथैषामत्रपितर

इत्याघेनानुमंत्रणं॥मंत्रेणकुर्यात्पिंडानांत्रयाणांतत्रतःसकृत्॥२५॥ततःसव्येनपार्श्वेनव्याहृत्योदङ्मुखोभवेत्॥
नियम्यवाचानासिक्यांकिंचित्कालंयथाबलं॥२६॥ततस्तेनैवपार्श्वेनपर्यावृत्यपुनःपितॄन्॥अमीमदंतेत्यादेनमं
त्रेणाप्यनुमंत्रितान्॥२७॥पिंडशिष्टाःस्रुगःकिंचिदादायाघ्रायतत्यजेत्॥प्रस्थाल्यहस्तंशुंधंतांइत्याद्यैरेवपूर्व
वत्॥२८॥मंत्रैःपिंडेषुपानीयंनिषिंचेत्पितृतीर्थतः॥पिंडेषुतेषुतैलंचदद्याद्दर्भेणतत्रतु॥२९॥पित्रादिनामन्य
त्रादौसंबुध्यतान्यतःपरं॥अभ्यंक्ष्वेतिवदेत्तैलंदद्याद्दर्भैरनुक्रमात्॥३०॥तथामहादेवशर्मन्नभ्यंक्ष्वेतितथांज
नं॥अंक्ष्वेतिचवदेद्दद्याद्दर्भेणपितृतीर्थतः॥३१॥एतद्वःपितरोवासइत्याद्यंमंत्रमीरयेत्॥दद्यात्पिंडेषुवस्त्रा
तंसूत्रच्छेदमथापिवा॥३२॥गुणसूत्रैःशकलंचदर्भेणपितृतीर्थतः॥दातायदितुपिंडानांयंचाश्राद्धर्षताधिकाः
॥३३॥तदाग्नियप्रकोष्ठस्थंलोमवासोर्यमावपेत्॥अथैतानुपतिष्ठतपितॄन्पिंडनिवासिनः॥३४॥मंत्रैर्नवद्भ्या
द्यैर्मनोन्वादितृचेनच॥उद्दाहयेदथपितॄन्पिंडस्थात्मकलानपि॥३५॥उत्क्रामंतेतनादर्चेयाम्यांदिशमनुव्र
जन्॥अग्नेनमघाभ्यामृग्भ्यांदक्षिणाग्निमतिव्रजन्॥३६॥वीरंमेदत्तपितरइतिमंत्रंततोजपन्॥आधत्तपित ५३

रोगर्भमित्याद्यृचमुमुदीर्यतु॥३७॥प्राश्नीयन्मध्यमंपिंडंपत्नीपुत्रप्रसूनये॥प्रक्षिपेदितरावप्युप्रणीतेवाल्मुकेनले॥
३८॥अस्त्यवास्यन्नविद्वेषःसप्राश्नीयाद्भाविमौ॥अचिकित्स्यमहारोगग्रस्तोवाभक्षयेदिमौ॥३९॥रोगानमुकोमृ
तिर्वाभ्यभवेदन्यतरागतिः॥उपयुक्तावशिष्टानिपात्राणिदद्दमुत्सृजेत्॥४०॥दद्यातिरिक्तमेकंचनतृणेनसहोत्सृ
जेत्॥उच्छिष्टपुप्रकीर्यान्नततोयज्ञोपवीतिवान्॥४१॥ब्राह्मणेभ्योयथाशक्तिप्रदद्याद्गुरुदक्षिणा॥ब्राह्मणा
नथपित्रार्थापरीत्यत्रिःप्रदक्षिणं॥४२॥सस्त्रिकैर्ज्ञातिभिःसार्धंप्रणमेद्रचितांजलिः॥कनिष्ठप्रथमाज्येष्ठचर
मास्युःप्रदक्षिणः॥४३॥तेषक्षतान्विनिक्षिप्यप्रणंतषुद्विजाश्चते॥आशिषिविविधान्ब्रूयुःकुर्याच्चानुग्रहंततः॥
४४॥पित्रार्थानांस्वधेत्युत्कागच्छंतेतिवदेद्द्विजान्॥तेभ्योस्वधेत्युदीर्यैवंगच्छेपुरनपेक्षकाः॥४५॥अथवा
मुस्वधेत्युत्कागच्छंतेतिचतान्वदेत्॥यथोक्तंतेपिगच्छेयुरलयादनपेक्षकाः॥४६॥विश्वेदेवाइतिपुरःप्रोक्ष्या
र्यंतदनंतरं॥प्रीयंतामितिनिर्दिश्यविश्वेदेवोसमुत्सृजेत्॥४७॥तावप्युत्तरीयेप्रथमंप्रीयंतामितिनत्परः॥विश्वेदे
वाइत्युदीर्यनिर्गच्छेत्तामयोबहिः॥४८॥ ॥इतिपिंडपितृयज्ञः॥ ॥आहिताग्नेस्तुतत्कार्यंपार्वणंतदथोच्यते॥नि

मंत्र्यपूर्वेद्युरह्नि॥४९॥तिलावकीर्णेदर्भेषुविप्रान्पूर्वेद्युर्निमंत्रितान्॥सन्निधाय्यासनेघृतांल्लोकिकै
र्भूषवेश्यच॥५०॥दर्भासनप्रदानादिकर्मकृत्वायथापुरं॥दक्षिणाग्निंसमिध्याग्निन्नित्यङ्विधायच॥५१॥अ
र्घ्यदानमुपक्रम्यब्राह्मणानांयथाक्रमं॥अन्नाद्यप्रदानांतंविद्ध्यानाहिताग्निवत्॥५२॥विप्राणांभोजनीया
न्नादन्नमुद्धृत्यकिंचन॥घृतेनसिक्तंतत्कृत्वामेक्षणेनावदायच॥५३॥उपविष्टानांविप्राणांसर्वेषामेवपाणिषु
॥विभज्यजुहुयात्सर्वसोमायेत्यादिमंत्रतः॥५४॥पुनश्चमेक्षणेनान्नमवदायविभज्यच॥जुहुयादग्नयेकव्य
वाहनायस्वधानमः॥५५॥इत्यनेनापिमंत्रेणविप्राणामेवपाणिषु॥तत्राग्नौकरणाभावेविप्रानुज्ञापनंतथा
॥५६॥प्रत्यनुज्ञापनमितिहितयंतविवक्षते॥तेषुनुहुतवत्स्वेनमन्यदन्नंचभोजयेत॥५७॥ननस्तृतेषुविप्रे
षुमंत्राभिश्रवणादिकं॥अनाहिताग्निवत्सर्वंकर्मशेषंसमापयेत्॥५८॥अत्रकर्मणिपिंडानांदानंच्छंदतिसू
त्रयः॥५९॥ ॥इत्याहिताग्नेःपार्वणश्राद्धं॥ ॥माघेमासेस्यपक्षेचाष्टमीसमुपस्थिता॥श्राद्धंतत्राष्टकानामस्म
र्यतेश्रुतिचोदितं॥१॥तत्कुर्यात्पशुकल्पेनस्थालीपाकमथेनमः॥अष्टकाचनवम्यांचप्रत्येकंश्राद्धमुच्यते॥२॥

नद्वयंचोच्यतेपिंडपितृयज्ञप्रकारतः॥होमकालेष्वनुज्ञाप्यपित्रर्थान्ब्राह्मणान्वृताः॥३॥उदीरतामित्यादिभिर्ऋग्भिर
ष्टाभिराकृतिः॥अष्टौविदर्भाःप्रत्येकमवदायचमंत्रयात्॥४॥यावत्यपितृदेवत्याःप्रीणयंतिपितॄनपि॥स्वर्वाचिरव
वार्नोतिजुहुयाद्धुतस्रुतः॥५॥पार्वणश्राद्धवद्विप्रान्भोजयेदवदानतः॥पिंडप्रदानप्रभृतिपितृयज्ञवदाचरेत्
॥६॥पात्राणिदंदह्यमुत्सृज्यब्राह्मणान्विसृजेत्ततः॥अथापरेद्युरष्टम्यामष्टकाश्राद्धमाचरेत्॥७॥सन्निधानहिताग्नी
ऋगुणयुक्तान्निमंत्रितान्॥तत्कुर्यात्पशुकल्पेनस्थालीपाकपथेनवा॥८॥स्थालीपाकप्रकारेणकरणेतुपुरस्सरं॥त
त्रौपासनंकृत्वाप्रणीतासाधनावधि॥९॥मंत्रस्थदेवतानांतुनिरुप्यप्रतिदेवतं॥चतुरश्चतुरोमुष्टीन्प्रोक्षणंचय
थापुरं॥१०॥तूष्णींकृत्वासमोप्याग्नौश्रपयित्वायथाविधि॥निधायपश्चिमेसंचबर्हिष्येचचरुंततः॥११॥आज्यसं
स्कारपूर्वंतुपुरस्तंत्रंसमाप्यच॥ततोदक्षायहविषःप्रक्षिप्याथजुहुविले॥१२॥अनुज्ञाप्यचपित्रर्थान्ब्राह्मणांं
स्थितासनान्॥पूर्वंमग्नेनयेत्याद्यामृग्भ्यांकृत्वाथरेलिकैः॥१३॥ग्रीष्मेहेमंतकृतवइत्यायैश्चयथाक्रमं॥मंत्रैश्च
तुर्भिःस्वाहांतैर्गृह्याधीतेष्टयक्॥१४॥प्रजापतेनेत्याद्यचौएतैर्मंत्रैश्चसप्तभिः॥कृत्वायथाविधिस्रुतमिष्टहोम

मष्टमं॥१५॥कृत्वोपरिष्टात्त्रैवसमाप्यचयथाविधिः॥ततोनिमन्त्रितान्विप्रान्भोजयित्वायथैप्सितं॥१६॥दद्या
त्पितृभ्यःपिंडांश्चपितृयज्ञोक्तमार्गतः॥इत्येवंपुष्टिकामोवैविदध्यात्सादरंद्विजः॥१७॥अद्रव्योपियथाशक्तिःकुर्या
देवाष्टकंबुधः॥योशक्तिकस्त्वयोकर्तुदारिद्र्येणाष्टकामिमां॥१८॥सप्रदद्यादनड्वहंतृणान्यप्यथवाग्निना॥गुल्म
एकंदहेद्वेषामष्टकादिस्त्विंचितयन्॥१९॥अष्टकासमयेज्ञीवन्त्वेवानष्टकोभवेत्॥नवंम्यांचचरेच्छ्राद्धंमन्वष्ट
क्याभिधानकं॥२०॥तत्पिंडपितृयज्ञोक्तप्रकारेणसमाचरन्॥निमंत्रणादिविप्राणामर्घ्यदानावसानकं॥२१॥अना
हिताग्निःकर्तव्यंपर्वश्राद्धंवदाचरेत्॥तत्रयद्यष्टकापूर्वेपशुकल्पेनकल्पना॥२२॥नदातव्यपशोर्मांसभुक्तमुक्तावं
शेषिता॥विप्राणांभोजनार्थायकिंचिदत्राप्युपातयेत्॥२३॥ननुहोमायमासेनहोमोनास्त्यत्रकर्मणि॥दक्षिणप्र
वणेदेशेस्थंडिलंपरिकल्प्यवेत्॥२४॥परिश्रयेच्चतंदेशंयथावत्परिश्रयेत्॥परिश्रयणपक्षेथकुर्वंस्तद्वारमुत्तरे
॥२५॥मूलेनसहितैर्दर्भैरधस्तात्परिकल्पिते॥अत्रदक्षिणमंत्रज्ञैःपरिस्तरणमाचरेत्॥२६॥सुद्धानक्तसरान्नंचपा
यसंदधिसक्तवः॥मधुमंथास्तथात्येवपंचात्रवस्मृताः॥२७॥सक्तवोमिश्रितादधिमंथाइतिस्मृताः॥तएवमधुसंमिश्रा



५५

मधुमंथाइतिस्मृताः॥२८॥मधुमंथैर्विनान्येषांचतुर्णांहोमयिष्यते॥२९॥केवलंपिंडतार्थंमधुमंथपरिग्रहः॥तत्रशुद्धो
दनादीन्स्त्रीपचेद्दोषासनेनलेः॥२९॥तत्रैवदधिमंथानमधिश्रित्याभिघार्यच॥उत्तरत्रनिधायाग्नेःपुनरप्यभिघा
रयेत्॥३०॥एवमेतानिचत्वारिहवींषितुयथाक्रमं॥पश्चिमेग्नेपरिस्तीर्यदर्भेष्वेवविनिक्षिपेत्॥३१॥लेखान्लेख
नवेलायांद्वेलेखेउल्लिखेन्नयोः॥पितृणांपिंडदानार्थंपूर्वास्त्रीणांतुपश्चिमे॥३२॥उभेचसकृदाच्छिन्नैस्तीर्णैःप्रच्छा
दयेत्क्रमात्॥यद्वापिंडप्रदानार्थंमवघट्टितयंखनेत्॥३३॥लेखाद्वितयंतत्सूर्वंपश्चिमस्थंयथाक्रमं॥कुर्यान्नेच
यथाकारेयदिवाप्यवघानघट्॥३४॥कल्प्येयंपथगेवैषाकश्चिपूपोपबर्हणं॥होमकालेचरुरन्यान्मधुमंथविव
र्जितान्॥३५॥उद्धृत्यपात्रेघन्येषुपृथक्सिंचेत्सर्पिषा॥अरदायानुपूर्व्येणपार्वणश्राद्धहोमवत्॥३६॥जुहुया
प्यसमनुज्ञाप्यपित्रर्थंब्राह्मणान्हुतान्॥अथतान्भोजयेद्विप्रातृप्तास्तुस्तेयथातथा॥३७॥भुक्तवत्सुतुविप्रेषुषिं
डांदद्याद्यथाविधिः॥तत्रप्रकल्प्ययत्पिंडामधुमंथविमिश्रितः॥३८॥त्रीन्स्त्रीन्पिंडान्पितृभ्यश्चस्त्रिभ्यश्चनिवपेत्क्र
मात्॥देशेपितृभ्यःसंपूर्वंतथास्त्रिभ्यस्तुपश्चिमे॥३९॥पिंडान्पृथक्पृथक्दद्यात्लेखायोवरदेषुवा॥स्त्रीपिंडदान

पिंडानामहंचपरिकल्पयेत्॥४०॥सुंधंतांमातरइतिप्रकारेणयथार्हतः॥एकत्रपिंडभागिन्यौचेत्स्यातांयदितत्रतु॥
४१॥एतद्वारुद्रयज्ञादेपिंडंदेयाश्वावामनु॥इतिब्रूयादथैकस्मैपिंडेष्वह्नुतयासति॥४२॥एतद्वोयज्ञदेसिदेरुद्रदे
याश्वयान्विति॥स्त्रीपिंडेषुत्रिषुसुरासमावामधिकंदिशेत्॥४३॥ओदनाग्रोदनंप्राङ्कुराचाममितिसूरयः॥अंज
नादिप्रदानेचस्त्रीणांद्वित्वबहुत्वयोः॥४४॥यज्ञदेरुद्रदेत्याद्यंतमूहंपरिकल्पयेत्॥एतद्वोमातरोवासोमान्
व्यूहमित्यपि॥४५॥ऊहंप्रकल्पयेस्त्रीणांवासोदानंप्रदापयेत्॥उभयेषांचपिंडानांसकृद्देवानुमंत्रणं
॥४६॥उपस्थानंचमंत्रेणतथैवास्यात्प्रवाहणं॥कल्पयेत्स्थगंवैषांकशिपूपोपबर्हणं॥४७॥नवावरादिजा
नेषुत्रिषुकर्मसुभोजयेत्॥अशक्तंसप्तमंचस्त्रीनयुग्मंतुयथाबिलं॥४८॥सुप्तत्वंपक्षयेपित्राद्वितयस्यत्र
यस्त्रयः॥वरणीयस्यतृतीयस्मैलोकएवविशिष्यते॥४९॥पंचपक्षेतुपित्रर्थेवरणीयंस्त्रियोनयोः॥द्वयोःप्र
त्येकमेकैकोवरणीयेविशिष्यते॥५०॥एतयैवप्रकारेणमाघ्यावर्षाभिधानकं॥श्राद्धंप्रोष्ठपदेमासिकृष्ण
पक्षेसमाचरेत्॥५१॥ ॥इतिशौनकीयेअष्टकाश्राद्धं॥ ॥काम्यश्राद्धमहंवक्ष्येशौनकोऋषिसंमतः॥नापुत्र ५६

स्यलोकोस्तीतिश्रुतिरेषसनातनी॥१॥देवतानामृषीणांचपितॄणामनृणस्मृतः॥ऋषिभ्योब्रह्मचर्येणपितृभ्यश्च
सुतेनच॥२॥कुर्याद्यज्ञेनदेवेभ्यःस्वोचिरेधर्ममाचरन्॥तस्मात्पितॄणापाकरणंपितॄणामिहकुर्वतां॥३॥कन्यादित्या
यदादित्यःकृष्णपक्षेथपंचमी॥श्राद्धमत्रगृहीकुर्यान्मासिमासिचवत्सरं॥४॥प्रोष्ठपद्याहिपंचम्यापितृमासं
तमाचरन्॥पर्वणेनविधानेनश्राद्धंकुर्यात्समाहितः॥५॥यज्ञोपवीतीकुर्वीतपुत्रकामोद्विजोत्तमः॥तिलार्थेतुय
वाग्राद्यादृद्दिश्राद्धवदिष्यते॥६॥प्रोष्ठपद्यसितेपक्षेपंचम्यामाहरेत्सुधीः॥दक्षिणाचप्रदातव्यासुवर्णेचासितेन
था॥७॥दक्षिणाहीनकर्माणिनिःफलानिभवंतिहि॥तस्माद्यत्नेनदातव्यादक्षिणाचस्वशक्तितः॥८॥इतिकाम्यश्रा
द्धं॥ ॥म्याद्वातंप्रणवादीश्चनाम्नाश्चवाश्चयवा॥त्रिर्द्वेयैवग्रसोदन्नंदेशेनचमसंस्थशेत्॥१॥अथशौनकः॥अरा
डवेज्ञपेन्मंत्रंशतवारंनसंशयः॥श्रीमतेचयदाभुंक्तेमुच्येतकल्मषात्तदा॥१॥उषासानक्तासूक्तंतुज्ञपेद्दशजले
पिवा॥प्रमादाज्ज्ञानतोभुंक्तेसूतकान्नमकल्मषं॥२॥प्रविश्यप्रज्ञपेन्मंत्रंशतवारंशिवालये॥सूतकान्नंयदाभुंक्ते
तदापापात्प्रमुच्यते॥३॥पर्जन्यावातमन्वर्गंशतवारंजपेज्जले॥सूतकस्यगृहेभुंक्तेतदापापात्प्रमुच्यते॥४॥इं

द्वोअश्वापिमंत्रंच अयुतंचेन्नकल्मषं॥ज्ञानतोज्ञाननस्पृष्ट्वाभुक्तिकालेरजस्त्रियां॥५॥इदंनमोजपेन्मंत्रंसहस्रंचे
न्नदुष्कृतं॥ज्ञानतोज्ञाननस्पृष्ट्वाभुक्तिकालेरजस्त्रियां॥६॥आत्मानंप्रजपेन्मंत्रमयुतंचेन्नकल्मषं॥भुक्तिकालेर
जस्पृष्ट्वाज्ञानतोज्ञानतोपिवा॥७॥अग्निंनमाजपेन्मंत्रंदशवारंविशेषतः॥अत्यंजीनाधनीश्रुत्वापश्चाद्भुंक्तेनकिल्बि
षं॥८॥अज्येष्ठासोजपेन्मंत्रंदशवारंनकल्मषं॥चंडालादिदशैनंहत्वापश्चाद्भुंक्तेयदातदा॥९॥आयेतस्युर्जपेन्मं
त्रंदशवैविष्णुमंदिरे॥अस्मदनपदाभुंक्तेतदापापात्प्रमुच्यते॥१०॥तेअज्येष्ठाजपेन्मंत्रंशतविष्णालयेसदादिवादि
भोजनंहत्वातस्मान्मुच्यतेकल्मषात्॥११॥हयोनप्रजपेन्मंत्रंशतवारंजलेतथा॥रात्रौदिभोजनंहत्वाकल्मषा
च्चप्रमुच्यते॥१२॥त्र्यंबुमेषंजपेन्मंत्रंशतवारंशिवालये॥अष्टम्यांवाचतुर्दश्यांदिवाभुंक्तेनकल्मषं॥१३॥सपर्व
तोजपेन्मंत्रंसंक्रांतौदशचेज्जले॥पर्वद्वयेभानुवारेरात्रौभुंक्तेनकल्मषं॥१४॥सहिद्वरोजपेन्मंत्रंशतंवैविष्णुमं
दिरे॥एकादश्यामहोरात्रंभुक्तेयदिनपावकं॥१५॥आपःपृणीतमंत्रंचदशवारंचकिल्बिषं॥रात्रौभुंक्तेवत्सरे
नुमन्वादिषुयुगादिषु॥१६॥अश्वाइवजपेन्मंत्रंदशवारंजलेपिवा॥नित्यश्वाद्येयदाभुंक्तेतदापापात्प्रमुच्यते॥

१७॥मयोभूश्वजपेत्सूक्तंहरिवात्सर्गेतुरौद्रिके॥भुक्तायदिविनश्येतविंशद्वारजलेयदा॥१८॥त्वेषंगणंजपेन्मंत्रंशतंवै
विष्णुमंदिरे॥व्यतीपातेयदाभुंक्तेनदादोषात्प्रमुच्यते॥१९॥आप्यायस्वजपेन्मंत्रंशतलक्षंशिवालये॥चंद्रग्रहेय
दाभुंक्तेनदादोषाद्विमुच्यते॥२०॥सूर्योदेवीजपेन्मंत्रंशतलक्षंशिवालये॥सूर्यग्रहेयदाभुंक्तेनदापापात्प्रमुच्यते॥
२१॥अरण्येवजपेन्मंत्रंदशवारंयदातदा॥बहवश्चैवपात्रेतुभुंजतेतेनकिल्बिषं॥२२॥अग्नेमरुद्भिर्मंत्रंचकिल्बि
षंनशतंजपेत्॥भुंजतेसहपात्रेतुबहवोब्रह्मचारिणः॥२३॥मानस्तोकेजपेन्मंत्रंशतवारंनकिल्बिषं॥पल्यंतं
तुयदाभुंक्तेपात्रस्यपलितस्यतु॥२४॥एहिवांप्रजपेत्सूक्तंसहस्रंतुजलेयदा॥ब्रह्मघ्नस्यगृहेभुंक्तेतदापापात्प्र
मुच्यते॥२५॥यत्तेनप्रजपेत्सूक्तंसहस्रंविष्णुमंदिरे॥पापात्प्रमुच्यतेसत्यंगृहेभुंक्तेसुरापिनः॥२६॥इंद्रानुप्रजपे
त्सूक्तंसहस्रंचेज्जलेयदा॥स्वर्णस्तेयगृहेभुंक्तेनदापापात्प्रमुच्यते॥२७॥सुकंतेप्रजपेत्सूक्तंशिवस्थानेसहस्र
कं॥तल्पगम्यगृहेभुंक्तेपातकान्मुच्यतेतदा॥२८॥प्रनुवोचजपेत्सूक्तंसहस्रंविष्णुमंदिरे॥तत्संयोगिगृहेभुंक्तेत
दादोषात्प्रमुच्यते॥२९॥इंद्रोनेदिष्ठवर्गंचशतंगोष्ठेजपेद्बुधः॥गोघ्नगृहेयदाभुंक्तेतदामुच्येतकल्मषात्॥३०॥

ननद्दिवाजपेद्दर्गशतवारंजलेयदा॥हयघ्नस्यगृहेभुंक्तेतदादोषात्प्रमुच्यते॥३१॥तेनइंद्रोजपेद्दर्गेशतवारंशिवालये॥कुंजरघ्नेहेभुंक्तेकल्मषान्मुच्यतेतदा॥३२॥प्रकःसतांजपेत्सूक्तंसहस्रंविष्णुमंदिरे॥कृतघ्नान्नंयदाभुंक्तेतदापापात्प्रमुच्यते॥३३॥जपेदश्वोनकंदंचशतवारंजलेयदा॥अश्वविक्रयिणोगेहेभुंक्तेभुक्तेनकिल्बिषं॥३४॥दिवोनसर्गोमंत्रंचबदर्योचशतंजपेत्॥उद्धविक्रयिणोगेहेभुंक्तेपापाद्विमुच्यते॥३५॥प्रनेधाराजपेन्मंत्रंशतवारंशिवालये॥अविविक्रयिणोगेहेभुंक्तेभुंक्तेनकिल्बिषं॥३६॥शतंधाराजपेन्मंत्रंशतवारंशिवालये॥पशुविक्रयिणोगेहेभुंक्तेभुंक्तेनकिल्बिषं॥३७॥कनिक्रदज्जपेन्मंत्रंशतवारंयदातदा॥वेदविक्रयिनोगेहेभुंक्तेपापात्प्रमुच्यते॥३८॥यज्ञायज्ञाजपेत्सूक्तंएकधाच्यंजलेवापि॥गणिकान्नंयदाभुंक्तेदानेपापामुच्यते॥३९॥अस्तेवसुजपेन्मंत्रंसहस्रंवेनकिल्बिषं॥प्रमादाज्ज्ञानतोभुंक्तेगणान्नंतुयदातदा॥४०॥अध्वर्योर्जपेन्मंत्रंसहस्रंतुजलेयदा॥गणिकान्नंयदाभुंक्तेविमुच्येतहिकिल्बिषं॥४१॥अग्नेअछाजपेत्सूक्तंशतवारंयदातदा॥परिवित्तिगृहेभुंक्तेमुच्येतसर्वकल्मषात्॥४२॥अयमग्निजपेत्सूक्तंशतवारंयदातदा॥परिवेत्तुगृहेभुंक्तेमुच्येतसर्वक ५८

ल्मषात्॥४३॥मंदिष्टयजपेन्मंत्रंशतवारंजलेयदा॥पौनर्भवंगृहेभुंक्तेतदापापात्प्रमुच्यते॥४४॥अछामइंद्रसूक्तंतुएकवारंजलेनपेत्॥विधुरान्नंयदाभुंक्तेतदापापात्प्रमुच्यते॥४५॥इळेअग्निंजपेन्मंत्रंशतवारंयदातदा॥पंचयज्ञविहीनस्यगृहेभुंक्तेनपातकं॥हयेनरोजपेन्मंत्रंपंचाशद्विष्णुमंदिरे॥यज्ञशालांयदाभुंक्तेतदापापात्प्रमुच्यते॥४७॥दोहेनगोजपेन्मंत्रंअयुतंचनकल्मषं॥ज्ञानतोज्ञानतोभुंक्तेपतितान्नंयदातदा॥४८॥यत्पायासिष्टमंत्रंचशतवारंजपेच्छिवेअभिशस्तगृहेभुंक्तेकल्मषाद्वैविमुच्यते॥४९॥किमंगत्वाजपेन्मंत्रंअयुतंचजलेत्मधीः॥ज्ञानतोज्ञानतोभुंक्तेकुष्ठान्नंचनकिल्बिषं॥५०॥स्रुषेजनंजपेद्दर्गेशतधाज्यंजलेपिबा॥स्वामिद्रोहियदाभुंक्तेपातकान्मुच्यतेतदा॥५१॥पर्जन्यवातावर्गेचशतवारंजपेद्यदा॥पितृद्रोहिगृहेभुंक्तेपातकान्मुच्यतेतदा॥५२॥आयुर्वानोजपेद्दर्गंशतवारंजपेद्यदि॥दीर्घरोगीगृहेभुंक्तेतदापापात्प्रमुच्यते॥५३॥द्रुपदेवीदेवीवर्गेचबदर्योवैशतंजपेत्॥पिशुनस्यगृहेभुंक्तेमुच्यतेकल्मषात्तदा॥५४॥अभित्यंवीरंवर्गेचशतवारंजलेपिबा॥अमृपक्वंगृहेभुंक्तेपापन्मुच्येतसर्वथा॥५५॥तेनोराय्योजपेद्दर्गेशतवारंशिवालये॥अकार्यंज्ञगृहेभुंक्तेमुच्य

नेपातकान्नदा॥५६॥उदुत्यप्रजपेद्गंगेशतवारंजलेपदा॥व्याकुलस्यगृहेभुंक्तेनदापापात्प्रमुच्यते॥५७॥प्रवस्यद्
प्रजपेन्मंत्रंविप्रोविघ्नालंपेदृशा॥अरण्येभक्तभोक्ताचनदापापात्प्रमुच्यते॥५८॥गवामिवप्रजपेन्मंत्रंशतवारमक
ल्मषं॥कुंडकान्नंपदाभुंक्तेसतोमुच्येतकिल्बिषात्॥५९॥कोवोमहांतमंत्रंचदृशावारंजपेद्बुधः॥गोलकान्नंय
दाभुंक्तेनतोमुच्येतकिल्बिषात्॥६०॥सत्येनोत्तभितामंत्रंजपेद्विघ्नालयेदृशा॥उच्छिष्टेषुपदाभुंक्तेतदामुच्येतकि
ल्बिषात्॥६१॥आवोयंतुजपेन्मंत्रंशतवारंविनागुरोः॥उच्छिष्टभोजीपापाच्चमुच्यतेसर्वथातदा॥६२॥प्रातर्यु
ज्ञाजपेन्मंत्रंअयुतंतेनकिल्बिषं॥रजकान्नंतुयोभुंक्तेज्ञाननोज्ञाननोपिवा॥६३॥दिवस्परिजपेत्सूक्तंएकवारंज
लेपिवा॥पर्योयान्नंयदाभुंक्तेतदापापात्प्रमुच्यते॥६४॥स्नात्रमिंद्रोजपेद्गंगेशतवारंजलेयतः॥कुष्ठान्नमाभुंक्तेनु
मुमुच्यतेतुयदातदा॥६५॥सहस्रवारंगायत्रीव्याहृत्यातावसंपुटं॥किल्बिषान्नंयदाभुंक्तेदोषोनास्तितदाज
पेत्॥६६॥त्वांजना—जपेन्मंत्रंशतपंचत्रिवालये॥क्षत्रियान्नंयदाभुंक्तेतदापापात्प्रमुच्यते॥६७॥धनंनस्यंद्रं
मंत्रंचशतपंचजलेजपेत्॥भुंक्तेयदातुवैश्यान्नंतदापापात्प्रमुच्यते॥६८॥समानमुत्यंसूक्तंतुसहस्रंतुयदाजपे ५९

त्॥शूद्रान्नंज्ञाननोभुंक्तेप्रणश्यतिहिकिल्बिषं॥६९॥अथहृत्रंजपेत्सूक्तंएकवारंदिनेदिने॥परंनेच्छादृज्ञानास्ति
सत्यस्वनिस्थिरमतिः॥७०॥ ॥इतिदुर्भोजनप्रायश्चित्तं॥ ॥आदित्येपर्वसंक्रांतौव्यतीपातेपितुर्दिने॥अभ्यंगंचो
पवासंचनकुर्याच्चिशिभोजनं॥१॥इमांत्वमिंद्रमंत्रंचदिनंप्रतिजपेच्छतं॥लभतेपुत्रभाग्यत्वंविदुषोदीर्घजीवितिः
॥२॥समंजंतुजपेन्मंत्रंशतवारंदिनेदिने॥दंपत्योःप्रेममैत्रीचज्ञाताचननिवर्तते॥३॥सुतंभरोजपेन्मंत्रंसातुस्त्रीणां
विसर्जनौ॥चैत्रेलक्षंबदर्योग्रेतस्माद्दोषात्प्रमुच्यते॥४॥उक्षंतेप्रजपेन्मंत्रंशतवारंजपेद्यदि॥स्वस्त्रियामनृतौसंगं
ज्ञातापापान्नलिप्यते॥५॥दृक्षेताप्रजपेन्मंत्रंबदर्योवैजतंजपेत्॥दिवास्वस्त्रीषुमंगस्यतदामुच्येतकिल्बिषात्
॥६॥आनोब्रह्माणिमंत्रंतुशतंदोषोजपेन्नहि॥स्वभार्यासंगकालेतुपरस्त्रीस्मरणंतदा॥७॥धारावराजपेन्मंत्रंश
तवारंजपेद्यदा॥स्वप्नेंद्रियंयदायातिमुच्यतेपातकात्सुधीः॥८॥अगम्यागमनादौतुप्रायश्चित्तंतदुच्यते॥पतिता
देरमीज्यस्ययाजनेनुष्ठितातथा॥९॥तयैवविषशस्त्राणिरग्राह्यस्यप्रतिग्रहे॥यदिवास्वीकृतेद्रव्येपुरुषानिंद्य
कर्मणः॥१०॥तथात्वग्निचयस्थस्ययूपस्यस्पर्शनेकृते॥चतुर्घ्येषुयद्येकंप्रमादेनकृतंभवेत्॥११॥तदोपास

नमुज्वाल्यवह्निंपरिसमुह्यच॥परिस्तीर्यचपर्युक्ष्यकुर्यादाज्यस्यसंस्कृतिः॥१२॥स्रुवंसंमृज्यतेनाज्यगृहीत्वाज्यलि
तेनले॥मंत्रेणपुनर्मीमैत्याज्येनजुहुयात्पुनः॥१३॥पश्चादिमेयधिष्ण्यासदृत्याज्येनजुहूयतां॥अथवासमिधा
वाभ्यांमंत्राभ्यांजुहुयादुभे॥१४॥मंत्राविमोजपेद्यापिस्वाहाकारेणवर्जितं॥समिदाधानपक्षेपिवह्नेःपरिसमू
हनं॥१५॥परिस्तरणमप्यत्रकुर्यात्पर्युक्षणंतथा॥ ॥द्वादशाहमभुंजीतस्वगोत्रेगमनेजपेत्॥१॥अर्धमासमभुं
जानःसखिदारेषुमैथुनं॥विशेत्॥इदमापःप्रवहतपल्किंचेदमृतंपुनः॥इतिचैताजपेदापःप्रविश्येतेषुकर्मसु॥ए
वमादीनिचान्यानिश्रुत्युक्तानिबहूनिच॥३॥इतिप्रायश्चित्तानि॥ ॥स्वप्नाध्यायानिचैतेषांकालरात्र्याधिदै
वता॥पूजाविधानपूर्वोक्तंकुर्यादत्रापियत्नतः॥१॥होमंकुर्यात्प्रयत्नेनरात्रावेवद्विजोत्तमः॥उक्तेनैवविधानेन
नसघृतंपायसंहुनेत्॥२॥अष्टोत्तरशतंहुत्वासूक्तेनानेनवित्तथा॥स्वप्नाधिपतिमंत्रेणहुनेदष्टोत्तरंशतं॥३॥
तत्रसिष्टकृतंहुत्वाहोमशेषंसमापयेत्॥पूर्वोक्तमभिषेकंचयत्तदत्राविधीयते॥४॥गुरवेदक्षिणांदद्याद्वस्त्र
हेमपशूनपि॥यद्युक्तदक्षिणाभावेष्वनुक्तेहोमकर्मसु॥५॥हिरण्यंदक्षिणांदद्यात्तदानीमपिवाबुधः॥वस्त्र

६०

कुंभादिकानांचतत्तद्धेत्रेप्रदापयेत्॥६॥ब्राह्मणान्भोजयेच्छक्त्यासुशीलान्वेदपारगान्॥भक्ष्यैश्चपायसाद्यैर
न्नानिसुबहूनिच॥होमशेषंस्वयंप्राश्यब्राह्मणेभ्योनमेत्यथ॥अनेनविधिनाशस्तुशांतिंकुर्वीतयत्नतः॥८॥त
स्यवर्षशतायुष्यंभवत्येवनसंशयः॥इतिशांतिः॥यद्यनिष्टफलंस्वप्नेपश्येत्तस्योच्यतेविधिः॥स्नात्वाप्रभातेम
ध्याचउपास्यतदनंतरं॥१॥अद्यानोदेवसवितरित्यृचापूर्वसेकया॥ततःपरंयच्चगोषुदुष्वप्नमिः॥२॥ऋग्भिः
परंयोमेराजन्युज्यइत्याद्यृचातथा॥ऋग्भिःसप्तभिरेताभिरुपतिष्ठेतभास्करं॥३॥एवंकृतेतुदुस्वप्नदर्शनंनिः
फलंभवेत्॥अधःस्वप्नस्येतिजपन्प्रातःप्रातर्दिनेदिने॥४॥दुःस्वप्नंतंतुदाहृत्यनतस्माद्भोजनाद्भयं॥योमे
राजन्निनीमांतुदुःस्वप्नश्रमंनीमृचं॥५॥जपत्वानाशयतिक्षिप्रंदुःस्वप्नंब्राह्मणःशुचिः॥दुःस्वप्नंनाशयेन्मंत्रयो
गोमेगजेजपेदृचि॥६॥अष्टोत्तरंतुसाहस्रंजलेवाविल्वमंदिरे॥ ॥यस्मिन्कालेगृहान्नावोगच्छेपुश्चतुरंबनं॥
अनुमंत्रयतेभागायांतिपश्येत्सकौतुकं॥१॥आत्मीयाःपरकीयावानिषंणाःशुचिभूतले॥मयोभूर्वातइत्या
द्यैर्द्वेऋचोसमुदीरयेत्॥२॥आगतांगृहास्तांगाःपश्यन्मंत्रानिमांजपेत्॥यासामूधश्चतुर्विलामित्याद्य

खिलसंभवं॥३॥यादेवेत्यनुकम्यसूक्तशेषंजपेदपिगृह्यानिप्रयातीनांगवांमंत्रानुमंत्रणे॥४॥आगावोयस्यसू
क्तस्यजपमिच्छंतिकेचन॥गुरोर्गोवोजपित्वानुगावोयत्रक्वचित्त्रियः॥५॥उपरिष्टेतमंत्रेणभूतास्थेत्येवमादिने
॥ ॥अग्निमूषककाष्ठाद्यैवस्त्रीवयवनाशयेत्॥तद्वस्त्रीत्रिगुणीकृत्यप्रागग्रंचैवकारयेत्॥७॥पंचविंशतिभेद
युक्तोधपेद्वस्त्रलक्षणं॥दृताकारेर्थसिद्धिस्यादर्धचंद्रेचपीडनं॥८॥चतुरस्रंजपेत्सर्वंत्रिकोणेस्त्रीविनाशनं॥
दंडाकारेविनाशस्याभिन्नाकारेतुनिःफलं॥९॥बकुच्छिद्रेयेनाशस्याच्छूर्पाकारेतथैवच॥ऊर्ध्वेक्षममधो
नीचमध्यमेमध्यसंभवेत्॥१०॥एतेषांचफलानिःस्युःषण्मासाभ्यंतरेभवेत्॥ब्रह्मस्थानेध्रुवंमृत्युर्ब्रह्मद्वेपुत्रसं
भवः॥११॥ऐंद्रेसंपत्समायातीद्वाग्न्यांगृहिणीमृतिः॥आग्नावविनभयंकुर्याद्ब्रह्माग्नौज्वरसंभवः॥१२॥यमाग्ने
र्गोविनाशस्याद्यमेबंधुविनाशनं॥ब्रह्मांतकेमहाव्याधिरापदेतकोनैऋतौ॥१३॥नैऋत्यांपुत्रलाभश्चनैर्ऋतेब्र
ह्मकेमृतिः॥पर्जन्यनैऋतेपुत्रीपर्जन्येविधिरुच्यते॥१४॥मरणंब्रह्मपर्जन्येपुण्यंपर्जन्यमारुते॥वायुगंधागमे
प्रोक्तंसंपत्त्याद्ब्रह्ममारुतः॥१५॥कुबेरवायोनाशस्यात्कुबेरेपुत्रनाशनं॥ब्रह्मांतकेमहाव्याधिराशपक्षेरुजाग

मः॥१६॥ईशेसौख्यंविनिर्दिष्टंब्रह्मेशेपुत्रसंभवः॥ऐंद्रेशेसंपदित्येतद्ध्वस्त्रस्यलक्षणं॥१७॥ ॥आयुष्यमायुर्व
र्चस्यमूलंदाक्षायणंमहत्॥अलंकारहिरण्यंवाप्राप्यदाक्षायणंव्रजेत्॥१८॥प्राप्यंचश्रियमाधत्तेबकुचान्नमुपाश्नु
ते॥ ॥शौनकः॥ब्राह्मेमुहूर्तेचोत्थायचिंतयेदात्मनोहितं॥गुरुंविघ्नुंनमस्कृत्यमातापित्रोस्तथैवच॥१॥भस्मग
च्छंतितिग्मांशावन्यादिगत एवयः॥स्वप्नेस्ववाग्यतःस्थित्वासमस्तामपितांनिशां॥२॥प्रातस्नात्वाशुचिर्भूत्वायेन
सूर्यादिपंचभिः॥ऋग्भिरेवमुपस्थायसवितारंविशुध्यति॥३॥विनागुरोरभ्यंगादिकर्मणायेनकेनचित्॥कर्म
णाभ्रांतिमापन्नोयद्वान्नेक्षणादिना॥४॥निंद्येनकर्मणाश्रांतोव्याधिभिःसमएवसः॥सूर्योदयेस्वपेत्सोपि
पूर्ववत्सकलंदिनं॥५॥वाचंयमोभयंस्थित्वाअस्तंयंतंदिवाकरं॥अग्निंसुविष्टकृतेविघ्नेत्यादिभिर्युवपंचका
न॥६॥उनगभिश्चतसृभिरुपतिष्ठेतशुद्धये॥अंतर्जलेदेवगृहेबल्मीकेमूषकस्थले॥७॥अन्यशौचावशेषाच्च
नग्राह्यापंचमृत्तिकाः॥मार्गरथ्याश्मशानस्थांमूलामलिनोत्पन्नेत्॥८॥कीटांगारंस्थिसहितांनाहरेच्छर्क
रान्वितां॥वापीकूपतडागेषुनाहरेद्ग्राह्यमृत्तिकां॥९॥अंतर्गताजलाग्राह्याकरतोमणिबंधनात्॥शौचाचार्यमृद

मादायजलतीरेविनिक्षिपेत्॥१०॥ग्रामाद्बहिःसमागत्यमलमूत्रेसमुत्सृजेत्॥उपवीतंपृष्ठतःकृत्वाकुर्यान्मूत्रपु
रीषकौ॥११॥दिवासंध्यासुकर्णोस्यंब्रह्मसूत्रउदङ्मुखं॥कुर्यान्मूत्रपुरीषेतुरात्रौचेद्दक्षिणामुखः॥१२॥अथशौ
चगच्छंस्तिष्ठन्वैरथ्यातीर्थेश्मशानके॥अंगारेगोमयेनद्यांयज्ञभूमिषुसर्वदा॥१३॥पूलेजलेचितायांचवल्मी
केगिरिमस्तके॥देवालयेनदीतीरेदर्भपुष्पकुशस्थले॥१४॥सेव्यच्छायासुवृक्षेषुमार्गगोष्ठाबुभस्मसु॥स्थाने
घेतेषुसर्वेषुकुर्यान्मूत्रादिकंचन॥१५॥वायुवार्यर्कसोमांगोतुलसीस्त्रीद्विजन्मनां॥पश्यन्नभिमुखोमूत्र
पुरीषादिनकारयेत्॥१६॥एकातुमृत्तिकालिंगेतिस्रःसव्यकरेमृदः॥करद्वयेमृदयंस्यामृत्प्रमाणमथोच्यते
॥१७॥आर्द्रामलकमात्राचलिंगशौचेचमृत्तिका॥मूत्रातुद्विगुणंशुक्रेमैथुनेत्रिगुणंभवेत्॥१८॥लिंगशौच
मितिप्रोक्तंगुदशौचमथोच्यते॥पंचपादेमृदासेव्याकरेवामेदशस्मृतः॥१९॥हस्तयोःसप्तदातव्यापुरीषेमृत्प्र
माणकं॥अर्धप्रसृतिमात्रंतस्यात्तदर्धंतुततःपरं॥२०॥गुदशौचमितिप्रोक्तंपादशौचमथोच्यते॥एकैकंपादयो
र्दद्यादष्टपोर्लिंगशौचवत्॥२१॥एतच्छौचंगृहस्थानांद्विगुणंब्रह्मचारिणां॥त्रिगुणंस्याद्वनस्थानांयतीनांच ६२

चतुर्गुणं॥२२॥दिवायद्विहितंशौचेतदर्धंनिशिकीर्तितं॥तदर्धमातुरेप्रोक्तमातुरस्यार्धमध्वनि॥२३॥कृत्वातुशौ
चंप्रक्ष्याल्यपादौहस्तौतुमृज्यतौ॥कृत्वोपवीतसव्येसेवाङ्मुनःस्वायसंयतः॥२४॥इतिशौचविधिःप्रोक्तः शुद्ध्य
र्थंद्विजन्मनां॥द्विजन्मनांद्विशुध्यर्थेअथाचमनमुच्यते॥२५॥शिखाकच्छविबद्धश्चद्युपवीतीसमाहितः॥
भूमौपादौप्रतिष्ठाप्यप्राङ्मुखोवाप्युदङ्मुखः॥२६॥प्रक्षाल्यपादौहस्तौचप्रभातेमुखमप्ययो॥रहितंबुद्बुदैःफे
नैःमलदुष्टैरमेद्यगैः॥२७॥निर्मलेशीतलेसुद्दक्षिणेनकरेणतु॥संहतांगुलिभिस्तोयंगृहीत्वादक्षिणेनतु॥२८
॥मुक्तांगुष्ठतुशेषेणाचमनंचरेत्॥प्रक्षाल्यहस्तौपीत्वाथसंकाच्योष्ठावतःपरं॥२९॥संहतांगुलिमूलेनत्रिःप्रमृ
ज्येनतोमुखं॥हस्तौप्रक्षाल्यचोन्मृज्यसंहतांगुलिभिर्मुखं॥३०॥प्रक्षाल्यहस्तौचाभ्युक्षेत्पादौशीर्षस्थमेवच॥संह
तांगुलिभिःपूर्वमस्यदेशमुपस्पृशेत्॥३१॥हस्तौप्रक्षाल्यसंस्पृष्ट्वाघ्राणादिद्वादशःपृथक्॥मध्येमध्येचप्रक्षाल्य
हंसवक्त्रेनमंस्पृशेत्॥३२॥अंगुष्ठानामिकाभ्यांचचक्षुःश्रोत्रेपृथक्पृथक्॥अंगुष्ठानासिकाभ्यांचनाभिंपश्चा
दुपस्पृशेत्॥३३॥तलेनहृदयंस्पृष्ट्वास्पृशेदंगुलिभिःशिरः॥अंगुल्यग्रैर्दक्षिणाद्यंबाहुमूलद्वयंस्पृशेत्॥३४॥

प्रदक्षिणेनहस्तस्थैरात्मानपरिषेचयेत्॥अनेनविधिनाविप्रःकुर्यादाचमनंसदा॥३५॥अंगानांस्पर्शनात्सद्यःप्रीताः
स्युःसर्वदेवता॥सद्यःशुद्धिमवाप्नोतिसंध्यादिषुचकर्मसु॥३६॥कृत्वाशौचोदिराचम्यकृत्वादौदंतधावनं॥पश्चाद्वादश
मंत्रैःशुद्धिंकृत्वादिराचमेत्॥३७॥ललाटेहृदिबाह्वोश्चऊर्ध्वंपुंद्वाणिधारयेत्॥चतुर्भिःसंकर्षणादिनामभिःस्वद
नादिभिः॥३८॥स्मृत्वोंकारंचगायत्रीनिबध्नीयाच्छिखांततः॥आचम्यप्राङ्मुखोभूत्वाकुशपाणिसमाहितः॥३९॥इ
तिशौनकीयेशौचादिदंतधावनं॥अथस्नानविधिंवक्ष्येशौनकोहंद्विजन्मनां॥समुद्रगानदीवापितडागंसरसीमथ
॥१॥उष्णोदकेनवाकुर्याद्रोगीनित्यमतंद्रितः॥स्नानसाधनमादायतीर्थंगत्वायथोदितं॥२॥ततीर्थतीरंप्रक्षाल्यनि
धायस्नानसाधनं॥प्रक्षालितांघ्रिपाणिस्तुदिराचम्याथमार्जयेत्॥३॥सपवित्रकरोभूत्वागुरुंनत्वादितत्परः॥नदी
तीरेशुचौदेशेप्राङ्मुखोवाप्युदङ्मुखः॥४॥गायत्र्यास्त्रेणमंत्रेणखनित्रेनावतीतले॥चतुरंगुलमुद्धृत्यततोमृत्स्नां
समाहितः॥५॥गायत्र्याचैवतद्धृत्वापूरयित्वामृदापुनः॥हस्ताभ्यांमृदमादायसदर्भकरएवच॥६॥निधायचपय
स्तीरेगायत्रीशिरसातनः॥प्राणायामत्रयंकृत्वास्नानंसंकल्पवाग्यतः॥७॥गायत्रीशिरसामंत्रैर्मृत्स्नांविभज्यतेत्रि

धा॥गायत्रीकरवचेनैद्यंगुल्यग्रैःसदर्भकैः॥८॥भागद्वयंततस्तस्यनक्षालयेद्दृढंमृज्यतं॥शिरःप्रभृतिनाभ्यंतंहस्ताभ्या
मुपलेपयत्॥९॥नाभेरधस्तात्तदांतंभागंचैवद्वितीयकं॥जलेस्नानमिदंकुर्याद्धस्तरूपमितिस्थितः॥१०॥उत्तीर्यवि
मृज्यदर्भान्दिराचम्ययथाविधि॥कृत्वादर्भानथस्नानंसमंत्रेणविधानतः॥११॥कुर्यात्तृतीयमुद्धृत्यागमादायास्त्रेणय
त्नतः॥वामपादेत्रिधाकृत्वाव्याहृत्यंगुलिभिःक्रमात्॥१२॥दक्षिणेस्थिरभागेनरक्षार्थंहिक्षुविक्षिपेत्॥तयोत्तरस्यांनि
क्षिप्यगांतत्रेणचवांभसि॥१३॥गायत्रीमंत्रितंशेषंहस्ताभ्यांसूर्यदर्शनं॥चतुर्विंशत्यसरायागायत्र्याप्रणवेनतु॥१४
॥शिरःप्रभृतपादांतसर्वांगमनुलेपयेत्॥सुमित्र्यानइतिमंत्रेणमृच्छेषंक्षालयेत्ततः॥१५॥प्रार्थयेद्वरुणंहाभ्यामव
तेहेळइत्यथ॥प्रसमुन्नेद्वृहत्सूक्तमष्टर्चंवारुणंजपेत्॥१६॥ममुद्रादूर्मिरित्यस्यसूक्तमेकादशर्चकं॥आपोअस्मा
न्मातरइत्यर्चंपंचजपेन्नरः॥१७॥याःप्रवतइत्यनयाप्रार्थयेत्तुनदीततः॥अवगाह्यनिमज्याथदिराचम्यायमार्ज
येत्॥१८॥अंबयोयंत्यचश्वाशौआपोहिनवभिस्ततः॥इमंमेगंगेतिमंत्रेणजलत्रिरवलोडयेत्॥१९॥अंतर्जलेजपे
न्मंत्रंऋतंचेतित्रिवारकं॥कुर्याद्दशभिस्नानंनामभिःकेशवादिभिः॥२०॥आचम्यकरशुद्धिंचविधायैपंचमंत्र

थित॥हस्ताभ्यांजलमादायसदेवाभिसमंत्रितं॥मस्तकेचमुखेबाहोर्हृदयेदृष्टदेशकैः॥२२॥अभिषिंचेत्त्वमात्मानगा
यत्र्यायेतिमुद्रया॥एकाहत्यंजेत्पूर्वंतद्दिनेकृत्तिंततः॥२३॥अग्नेरक्षाणोअंहसोयत्किंचेदमृतंतथा॥अक्षतो
दकपूर्णेनदेवतीर्थेनतत्रकैः॥२४॥ब्रह्मादितर्पणंकुर्यात्प्राङ्मुखश्चोपवीत्यथउदङ्मुखोनिवीतीचयवमिश्रतिलै
स्तथा॥२५॥कृष्णद्वैपायनादींश्चतर्पयेदृषितीर्थतः॥दक्षिणाभिमुखोभूत्वाप्राचीनावीत्यतःपरं॥२६॥तर्पयेत्पितृ
तीर्थेनतिलमिश्रजलैस्त्रतः॥पितृश्चसोमःपितृमानितिपंचदशैःपृथक्॥२७॥उशीर्यपीडयेद्वस्त्रंमंत्रितोदक्षिणेा
त्रतः॥येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृतः॥२८॥तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोदकं॥दर्भान्विसृज्यत
तीरेद्युपवीतिदिराचमेत्॥२९॥अक्लिन्नवस्त्रंसंप्रोक्ष्यशुचीवदृतिमंत्रितः॥वस्त्रमाच्छाद्यचाचामेद्युवंवस्त्राणिमं
त्रतःकालेविशेषोस्तिसविशेषस्तथोच्यते॥प्रातस्नानंदिनंकुर्याद्रोमयेनसदाबुधैः॥३१॥ऊषःकालादिगृह्णीया
वदस्तमनंतवे॥स्वस्थलंगोमयग्राह्यंभूमौतुपतितेतवा॥३२॥उपर्यधश्चसंस्पृश्यप्रत्यग्रंतुवर्जितं॥आदीयगो
मयंविप्रोवामपाणौनिधायच॥३३॥व्याहृत्यात्रिधाकृत्वानिक्षिपेत्रणवेनतु॥मानस्तोकेतिमंत्रेणशेषंचैवाभि

मंत्र्यच॥३४॥मूर्धादिपादपर्यंतंहस्ताभ्यांससमाहितः॥गंधद्वारामित्यनयासर्वांगमनुलेपयेत्॥३५॥वरुणप्रार्थ
नारीतिसर्वेमंत्राणिपूर्ववत्॥निष्पीड्यवस्त्रमाचम्यततःसंध्याविधीयते॥३६॥मध्याह्नेतर्पणादूर्ध्वंवस्त्रनिष्पी
डनंभवेत्॥धारयेदूर्ध्वपुंड्राणिनामभिःकेशवादिभिः॥३७॥संकर्षणादिभिःकृष्णेशुक्लैर्वैकेशवादिभिः॥चंदनेन
मृदावापिमंत्रपूतेनभस्मना॥३८॥नदीवान्येषुतीर्थेषुस्नायाद्विधिसमन्वितः॥गतप्रत्यागतंनद्यांनिषिद्धंस्नानक
र्मणि॥३९॥वापीकूपतडागेषुनस्नायादप्रतिष्ठिते॥शाल्मलीतिंतीणीनिंबकरंजंचहरीतकी॥४०॥कंदकीपु
ष्पदावाचकोविदारकपित्थके॥शमीमरोमरेलकेबदरीचविभीतकी॥४१॥शैल्यरंवादिरकादक्षाच्छायास्नानंवि
वर्जयेत्॥अनेनविधिनास्नानंसर्वपापप्रणाशनं॥४२॥धन्ययशश्चमायुष्यमारोग्यंपुष्टिवर्धनं॥गुरुणाद
शस्नानपस्यपुंसांस्फुरंचतेजश्चबलंचशौचं॥४३॥आयुष्यमारोग्यमलोलुपत्वंदुःस्वप्ननाशश्चमेधा॥स्त्रा
नांगतर्पणंकृत्वायःस्नाणेजलमाहरेत्॥४४॥अन्यथाकुरुतेयस्तुस्नानस्यास्यफलंभवेत्॥४५॥ ॥इति
स्नानविधिः॥ ॥अथवस्येवहृचानांसंध्याकर्मविधिक्रमं॥मैत्रेसवर्णकीनोचसर्वेषांचतुराश्रमदास्त्रिमो

॥१॥यत्संध्यावंदनंसर्वस्मृतिरत्नतयोच्यते॥तत्रानामंतिकंप्राप्यब्रह्मसूत्रधरोभवेत्॥२॥नासिकामंगुलीभिश्चत
र्जनीमध्यमाहते॥दक्षिणेनसमाहृष्यसव्येनतुविसर्जयेत्॥३॥प्रणवव्याहृतीसप्तगायत्रीशिरसासहः॥त्रिःपठे
दायतःप्रातःप्राणायामःसउच्यते॥४॥शनैर्नासापुटेवायुमुत्सृजंननुवेगतः॥नकंपयेच्छरीरंतुसयोगीपरमोम
तः॥५॥प्राणानायम्यविधिवद्वाक्यतःसज्जितेन्द्रियः॥वामेनपूरयेद्वायुंदक्षिणेननुरेचयेत्॥६॥कुंभकेनजपं
कुर्यात्प्राणायामस्यलक्षणं॥अथमंध्यामुपासिष्याइतिसंकल्प्यमार्जयेत्॥७॥तिसृभिर्मार्जनंकुर्यादापोहीति
कुशोदकैः॥पादेपादेक्षिपेन्मूर्ध्निप्रतिप्रणवसंयुतं॥८॥आत्मानंप्रणवेनैवपरिषिंचेज्जलेसतः॥सूर्यश्चेत्यनु
वाकेनप्रातःकालेपिबेदपः॥९॥अग्निश्चेत्यनुवाकेनसायंकालेपिबेदपः॥आपःपुनंतुमध्याङ्गेमंत्राचमन
माचरेत्॥१०॥विसृज्यदर्भानाचम्यकुशपाणिश्चमार्जयेत्॥प्रणवेनैवव्याहृत्यागायत्र्याप्रणवाद्यथा॥११॥आ
पोहिष्ठेनसूक्तेनमार्जनाहिचतुर्थकं॥सूक्तादौप्रणवंचोक्त्वाऋचांतेमार्जनंततः॥१२॥उद्धृत्यदक्षिणेनैवजलगो
कर्णवत्करः॥निधायनासिकाग्रेतुपापपूरुषसंस्मरन्॥१३॥ऋचंचैकामृचंवापिद्विपदावाजपेदृचं॥द्रक्ष्यंना



मापुटेनैवपापात्मानंचवोहरेत्॥१४॥तज्जलंवामतोक्ष्यायवामभागेक्षितौक्षिपेत्॥विसृज्यदर्भास्त्रेवधृत्वादर्भानतःप
रं॥१५॥पाणिभ्यांजलमादायगायत्र्याचाभिमंत्रितं॥खेरभिमुखंतिष्ठन्त्रिरूर्ध्वंसंध्ययोःक्षिपेत्॥१६॥असावादित्य
मंत्रेणप्रदक्षिणमतःपरं॥अपःस्पृष्ट्वादक्षिणेतुपश्चाद्दर्भान्विसर्जयेत्॥१७॥धृत्वापवित्रंप्रोक्षेज्जपस्थानकुशो
दकैः॥आधारादिनमस्कृत्यकुशाग्रेसनंततः॥१८॥बध्वापद्मासनेवापिस्वस्तिकेवायथासुखं॥देशोष्टधाविभ
क्तायप्रतीच्याभागसप्तकं॥हित्वादक्षिणतोन्यस्तुयोष्टमोभागउत्तरः॥अस्याभिमुखतोविप्रोभूत्वाप्रयतमानसः
॥२०॥जपन्नासीससावित्रीसंध्याकृत्तमतंद्रितः॥प्रभातकालेचागत्यपुरस्तादुदकांतिकं॥२१॥सवोष्युदककार्
योणिसापंसंध्यावदाचरेत्॥अपामाचमनंकृत्वासूर्यश्चेत्यनुवाकतः॥२२॥पूर्वोत्तराशाभिमुख्योभूत्वाप्रयतमान
सः॥जपंस्तिष्ठेत्सावित्रीमध्यात्तांसकलांततः॥२३॥प्राणायामत्रयंकृत्वायथाविधिमतंद्रितः॥अहोरात्रकृतंपा
पंतत्क्षणादेवनश्यति॥२४॥प्राणायामेयमात्मानंसंयम्यास्मिपुनःपुनः॥दशाब्दादशभिर्वापिचतुस्त्रिर्वापरंतपः
॥२५॥ओंकारपूर्वकास्तिस्रोमहाव्याहृतयस्तथा॥त्रिपदाचैवगायत्रीविज्ञेयाब्रह्मणोमुखं॥२६॥ओंभूर्भुवः

स्मरोमितिजप्त्वारुत्वासनंततः॥व्याहृतिभिर्हविन्यस्यसावित्र्यायषडंगकं॥२७॥प्राणायामंधारयेत्त्रिर्यथाविधि
समाहितः॥आयात्वित्यनुवाकेनसावित्रीमावाहयेत्क्रमात्॥२८॥सऋष्यादीनिचस्मृत्वासामासानोजपेत्सदा॥
सायंप्रातश्चमध्यांह्नेसावित्रीवाग्यतोजपेत्॥२९॥सर्वेयज्ञाज्जपयज्ञोविशिष्टोदशभिर्गुणैः॥उपांशुस्याच्छत
गुणंसहस्रंमानसस्मृतः॥३०॥सहस्रंपरमंदेवीशतमध्यं—चरं॥युद्धिकाःप्रयुंजीसर्वपापप्रणाशिनी॥३१॥
ऋष्यादिलक्षणंप्रोक्तंगुरुप्रोक्तेनमार्गतः॥षडंगमंत्रैर्विन्यस्ययोनिमुद्रांप्रदर्शयेत्॥३२॥गायत्रींसंस्मरेद्वीमा
नुदित्वासूर्यमंडले॥कल्योत्कलक्षणेनैवध्यात्वाभ्यर्चततोजपेत्॥३३॥नमःसंवरणाशौचंमौनंमंत्रार्थचिंत
नं॥अभ्यर्थनंत्वमनिर्वेदोजपेत्संपत्तिहेतवे॥३४॥प्रातस्तिष्ठंजपेद्विप्रःसायंचैवोपविश्यच॥उपविश्यचमध्यां
ह्नेजपकर्मसमारभेत्॥३५॥अष्टोत्तरशतंनित्यंअष्टाविंशतिमेवच॥विधानाद्दशकंवापित्रिःकालेषुजपेद्वि
जः॥३६॥कृत्वोत्तानौकरौप्रातर्सायंचाधोमुखौततः॥मध्यतध्वराभ्यांतुजपेवमुदाहृतः॥३७॥नक्षत्रदर्शो
नादूर्ध्वंजपेदासूर्यदर्शनात्॥अर्घ्यस्तमितआदित्येजपेदाऋक्षदर्शनात्॥३८॥ततउद्वास्यसावित्रीमुत्तमे ६६

त्यनुवाकतः॥सायंप्रातरुपस्थानंकुर्यान्मंत्रैर्यथाक्रमं॥३९॥जातवेदसइत्येकातच्छंयोरावृणीमहे॥नमोब्रह्म
णइत्येतानुपतिष्ठेद्दिशांप्रति॥४०॥इमंमेवरुणेत्येतिसायंकालेविशेषतः॥मित्रस्यचर्षणीद्वाभ्यांप्रातःकालेवि
शेषतः॥४१॥आत्मपादौततोभूमिंसंध्याकालेभिवादयेत्॥नत्वागुरुंतथासूर्यंद्विजांश्चापिविशेषतः॥४२॥मध्यां
ह्नेतुविशेषोयमुपस्थानंतथार्घ्यकं॥अपामंजलिसंपूर्णमाकण्ठंनैतिचक्षिपेत्॥४३॥सवितुर्मंडलंपश्यन्नुप
तिष्ठेद्दिवाकरं॥ऊर्ध्वबाहुःपठेत्सूक्तमुदुत्यंजातवेदसं॥४४॥सूक्तंहिचित्रंदेवानांतच्चक्षुरितिमंत्रतः॥एवमन्या
निमौनीगणिजपन्यश्येद्दिवाकरं॥४५॥पित्र्यंगभृष्टिमंत्रेणमुखंस्पृष्ट्वाप्रदक्षिणं॥भद्रंकर्णेतिमंत्रेणकर्णौस्पृष्ट्वा
प्रदक्षिणं॥४६॥केश्याग्निमितिमंत्रेणशिखांस्पृष्ट्वाप्रदक्षिणं॥अनेनविधिनाविप्रःसंध्योपास्तिंकरोतियः॥४७
॥सर्वपापैःप्रमुच्येतमज्ञीवेशरदंशतं॥ ॥इतिशौनकीयेसंध्याविधिः॥ ॥अथसावित्र्याःकल्पंचवक्ष्याम्यभिमतः
परं॥संहिताध्ययनंकृत्वापुरश्चरणमिद्धये॥१॥प्रातर्विप्रःशुचिस्नातोहविष्याशीजितेंद्रियः॥शुचौदेशेसमासीनो
जपेतनियतव्रतः॥२॥ओंकारंव्याहृतिस्तिस्रःसावित्रीवेदमातरं॥मनसैतामनुद्धृत्यजपेतनियतव्रतः॥३॥अष्टो

नरसहस्रंवाशतमष्टोत्तरंतुवा॥ अग्नेणतपसादृष्टविघ्नमित्रेणधीमता॥ ४॥होमाश्चजपयज्ञाश्चनित्यकुर्व्रतवैनया
॥सर्वकर्मसमृध्यर्थंपरंब्रह्मेदमुच्यते॥ ५॥एषवैप्रतिलोमोक्तापाठाच्छत्रुविनाशिनी॥ अक्षरप्रतिलोमेनयस्मि
न्युज्येनकर्मणि॥ ६॥तदेमांविजानीयादेतद्विब्रह्मणोमतं॥ बिभीतकेध्मसमिधाश्चाक्षरप्रतिलोमया॥ ७॥जु
हुयात्सार्षपंतैलंबिभीतकफलंतथा॥ यइच्छेत्पीडनंत्रात्रोरपिवोत्सादनंपुनः॥ ८॥पच्छशःपीडयेच्छत्रू
णशश्चप्रमापयेत्॥ अनयायोभिषिच्येतभूपतिःप्रयतोन्वहं॥ ९॥तस्यायुःकीर्तिरारोग्यंभविष्यतिनसंशयः॥क
पिलाज्येनयःकुर्याद्धोममष्टोत्तराकृतीः॥ १०॥तस्यकामाःप्रसिध्यंतिषण्मासादेवजुह्वतः॥ कृच्छ्रंचांद्रायणंवा
पिकृत्वाहोमंसमारभेत्॥ ११॥ ॥इतिशौनकीयेगायत्रीकल्पः॥ ॥ज्ञातवेदसइत्येतत्सूक्तंसर्वार्थसाधने॥ आ
युरारोग्यसुखदंभूमिदंशत्रुनाशनं॥ १॥यद्यद्वांच्छतिवाविप्रतत्तदाप्नोत्यसंशयः॥ सूक्तेनानेनजुह्वच्छुक्लां
बरधरःशुचिः॥ २॥जपेद्वानियतोमंत्रहविष्याशीजितेंद्रियः॥ पशुपुत्रधनार्थंचप्रत्येकंलक्षमभ्यसेत्॥ ३॥स

र्वेषामेवदेवानांविशिष्टदेवतालयं॥ तस्माद्देवालयेकुर्वंस्तद्विशिष्टफलमश्नुते॥ ४॥ततःप्राचीप्रशस्तादिग्

ग्नेयीचविशेषतः॥ प्रतीचीवायवीयांचत्रैष्टोभ्याचदिक्सदा॥ ५॥ऐशानीत्वभिचोरचविज्ञेयेपिविशिष्यते॥ कुंडे
वास्थंडिलेवापिहोमंकुर्यादतंद्रितः॥ ६॥चतुरस्रंभवेत्कुंडंमूस्वलाद्दयसंयुतं॥ स्थंडिल्यांज्यभागांतेयज्ञंयत्रप्रक
ल्पयेत्॥ ७॥महाद्विजःशुचिर्दांतःसर्वभूतहितेरतः॥ दुर्गामावाहयेत्कुंडेसायुधाष्टमहाभुजः॥ ८॥नीलोत्पल
दलश्यामांकिरीटांद्येर्विभूषितं॥ ततश्चाराध्यतांदेवींतस्मिंस्तीर्योदकान्विते॥ ९॥आज्येनहविषाचैवसमिद्भिश्चष्ट
थक्॥ मंत्रेणानेनजुह्वद्यादष्टोत्तरशताकृतीः॥ १०॥ततःसिष्टकृतंचैवहोमशेषंसमापयेत्॥ उत्थाप्यायजेपन्मंत्र
मेतद्भक्तिसमन्वितं॥ ११॥प्रमीदत्वंज्ञातवेदादुर्गाचवरदाभव॥ त्वत्प्रसादाच्चसर्वत्रवांछितंमेस्तुसर्वदा॥ १२॥राज्ञा
चैवविभृत्यर्थंप्रतिसंवत्सरंबुधः॥ कारयित्वाविधानेनसर्वान्कामानवाप्नुयात्॥ १३॥ ॥इतिज्ञातवेदसकल्पः॥ ॥
त्र्यंबकस्यचमंत्रस्यकल्पंवक्ष्यामिशौनकः॥ प्रसन्नोब्राह्मणंकुर्यात्पुरश्चरणमादितः॥ १॥पश्चिमद्वारमाश्रि
त्यभोगायतनंमहत्॥ तस्यपूर्वोत्तरेकृत्वाहोमंकुंडंद्विमेखलं॥ २॥मथित्वाग्निमाधाययज्ञतंत्रंप्रकल्पयेत्॥
मंत्रेणानेनजुह्वद्याद्विरष्टसहस्रकं॥ ३॥पायसंघृतसंयुक्तमायुष्कामोद्विजस्त्वयं॥ पुत्रार्थीज्ञालिबीजेनधना

थ३विल्वपत्रकं।।४।।पसुकामो घृतेनैव वर्षेकामस्तुवेतसैः।।विद्याकामस्तुपालाशैर्विप्रः कुर्यात्समाहितः।।५।।
जपेद्दानियतोनित्यमतान्कामानवाप्नुयात्।।अनपायोभिषिक्तस्तुदीर्घमायुरवाप्नुयात्।।६।।महादेवसमाराध्य
त्र्यंबकंचमृत्युंजपेत्।।सर्वान्कामानवाप्नोतिशंभोस्तस्यप्रसादतः।।७।। ।।इतिशैवनकीयेत्र्यंबककल्पः।। ।।शै
वकोहंप्रवक्ष्यामिपुरुषसूक्तार्चनंविधिं।।उत्थायपश्चिमेयामेशुचिर्भूत्वासमाहितः।।१।।गुरुंप्रणम्यपूजात्मा
त्रिकालार्चनमाचरेत्।।प्रातर्मध्यंदिनंसायंविष्णुपूजांसमाचरेत्।।२।।यथासंध्यातथानित्यंदेवपूजांतथाविधैः।।अर्घ
कौविस्तरेणैवततःसंपूज्यकेशवं।।३।।मध्यांकृत्वैवसंध्यांचप्रातःपुष्पांजलिंक्षिपेत्।।मध्यांकृविस्तरेणैवसंक्षेपेणाथवाम्यहं।।४।।संपूज्यभोजनंकुर्यादन्यथानरकंव्रजेत्।।नदीकूपतडागादिह्रदेप्रस्रवणेतथा।।५।।
स्नात्वापथोक्तविधिनाप्राङ्मुखःस्वस्थमानसः।।तीर्थाभिषेकपूजात्माहृत्वाचैवोर्ध्वपुंड्रकं।।६।।भूषणाद्यैरलंकृ
त्यदुकूलादीश्चधारयेत्।।मौक्तिकंचप्रवालंचपद्माक्षंतुलसीमणि।।जपपूजनवेलायांधारितोयःसवैद्विजः।।प
वित्रपाणिःपूतात्मापमस्यस्वस्तिकासने।।८।।उपविश्यस्वशास्त्रोक्तःक्रियाःकृत्वाग्निहोत्रिकाः।।धारपेदक्षमा

लांचपद्माक्षंवाथधारयेत्।।९।।कुर्यादाराधनंविष्णोर्देवदेवस्यचक्रिणः।।प्रक्षाल्यपादौहस्तौचाचम्यप्रतःशु
चिः।।१०।।पूजागृहप्रविश्यायमंडलंपरिकल्प्यच।।सौवर्णंचचतुर्द्वारंसप्राकारंचविस्तरं।।११।।मंडपंरचयित्वा
तुवितानध्वजतोरणैः।।अपसर्पंतुमंत्रेणसर्वेविघ्ननिवार्यंच।।१२।।अपसर्पंतुयेभूतायेभूताभुविसंस्थितः।ये
भूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया।।१३।।नाराचास्त्रयोनिमुद्रांचक्रमुद्रांप्रदर्शयेत्।।सुस्थिरोभवदेशानो
भवमाराक्षरक्षर।।१४।।दिव्यंतरिक्षभूमिष्ठाविघ्नान्स्त्रुवेणवारयेत्।।स्त्रुवेणमर्यंचतुर्द्वारंपूतंविमलशोभितं।।१५
।।नयनंमीलनंकृत्वारचितंमंडलंस्मरन्।।नानारत्नैश्चरचितंमौक्तिकैरुपशोभितं।।१६।।ध्यात्वासिंहासनंम
ध्येद्वारपालान्प्रपूजयेत्।।पूजयेद्गणपंभानुंमणिकंस्वामिनंतथा।।१७।।क्षेत्रपालंचधातारंविधातारमनंतरं।।
चतुर्द्वारंकणेदेशेणनाद्वारान्प्रपूजयेत्।।१८।।ततःकुर्याद्वारमुख्यान्भद्रादीनर्चयेत्पथक्।।भद्रंसुभद्रंगंगाचय
मुनाद्वारशारवयोः।।१९।।चतुर्थ्यंतेनमोंतंचप्राग्द्वारंसंप्रपूजयेत्।।वलप्रवलचिच्छक्तिमायाशक्तिंतथैव
च।।२०।।चतुर्थ्यंतेनमोंतंचदक्षिणेसंप्रपूजयेत्।।चंडंप्रचंडंगौरीचश्रियंपश्चिमशारवयोः।।२१।।चतुर्थ्यंतं

नमोंतेचपश्चिमेसंप्रपूजयेत्॥जयंचविजयंचैवपद्मशंखनिधिंतथा॥२२॥चतुर्थ्यंतेनमोंतेचउत्तरेसंप्रपूज
येत्॥वामंतुसक्थतीकृत्यदक्षिणेचप्रदेशयेत्॥अंतस्थविघ्नानुत्सार्यअस्त्रमंत्रंसमुच्चरन्॥दक्षिणस्यतुपाद
स्यूर्ध्वाग्रेघातपुरःसरं॥२४॥उपविश्यासमेशुद्धेप्राणानायम्ययत्नतः॥धर्मार्थकाममोक्षार्थंविधिमंकल्प
पूर्वकं॥२५॥कृत्वातुभूतशुद्धिंचमातृकान्यासमाचरेत्॥वायुबीजेनसंशोध्यअग्निबीजेननंदहेत्॥२६॥अ
मृतव्यामृतबीजेनभूतशुद्धविधिःक्रमः॥कारयेन्मातृकान्यासंऋषिच्छंदोधिदैवतं॥२७॥स्थानंमंत्रंतथान्या
संविद्धंतंविन्यसेत्क्रमात्॥अस्यब्रह्माऋषिश्चैवगायत्रीच्छंदइष्यते॥२८॥श्रीमातृकासरस्वतीदेवतेतिप्रकी
र्तिताः॥ओंकारंबिंदुसहितंबीजमेवेतिकीर्तनं॥२९॥द्विबिंदुसहिताकारंशक्तिरित्यभिधीयते॥नममुखस्तो
चचक्षुषोश्रवणद्वये॥३०॥नासोगंडोष्ठदंतंचपुनर्मूर्ध्निमुखेतथा॥शेषतंधिषुचाग्रेषुपार्श्वयोःपृष्ठनाभिनि
॥३१॥जठरेहृदिदोर्मूलेगलेपरेतुकक्षयोः॥हृदादिपाणयोःपादजठराननयोन्यसेत्॥३२॥अकारादिहका
रांतंमातृकामंत्रईरितः॥इमंमंत्रंजपेद्यस्तुसर्वाभीष्टफलप्रदं॥३३॥ऋषिमूर्धिमुखेछंदोदेवताहृदिविन्य ६९

सेत्॥भानोभद्रस्यसूक्तस्यत्रिष्टुबंतस्यदेवता॥३४॥पुरुषोयाजगद्बीजंऋषिर्नारायणस्मृता॥अंगुष्ठाग्रेतुगो
विंदंतर्जन्योतुमहीधरं॥३५॥मध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमं॥कनिष्ठिक्योन्यसेद्विष्णुंकमध्येतु
माधवं॥३६॥एवंन्यासंपुराकृत्वादेहांगंन्यासमारभेत्॥मस्तकेकेशवंन्यस्यभालेनारायणंतथा॥३७॥मा
धवंकर्णयोरक्ष्णोर्गोविंदंविष्णुनासयोः॥मुखेतुमधुसूदंचकंठदेशेत्रिविक्रमं॥३८॥वामनंविन्यसेद्बाहौ
श्रीधरंहृदिविन्यसेत्॥नाभौविद्याहृषीकेशंवद्यांवैपद्यांवैपद्मनाभकं॥३९॥दामोदरंपादयोश्चन्यासंक्र
दशमाचरेत्॥पुरुषसूक्तर्षोडशभिसर्वांगंन्यासमाचरेत्॥४०॥सहस्रशीर्षावामकरेपुरुषएवेतिदक्षिणे॥
एतावान्वामपादेतुत्रिपादूर्ध्वमितिदक्षिणे॥४१॥तस्माद्विराड्वामजानौयत्पुरुषेतिदक्षिणे॥एतावान्वामपा
देतुत्रिपादूर्ध्वमितिदक्षिणे॥४१॥तस्माद्विराड्वामजानौयत्पुरुषेतिदक्षिणे॥तयज्ञंवामकद्दातुतस्माद्यज्ञात्तु
दक्षिणे॥४२॥तस्माद्यज्ञात्तामिमध्येतस्माद्दश्वाहृदिन्यसेत्॥यत्पुरुषंकंठदेशेब्राह्मणोस्यमुखोन्यसेत्॥४३
॥चंद्रमादक्षिणेन्यस्यनाभ्याआसीमुखेन्यसेत्॥मुखादस्यामभ्रुवोर्मध्येयज्ञेनेतिचमूर्धनि॥४४॥ततःषडं

गंन्यासंचऋग्भिःकुर्याद्यथाक्रमं॥अतोरेवाइतिहृदयेइदंविष्णुशिरस्तथा॥४५॥त्रीणिपदेतिशिखायांविष्णो
कर्मणिचमैकं॥तद्दिग्बंधःपरमंनेत्रेनदिप्रासस्तुअस्त्रकं॥४६॥इत्थंन्यासंपुराकृत्वापश्चाद्दिग्बंधनंचरेत्॥अ
थात्मरक्षान्यासश्चप्रोच्यतेचयथाक्रमं॥४७॥पुरस्तात्केशवःपातुचक्रीजांबूदनप्रभः॥पश्चान्नारायणःपा
तुशंखीजीमूतसंनिभः॥४८॥ऊर्ध्वपातुगदाराजोमाधवेंदीवरप्रदः॥दक्षिणेपातुगोविंदोधन्वीजीवसमप्र
भः॥४९॥वामेपातुबलीविष्णुःपद्मकिंजल्कसंनिभः॥आविंदामाग्नेयांमुसलीमधुसूदनः॥५०॥त्रिविक्रमो
सिनैर्ऋत्यांकेजलसाकसंनिभः॥पद्मराजाप्रभुरीशान्यांश्रीधरःपद्मशायुधः॥५१॥विद्युत्प्रभोहृषीकेशआधो
मुकुरमायुधः॥हत्यद्मेपद्मनाभस्तुसहस्राकेसमप्रभः॥५२॥दामोदरस्तुसर्वांगेआत्मानंपातुनित्यशः॥इदं
सर्वबाधाच्छिद्रंनामदादशपंजरं॥५३॥प्रविष्टोहन्यसेत्किंचिद्वयंनास्तिकदाचन॥एवंदिग्बंधनंकृत्वागाय
त्र्याचन्यसेततः॥५४॥अग्नेरुदकस्यकलशंमस्त्रेणप्रोक्षयेद्हिः॥अंतःकवचमंत्रेणहन्मंत्रेणप्रपूजयेत्॥५५॥
गंधादिभिःसमभ्यर्चब्रह्माविष्णुशिवैस्त्रिभिः॥निरीक्षणादिकंकुर्याच्चतुर्मुद्रेणरक्षयेत्॥५६॥धेनुमुद्रामृती

GURU GOPINATH MEMORIAL

हत्यनार्घ्यमुद्रेणनिर्दिशेत्॥इमंमेगंगेमंत्रेणतीर्थान्यावाहयेततः॥५७॥गायत्र्यादशवारंणाभिमंत्र्यजलंसुधीः
॥कलशस्थमुरवेविष्णुंकंठेरुद्रंसमाश्रितं॥५८॥मूलेतत्रस्थितोब्रह्माममध्येमातृगास्मृताः॥कुक्षौतुसागराःस
र्वेसप्तद्वीपावसुंधराः॥५९॥ऋग्वेदोयजुर्वेदःसामवेदोह्यथर्वणः॥अंगैश्चसहिताःसर्वेकलशंतुसमाश्रि
ताः॥६०॥अत्रगायत्रीसावित्रीतथैवचसरस्वती॥सर्वेपापक्षयकरीशांतिःपुष्टिकरीतथा॥६१॥आयांतुयज
मानस्यदुरितक्षयकारकाः॥एतन्मंत्रस्थितादेवासंपूज्यप्रार्थयेत्क्रमात्॥६२॥शंखस्यबहिरस्त्रेणसंरक्ष्यान्त
स्तुवर्मणा॥हन्मंत्रेणसमापूर्यगंधाद्यैरर्चयेततः॥६३॥शंखमुद्रांप्रकुर्वाणोमंत्रैश्चप्रार्थयेततः॥त्वंपुरासाग
रोत्पन्नोविष्णुनाविधृतःकरे॥६४॥नमितःसर्वदेवैश्चपांचजन्यनमोस्तुते॥गर्भादेवारिनारीणांविशीर्यंतेसह
स्रधा॥६५॥तवनादेनपातालेपांचजन्यनमोस्तुते॥एथिव्यांयानितीर्थानिवासुदेवस्यचाज्ञया॥६६॥शंखेति
विप्रेद्वास्तस्माच्छंखंप्रपूजयेत्॥अभिमंत्र्याशंगायत्र्यादेवशंखेत्रियान्यसेत्॥६७॥शंखोदकेनचात्मानंमंडपं
द्रव्यमूर्मिकं॥सर्वमंप्रोक्ष्यचास्त्रेणआत्मपूजांसमाचरेत्॥६८॥आत्मांतरात्मापरमज्ञानात्मानंप्रपूजयेत्॥

गंधादिरर्चयेद्देवेरर्चयेदष्टपत्रकं॥६९॥कर्णिकंसंविलिख्याथमूर्द्धहस्तंविनिक्षिपेत्॥अच्युतोहमनंतोहंब्रह्मा
त्माध्यानपूर्वकं॥७०॥भावयित्वाविसृज्याथपुष्पमाघ्रायदक्षिणे॥भूसुध्यर्थंयागभूमिंगंधाद्यैरर्चयेज्जपेत्
॥७१॥स्योनापृथिविमंत्रेणअर्घ्यपाद्यार्थमेवच॥आचाममधुपर्कार्थंचतुष्पात्रंप्रपूजयेत्॥७२॥त्रास्त्रव
क्षालयेद्द्रव्यंगंधपुष्पैःसमर्चयेत्॥तत्रार्घ्यपात्रेदातव्यागंधपुष्पयवाक्षताः॥७३॥कुशाग्रतिलदूर्वाश्चस
र्षपाश्चार्घ्यसिद्धये॥पाद्यपात्रेप्रदातव्यादूर्वाश्यामाकमेनच॥७४॥पद्माचविष्णुकांताचपाद्यसिद्धौप्रक
ल्पयेत्॥एलालवंगकर्पूरकंकोलजातिकंफलं॥७५॥सुरास्यांचैवषट्द्रव्यानिधायाचामपात्रके॥दध्ना
चमधुसर्पिर्भ्यांमधुपर्कोभविष्यति॥७६॥प्रथमंप्रणवेनाथगायत्र्यावाभिमंत्रयेत्॥पुनर्व्याहृतिगायत्र्याग
वंपात्रचतुष्टयं॥७७॥विभूषणंगंधवस्त्रंपुष्पमाल्यांचपत्रकं॥पूजोपकरणंसर्वंगायत्र्यैवस्पृशेन्मतं॥
७८॥पंचामृताभिषेकार्थंनवकाष्ठान्नवेकुशे॥मध्यंप्राग्यमसौम्यापःक्षीरादीन्मूर्ध्वनिक्षिपेत्॥७९॥शं
स्यामलकंपिष्टमष्टगंधैरकंतथा॥विदिक्षुस्थितपात्राणिपूजयेद्गंधपुष्पकैः॥८०॥विद्याविद्याप्रकृत्याथमा ७१

यातेजःप्रबोधिनी॥रजसत्वतमश्चैतानवकोष्ठाधिदेवताः॥८१॥संकर्षणादिनामानिकोष्टपत्रेषुचक्रमात्॥नेत्रेक्षणे
चक्ररक्षाधेनुमुद्रांतथैवच॥८२॥तार्क्ष्यमुद्रातथाकुर्याद्गायत्र्यावाभिमंत्रणं॥त्रास्त्रारकेनपीठंतेमस्त्रेणप्रोक्ष
येत्ततः॥८३॥आधारशक्तिःप्रकृतिःकूर्मोनंतोवराहकः॥पृथिवीक्षीरार्णवश्चैतद्विपश्चेतितथैवच॥८४॥सुव
र्णमंडपश्चैवहेमप्राकारइष्यते॥सुवर्णवेदिकांमध्येयंत्रेसिंहासनंयजेत्॥८५॥पूजामंत्रप्रसिध्यर्थंगुरुंपीठस्य
दक्षिणेदुर्गांविघ्नक्षेत्रपालंवामेचाग्नेकगरुत्मकं॥८६॥विष्वक्सेनंचईशान्येसंपूज्यप्रार्थयेत्क्रमात्॥धर्मज्ञा
नंचवैराग्यमैश्वर्यंदिक्षुचार्चयेत्॥८७॥आकारपूर्वकानेतान्विदिक्षुतथपूजयेत्॥मध्येकंदमूलनालंपद्मप
त्रंमकेसरं॥८८॥कर्णिकामध्यदेशेतुसूर्यसोमाग्निमंडलं॥शक्तिमंडलकंब्रह्मविष्वीशपरमास्तथा॥८९॥एता
न्येवमंडलाधीशानुपर्युपरिपूजयेत्॥ऋग्वेदादिचतुर्वेदानामर्चितयमेवच॥९०॥वृतत्रेतोद्वापरंचकलिमत्वंरज
स्तमः॥अणिमागरिमाचैवलघिमामहिमातथा॥९१॥प्राप्तिःकाम्यममासित्ववशित्वंभूतिरष्टकं॥चतुर्थ्यंतंनमोंतं
चपद्ममध्येप्रपूजयेत्॥९२॥विमलोत्कर्षिणीज्ञानाक्रियायोगातथैवच॥प्रह्वीसत्यातथेशानानुग्रहानवशा

क्रयः॥९३॥एताःसंपूज्यपीठस्यपूर्वादौतुयथाक्रमं॥प्रणवेनतुसंमंत्रीभगवान्विष्णुसंयुतः॥९४॥सर्वभूतात्मसंयो
गोवासुदेवस्यरूपवान्॥योगपीठंपद्मजात्मात्मानमितिमन्यते॥९५॥नाभिमध्येस्थितंपद्मंकर्णिकाकेसरे
स्थितं॥अष्टैश्वर्यसमायुक्तंश्वेतमत्यंतनिर्मलं॥९६॥श्वेतांबुस्यपद्मकरंगदिनंशंखचक्रिणं॥स्फुद्स्फटिकसं
काशंसर्वाभरणभूषितं॥९७॥वनमालाधरंदेवंध्यायेन्नागयणंप्रभुं॥मानसैरुपचारैश्चपूजासम्यक्सम्यक्स
माचरेत्॥९८॥बहिर्योगप्रसिध्यर्थंमुच्चरन्प्रणवंतथा॥देवंसुषुम्नामार्गेणआनीयब्रह्मरंध्रके॥९९॥वामना
सापुटेध्यात्वानिर्गतस्वांजलिस्थितः॥संपूज्यप्रतिपादौतुपुष्पमाप्यममंत्रकं॥१००॥सहस्रशीर्षामंत्रेणकुर्या
दावाहनंविभुं॥हृत्पद्मेदेवमावाह्यबहिर्बिंबेनियोजयेत्॥१०१॥आवाहनादिषण्मुद्राभक्तेमुद्राप्रदर्शयेत्॥
आवाहनंस्थापनंचसंमुखीकरणंतथा॥१०२॥संनिरोधप्रसादंचावकुंठनमेवच॥शंखंचक्रंगदांपद्ममु
सलंपद्ममेवच॥१०३॥धेनुश्चैवचबाणंचभक्तेमुद्राःप्रदर्शयेत्॥भोस्वामिञ्जगतांनाथयावत्पूजावसानकं॥१०४॥
तावत्संप्रीतिभावेनबिंबेस्मिन्संनिधौभव॥एतन्मंत्रेणसंप्रार्थ्यपादौपुष्पांजलिंक्षिपेत्॥१०५॥यथादेहेतया

देवेन्यासंकुर्याद्विचक्षणः॥आद्ययावाहनंकुर्यात्सहस्रशीर्षइत्यृचा॥१०६॥आसनंपुरुषणवेएतावानितिपा
द्यकं॥त्रिपादूर्ध्वउदैत्यर्घंतस्मादिराळ्चमनंतथा॥१०७॥यत्पुरुषेणेतिस्नानंकृत्वापूजोपचारकं॥पंचा
मृतंगंधतोयंविशेषस्नपनानिच॥१०८॥तंयज्ञंबर्हिषेत्यादिकुलस्माद्यज्ञोपवीतिनं॥तस्माद्यज्ञात्सुगंधंवेत
स्मादश्वेतिपुष्पकं॥१०९॥भगवंतमनुप्राप्यततआवरणंयजेत्॥अंगैरद्याद्दृतिंकुर्यामूर्तिभिस्तदनंतरं॥
११०॥अग्नीशासुरवायव्यदिक्षुकोणेषनुक्रमात्॥वासुदेवेसंकर्षणःप्रद्युम्नश्चानिरुद्धकः॥१११॥दिग्बले
षुप्रपूज्याःस्युःसर्वदेवाभिमुख्यकाः॥शंखंचक्रंगदांपद्मंविदिक्पत्रेषुचार्चयेत्॥११२॥कौस्तुभंवनमालांच
नमाल्यंतथैवच॥दिक्पत्रेषुप्रपूज्यैतानृतीयावरणंत्विदं॥११३॥ध्वजस्तुगरुडःशंखनिधीपद्मेनिधिस्तथा
॥गणपार्चायेद्दुर्गांश्चविष्वक्सेनस्तथैवच॥११४॥पूर्वाद्यष्टदलेचैवचतुर्थावरणंयजेत्॥इंद्राग्निश्चयम
श्चैवनिर्ऋतीवरुणस्तथा॥११५॥वायुःकुबेरईशानोब्रह्माविष्णुश्चपंचमं॥पूर्वाद्याशासुदशसुवज्रश
क्तिस्तथैवच॥११६॥दंडःखड्गायुधश्चैवपाशोध्वजगदास्तथा॥पृथ्वीपद्मंचचक्रंचदिक्पालास्त्वनुषट्त

था॥११७॥ब्रह्मादेनारदश्चैवपुंडरीकःपराशरःव्यासःशुकश्चांबरीषोवसिष्ठोदालभ्यश्चौनकाः॥११८॥बलि
र्बिभीषणोरुक्मांगदश्चअंगदः॥मार्कंडेयोभृगुश्चैवार्जुनःप्रमुखानिमाच॥११९॥देवस्यदक्षिणेभागेपरमभाग
वतान्न्यसेत्॥सनकःसनंदनश्चैववसुदेवशुकस्तथा॥१२०॥देवस्यवामपार्श्वेतुमहांयोगीश्वरान्न्यसेत्॥अस्त्रे
णधूपदीपादीन्प्रोक्ष्यचक्रेणरक्षयेत्॥१२१॥अमृतीकृत्यबीजेननिर्विघ्नीकृत्यबीजतः॥धेनुमुद्रांप्रदर्श्यो
गंधाद्यैरर्चयेत्ततः॥१२२॥धूपंचयत्पुरुषंदीपंब्राह्मणोस्यप्रदापयेत्॥नैवेद्यंचंद्रमामनसोगायञ्चाचमनंतथा
॥१२३॥गायञ्जेनैवतांबूलंकर्पूरावर्तिकादिकान्॥मुखवासमंत्रपुष्पदक्षोयेदर्पणादिकान्॥१२४॥समर्प्येतु
लसीभक्त्यानाभ्याआसीत्प्रदक्षिणं॥कौसप्तास्यासन्नमस्कारस्तोत्रैस्तुत्वाप्रसाद्येत्॥१२५॥तिलदानादिकंनि
त्यंस्वशक्त्याचसमाचरेत्॥अथोघृतदेवाज्ञःशंखहस्तकरंक्षिपेत्॥१२६॥होमस्थानंप्रयायाच्चआसनेउपवि
श्यच॥ऋष्यादिन्यासकान्कृत्वाषट्करांगुलिरंकरान्॥१२७॥पुरतोग्निंप्रतिष्ठाप्यमंगानावाहयेत्ततः॥सहस्रशी
र्षामंत्रेणदेवबिंबंस्थितंतया॥१२८॥आधारादिंश्चपूर्वंतुउपर्यावरणस्थितः॥आवाहनादिकान्कृत्वावैष्णवाग्निंस

मर्चयेत्॥१२९॥जुहुयात्पुरुषसूक्तेनषोडशाज्यतिलानकैः॥अंगमंत्रप्रमाणेनषोडशाहुतिकांत्यजेत्॥१३०॥पुरु
षसूक्तंजपेत्तत्रप्रार्थयेच्चमनोरथान्॥समाप्यहोमवद्भिर्स्यबिंबेसंयोज्यमंत्रतः॥१३१॥पुनःषोडशमिर्मंत्रैदद्या
त्पुष्पाणिपौरुषः॥पूजाजपाग्निकार्योद्यैःसुकृतंसमुपार्जितं॥१३२॥भगवंदेवदेवेशशंगृहाणनमोस्तुते॥एवंमं
त्रंसमुच्चार्यवरहस्तेविनिक्षिपेत्॥१३३॥ममज्ञानाज्ञायतेयोविष्णुस्थिरभक्तये॥व्याप्यर्थसिद्धयेदेवभुक्तिंशि
ष्टंप्रयच्छमे॥१३४॥एतदुक्तस्यमंत्रेणतीर्थंबुपिबतेनरः॥न्यासंविधायदेवेशमुद्वास्यहृदिविन्येसेत्॥१३५॥
यज्ञेनयज्ञमंपूर्णेयोज्यतेपरमात्मनि॥सर्वविष्णुमयंध्यात्वाचिंतयेत्पुरुषोनमः॥१३६॥एवंसर्वंजपेद्यःपुरु
षसूक्तांचेनःक्रमात्॥नित्यमाराधनंकुर्यात्सदेवमधिगच्छति॥१३७॥धन्योनरःसज्ञायुष्मान्कीर्तिमान्पशुमा
न्भवेत्॥सुखीभूत्वाचिरंकालंमंतेविष्णुपुरंव्रजेत्॥१३८॥ ॥इतिश्रौनकीयेदेवतापूजाविधिः॥ ॥वैश्वदेवमपिप्रो
क्तंपूर्वैरेवमनीषिभिः॥औपासनेतुहोतव्यंशालाग्नौवाविजानता॥१॥विकल्पेच्छयाकार्योनास्त्रेचात्रव्यव
स्थितः॥अन्नस्यचात्मनश्चैवसंस्कारार्थंतदिष्यते॥२॥वर्जयित्वाविशेषान्नंमुद्गेनान्नेनतद्भवेत्॥वैश्वदेवंग्र

हस्यस्य प्रातराभेरणं भवेत्॥३॥स्नातकेनापि तत्कार्यं दृष्यकृष्याकोभवेद्यदि॥आदौ चकर्मणोंतेचवङ्केः परिसमू
हनं॥४॥पर्युक्षणं चकर्तव्यं तत्राधिश्रित्यपावके॥हविरद्भिश्चसंप्रोक्ष्यसमुद्वास्यचतत्पुनः॥५॥त्रिधाविभज्यसि
द्धौनंत्रिःप्रोक्ष्यपुरतस्थितं॥पर्यग्निकरणंकुर्यात्सिद्धान्नस्याप्ययंविधिः॥६॥हुतेत्वादादिभागेनदेवयज्ञमतःप
रं॥अभ्यर्चगंधपुष्पाद्यैरादायादायपाणिना॥७॥अयमग्नयेनजुहुयात्मव्यंहृदि निधायच॥नामधेयंस्मृहो
तव्याअग्निहोत्रस्यदेवताः॥८॥प्रजापतयइत्येवमुक्त्वैवजुहुयाततः॥सूर्यादिभिर्देशभ्यश्चकुर्यात्मातर्देशाकु
तीः॥अग्न्यादिभ्योदशभ्यश्चसार्यंहोमोविधीयते॥कीर्तितोदेवयज्ञोयंभूतयज्ञमथाचरेत्॥९॥मध्यभागस्थि
तान्नेनभूतयज्ञंसमाचरेत्॥भूतयज्ञेपितंत्राणांस्वाहाकारोभवेदिह॥१०॥प्राक्संस्थंपरिषिच्यापःपरिशुद्धेम
हीतले॥आयुष्कामोदिवारात्रौसूपौकारंबलिंहरेत्॥११॥आयुरारोग्यकामस्तुधन्वाकारंबलिंहरेत्॥मृत्युरो
गविनाशार्थंनराकारंबलिंहरेत्॥१२॥जनवश्यकर्तुकामोवल्मीकास्यंबलिंहरेत्॥आयुरारोग्यसौभाग्यंपुत्र
विद्यापशूनपि॥१३॥कामश्रीधर्ममोक्षार्थंचक्राकारंबलिंहरेत्॥पंचस्वेतेषुविप्राणांमुख्यश्चक्राकृतिर्भवेत्॥ ७४

॥१४॥चक्राकाममथाष्टारंकुर्यादग्निसमीपतः॥प्रागादीशानपर्यंतंअगुल्यग्रैर्महीतले॥१५॥बधदरीफलमा
त्राभमंगुल्यग्रातुविक्षिपेत्॥सूर्योदिवास्तुपर्यंतंनैरंतर्येणतोहरेत्॥१६॥इंद्रायेंद्रपुरुषेभ्यःप्राच्यांप्राक्संस्थितं
बलिं॥यमाययमपुरुषेभ्योहरेद्दक्षिणतोबलिं॥१७॥उदक्वङ्नैर्ऋतदक्षिणेतरयोर्दिशोः॥प्रतीच्यांवारुणायेतिबलिं
प्राक्संस्थितंहरेत्॥१८॥ततोवरुणपुरुषेभ्यस्चक्रमाच्चबलिंहरेत्॥सोमायसोमपुरुषेभ्योबलिमुत्तरतोहरे
त्॥१९॥चक्रांतरेमध्यदेशेततोब्रह्मबलिंहरेत्॥प्राच्यांब्रह्मबलेर्ब्रह्मपुरुषेभ्योबलिंहरेत्॥२०॥विश्वेभ्यश्चैवदेवे
भ्योब्रह्मदक्षिणदेशके॥ब्रह्मणःपश्चिमेदेशेसर्वभूतेभ्यएवच॥२१॥ब्रह्मणोत्तरदेशेतुदिवाचारिभ्यएवच॥दि
वासंध्यापदस्थानेरात्रावग्निपदंवदेत्॥२२॥दिवाचारिपदस्थानेनक्तंचारिपदंवदेत्॥रक्षोभ्यस्वाहेतिबलिंचक्र
स्यशानतोहरेत्॥२३॥भूतयज्ञइतिप्रोक्तःपितृयज्ञस्त्वयोच्यते॥पात्रस्योत्तरदेशस्यभागंचैवतृतीयकं॥२४
॥अंगुष्ठपर्वमात्रांनंपरिषिच्यप्रयत्नतः॥आग्नेयाभिमुखोभूत्वाप्राचीनावीत्यतःपरं॥२५॥सव्यंजान्वाच्यभू
मौतुपराचीनेनपाणिना॥चक्रस्याग्नेयभागेतुपितृमेधबलिंहरेत्॥२६॥स्वधापितृभ्योमंत्रेणदक्षस्यान्नंनिवे

दयेत्॥पितृयज्ञान्नशेषेणभवेद्यज्ञोपवीतिना॥२८॥बलिश्चाभ्यामपिहरेत्वाहाकारेणचोदितो॥दोस्यामन्न
बलावेतौस्वानोदेवप्रचोदितौ॥२९॥देवतद्वापितृत्वद्वातस्यमपिबलिंहरेत्॥प्रत्यक्दक्षिणदेशेतुस्यामायचब
लिंहरेत्॥३०॥चक्रस्यवायुकोणेतुरायबलायबलिंहरेत्॥क्रोचेकरेणयोविप्रःसदाभूतबलिंहरेत्॥३१॥सर्व
यापविनिर्मुक्तोविष्णुसायुज्यमाप्नुयात्॥देवयज्ञान्नशेषेणगृहद्वारादिभुक्षिपेत्॥३२॥चांडालपतितादिभ्योभू
तयज्ञान्नशेषतः॥पितृयज्ञान्नशेषेणवायसेभ्योबलिंहरेत्॥३३॥प्रक्षालितांघ्रिपाणिस्तुद्वाचम्यप्रविशेद्गृहं॥पि
तृयज्ञविधिःप्रोक्तोनरयज्ञस्त्वथोच्यते॥३४॥पुष्कलस्यप्रमाणान्नंमन्यपात्रेसमुद्धरेत्॥अक्षतोदकहस्तेनचो
पवीतीनिवेदयेत्॥३५॥योगिभ्यःसनकादिभ्यइदमंनमितीतिच॥दद्यादन्नंतविप्रायकुर्याद्गृहबलिंतथा॥३६॥
अन्नमुद्दिश्यवेदाक्तद्यन्नदोषेनलिप्यते॥ ॥इतिशौनकीयेवैश्वदेवः॥ ॥शौनकोहंप्रवक्ष्यामिधनलिप्सुर्द्विज
स्यतु॥कृत्वाहोमादिकंशेषेहयश्वाद्गच्छेद्यथाविधिः॥१॥धनमर्क्षेयितंलिप्सुःकृत्तिर्द्विगमिषःपुरा॥अन्वा
धानादिकंतंत्रंकृत्वोपासनपावके॥२॥वयसुत्वापयइतिसूक्तेनप्रत्यृचंघृतं॥उक्तोरिष्टोतंत्रंचकुर्याद्यद्वाजपादि

MEMORIAL

कं॥३॥इतिधनार्जनविधिः॥ ॥नष्टद्रव्यपुनःप्राप्तंयइच्छेत्तस्यमुध्यतां॥संप्रनष्टेभवेतोद्दोक्तिहत्यौपासनानले॥१॥
तंत्रंपुरस्तनंकृत्वासंपूज्यग्निंदुषादिना॥सूक्तेनप्रत्यृचंहोमंकुर्वेतांजपतांतुवा॥ऊर्ध्वंतंत्रंचकुर्वंतमित्येषानिष्कृ
तिर्द्वयोः॥एष्यन्महांतमध्वानमल्पंवातिभयान्वितं॥३॥पुरस्तात्तत्रमाचार्योवह्नौपासनेनतः॥संपूषन्नध्वन
इतिसूक्तेनप्रत्यृचंघृतं॥४॥स्रुक्स्रुवारथवासूक्तंजपेदेतद्यथापुरं॥ऊर्ध्वंतंत्रंतकुर्वंतोर्युक्तेषातस्यनिष्कृतिः॥५॥
येनकेनापिकार्येणरथमारूढमिच्छतः॥त्रैवर्णिकस्यकर्तव्यंयत्रयत्राभिधीयते॥६॥प्रत्यग्देशेरथस्यादोवमि
त्वाब्रह्मणःशुचिः॥अहतेपूर्वमित्याद्यंमंत्रमुच्चार्यरेखिकं॥७॥रथस्यचक्रेद्वाभ्यांपाणिभ्यांयुगपस्पृशेत्॥मं
त्रमुच्चार्यवायोष्ट्वावीर्येणेत्यादिकंरथं॥८॥आरोहेद्दक्षिणेनपादेनायेनरेणच॥मंत्रंब्रह्मइइत्याद्यंसंगृह्याश्वव
त्सानकं॥९॥उत्कारयस्यरज्ज्ञानांअभिमंत्रनमाचरेत्॥एवहंतिरथंवाहारज्जुसंबंधिवर्जितः॥१०॥तामेवमंत्रमुच्चा
र्यतासमुमंत्रेणसंस्पृशेत्॥अश्वायराज्ञेतिष्ठादिशंसंत्रंतदाजपेत्॥११॥सहस्रसनिमइत्याद्यंप्रवहेत्येवमृत्विजां
॥वनस्पतेवीड्वंगोहीत्याद्यामृचंजपेनदा॥१२॥रथप्रकाशान्यन्यानिशकटादीनिचाजया॥ऋचावनस्पतिंकृत्वा

त्यारोहेदभिमृश्यतं॥१३॥ऋचयद्यादिस्थिरोगावाविद्याद्यारथांगकं॥विद्यतेतस्थशेनत्रदंगवंसमुदीरयन्॥१४
॥इत्येवरथमारोहेत्क्रीतंवालब्धमेववा॥पूर्वोक्तंवाभिन्नंचेद्दिवसमुदीर्यते॥१५॥पराहितमयारूढंरथमिच्छे
त्तदापिच॥पूर्वोक्तेनप्रकारेणसमारुह्यार्थतेनतु॥१६॥प्रसिद्धंरथमथवाईदृशोषविवर्जितं॥प्रदक्षिणंपरीत्याथ
शास्त्रबद्धफलैर्युताः॥१७॥आहरेदथवायद्यत्कुटुंबस्योपकारकं॥द्रव्यंतदहरेदेवमथरोहणमीरितं॥१८॥नवा
धिरोहणंयस्मिकालेकार्यवशाद्भवेत्॥सुत्रामाणंपृथिवीमित्येवमाद्यामृचंतदा॥१९॥उच्चार्यनावमारोहेत्सुरवे
संतरणेक्षये॥ ॥इतिशौनकीयेरथमारोहणं॥ ॥प्रवस्थन्व्यवहारायसभांप्रत्यर्थिचोदितः॥अस्माकमुत्तमंक
धीत्यादिकामृचंजपेत्॥१॥जपित्वेक्षममाणोर्कंततस्तांप्रविशेत्सभां॥यदाभिभवतुंशत्रुमिच्छेतविजिगीषया॥
२॥ऋषभंमासमानानामितिसूक्तंजपेन्नरः॥अस्तंगतेदिनकरेमध्यांचोपास्यपश्चिमं॥३॥पश्चिमाभिमुखोभूत्वा
वयमित्याद्यृचंजपेत्॥एवंप्रभातेतद्वोदिवोदुहीत्यादिकांजपेत्॥४॥एवमव्यवहारांतांप्रत्यहंवैजपेदिमान्॥मं
त्रांस्तव्यव्यवहारेषुजपमायास्तमंततः॥५॥प्राप्यकार्यदिशांदेशमपुनःप्रतगतोगृही॥मंत्रयेहामाबिभीतइत्या ७६

द्यंत्रिषवंतिकं॥६॥जपित्वायसमीक्षेतबहिर्द्वारेस्थितोगृहं॥तद्हारहमित्यादिमंत्रेणप्रविशेद्गृहं॥७॥प्रविश्यतु
शिवंशग्मंशंयोःशंयोरितीरयन्॥ईक्षित्वांतमंततस्तत्रप्रपद्यासनमात्मनः॥८॥ज्येष्ठानुपूर्वपुत्राणांप्रत्येकंसर्वतः
शिरः॥पाणिभ्यांपरिगृह्याथत्रिरान्निघ्रंजपेत्तथा॥९॥अंगादंगात्संभवसीत्येवमाद्यामृचंततः॥कुमारीणांचक
मेंदंविदध्यान्मंत्रवर्जितं॥१०॥स्वक्षेत्रमुत्तरप्रोष्ठपदसंज्ञेतुतारके॥कर्षयेदथरोहिण्यांफल्गुनीषूतसुच॥११॥
त्रिषुसूक्तामृजन्मर्क्षानुगुणेन्यतमेशुभे॥मुहूर्तेप्रयतोभूत्वास्वंप्राप्यतदेततः॥१२॥द्विजैःपुण्याहवाचनंकार
यित्वासमर्चितैः॥यत्रहोमेकृतेधूमोवातश्चतोरिवलंततः॥१३॥स्वक्षेत्रंप्राप्नुयात्तत्रभूप्रदेशसमीकृते॥कृत्वोप्ले
पनंलेखाबद्धुत्वाचायपावकं॥१४॥क्षयासनंयथोयस्मिन्न्याधानादिक्रमात्॥आज्यभागावसानंचपुर
स्तंत्रंविधायच॥१५॥ततःक्षेत्रस्यपतिनावयमित्येवमादिनी॥सूक्तेनप्रत्यृचंसर्वंजुहुयाच्चयथाविधिः॥१६॥अ
त्रापिप्रत्यृचंसर्वेहोमंकुर्योदिधानतः॥तृचमुत्काहविःक्षिप्त्वाततःस्विष्टेतुदीरयेत्॥१७॥क्षेत्रस्यकर्षणारंभंक
र्षकैःकारयेततः॥ततःस्विष्टकृताद्यृचंतंत्रंपरिसमापयेत्॥१८॥यद्वासूक्तंजपित्वैरंततःक्षेत्रंप्रकर्षयेत्॥ ॥

रक्तमाल्यांबरधरःशक्तिशूलगदाधरः॥चतुर्भुजोमेषगमोवरदश्चाधरासुतः॥१॥एवंध्यात्वासमभ्यर्चरक्तगंधाक्ष
तादिभिः॥मंगलोभूमिपुत्रश्चऋणहर्ताधनप्रदः॥२॥स्थिरासनोमहाकायःसर्वकर्मावरोधकः॥लोहितोलोहिता
क्षश्चसामगानांकृपाकरः॥३॥धनात्मजकुजोभूमौभूमिदोभूमिनंदनः॥अंगारकोयमश्चैवसर्वरोगोपहारकः॥
४॥दृष्टेःकर्त्ताचहर्त्ताचसर्वेकामफलप्रदः॥एतानिकुजनामानिनित्यंयःप्रयतःपठेत्॥५॥ऋणंनजायतेतस्य
धनंयच्छंतिमंगलः॥ऋणरेखाप्रकर्त्तव्याअंगारेणतदग्रतः॥६॥एकविंशतिनामानिपठित्वातुतदंतिके॥ताम्र
प्रमाजपेत्पश्चाद्धामपादेनसंस्मरेत्॥७॥एवंकृतेनसंदेहोऋणहर्त्ताधनीभवेत्॥भूमिपुत्रमहातेजाश्चितोद्भव
पिनाकिनः॥८॥श्रेयोयशंत्वांप्रसन्नोस्मीगृहाणार्घ्यंनमोस्तुते॥इत्येकविंशतिवारंपुत्रंकृत्वाधनीभवेत्॥९॥
॥इतिशौनकीयेमंगलविधिः॥ ॥अथपंचमहायज्ञादेवयज्ञाश्चतेधुना॥उच्यतेहरहःकुर्युरवश्यंगृहमेधिनः
॥१॥तेष्वग्नोहवनंयस्याद्देवयज्ञःसउच्यते॥यद्बलिहरणंभूमौभूतयज्ञःसउच्यते॥२॥यत्पितृभ्यःप्रदानंहिपि
तृयज्ञःसऊच्यते॥मनुष्ययज्ञःसंज्ञेयोयदन्नातिथिभोजनं॥३॥यत्त्वाध्यायमधीतेसब्रह्मयज्ञउदाहृतः॥एता ७७

न्पंचमहायज्ञान्कुर्यादहरहर्द्विजः॥४॥ब्रह्मयज्ञस्यविहितेप्रयोगःकथ्यतेधुना॥ग्रामात्प्राच्यामुदीच्यांवाप्रागु
दीच्यामथापिवा॥५॥निष्क्रम्यतत्रनदीयेतडागस्यापिवोभसि॥स्नात्वायज्ञोपवीतीचभूत्वाचम्योदकंतथा॥६॥
पवित्रेलक्षणेयुक्तेकृत्वाछिन्नाग्रतादिकैः॥तयोरेकैकमेकैकंपाणिताधारयेत्पृथक्॥७॥एवंपवित्रवंतौद्वौपा
णीकृत्वाद्वयोरथ॥सव्यस्यपाणेरंगुष्ठंप्रदेशिन्योस्तुमध्यतः॥८॥दक्षिणस्यांगुलीन्यस्यचतस्रोगुष्ठवर्जिताः॥
यथासव्यकरांगुष्ठंदक्षिणांगुष्ठवेष्टनं॥९॥कुर्वीतचैवंसंबद्धौपाणीदक्षिणसंस्थितः॥निधायस्वस्यहृदयेप
रेयत्केवलमंबरं॥१०॥संमीलिताक्षियुग्मोवानिरुध्यमवसोगतिं॥योगाद्विरूढमानंतत्कृत्वानन्यमनास्ततः॥११
॥यावंतमंत्रमधीतेनुवाकंवासूक्तंवर्चमथापिवा॥१२॥संकल्प्यमनसापूर्वेमिदमधीष्वइत्यथ॥समस्तान्याहृतीपूर्वंज
पेत्प्रणवपूर्वकं॥१३॥सावित्रींचजपेत्पश्चात्पूर्वमर्धंचशनकैःततः॥प
श्चात्समस्तामित्येवंजपित्वात्रिःसमाहितः॥१४॥ततोयावत्प्रतिज्ञातमध्यायंसूक्तमेववा॥ऋचंवाकंततोव
श्यमधीयीतस्वशक्तितः॥१५॥पश्चाद्दोनमइत्याद्यांकरोमीत्येतसंयुतं॥तृचंजपित्वापश्चाद्दोमित्येवंसमुदीर

यन्॥१६॥यद्यादतिथिभ्यःसान्नब्रह्मयज्ञस्यदक्षिणा॥अक्लिंनवस्त्रपरिधायाचांतःपुनराचमेत्॥१७॥देवादि
तर्पणंकृत्वावस्त्रनिष्पीड्यशोधयेत्॥स्नानार्थंप्रस्थितंविप्रंदेवाःपितृगणैःसह॥१८॥वायुभूतानुगंतारस्तृप्तीता
र्थंजलार्थिनः॥निराशास्तेनिवर्तंतेवस्त्रनिष्पीडनेकृते॥१९॥तस्मान्नपीडनेवस्त्रअकृतेतर्पणेद्विजः॥ ॥इतिब्र
ह्मयज्ञः॥शौनकोहंप्रवक्ष्यामिअश्वत्थस्योपनायनं॥स्थापनाद्यष्टमेवर्षेद्वादशेकादशेपिवा॥१॥उक्तकालास्व
यःशस्ताकुर्युस्तस्योपनायनं॥तत्रोत्तरायणेश्रेष्ठगुरुशुक्रप्रकाशिते॥२॥माघफाल्गुनयोःकुर्याच्चैत्रवैशाख
माघयोः॥क्षयमासाधिमासेचवर्जयेन्मौंजिबंधनं॥३॥नकुर्याच्छेदितश्वत्थेविद्युरावाग्निनाहते॥उपनयनं
प्रकुर्वीतस्कंधैःपर्णैकुरान्वितैः॥४॥शुक्लपक्षेशुभर्क्षेचसुवारेतिथिलग्नके॥चंद्रानुकूल्यकर्तुश्चदिवाकुर्यात्
प्रयत्नतः॥५॥दंतानांधावनंकुर्यात्कुर्यात्स्नानंससैलकं॥कृत्वाचनित्यकर्माणिपूज्यायावेश्वदेवता॥६॥नांदी
श्राद्धंप्रकुर्वीतएहेपुण्याहवाचनं॥तस्मिन्नेवदिवाकुर्याच्चान्नहेमफलादिभिः॥७॥कृत्वाशीर्वचनंपूर्वंततोग
च्छेत्प्रयत्नतः॥तूर्यघोषैश्चविविधैःपुण्यास्त्रीभिःसमन्वितः॥८॥ब्राह्मणैर्वेदघोषैश्चगीतवादित्रनिस्वनैः॥व

स्त्रयज्ञोपवीतंचमौंजीदंडाजिनादिकं॥९॥पूजाद्रव्यंचहोमंचगृहीत्वाश्वत्थसंनिधौ॥ततःप्रक्षालितांघ्रिश्चआच
म्येडुवि॥१०॥त्रिःपंचदशहस्तेनगोमयेनोपलिप्यच॥धान्यपिष्टेनसंपूर्यगंधमाल्यादिशोभनैः॥११॥अश्वत्थे
शानदिग्भागेकृत्वापुण्याहवाचनं॥आचार्यंवरयेत्स्नात्वाकुलिनंवेदपारगं॥१२॥वस्त्रोपवीतगंधाढ्यैरंगुलीय
ककुंडलैः॥कर्तासंपूजयेद्भक्त्यावित्तशाठ्यंनकारयेत्॥१३॥तेनैवकारयेद्दानंश्वत्थस्योपनायनं॥कुर्यात्संचा
मृतैस्तांतंतन्मंत्रैःपृथक्पृथक्॥१४॥अश्वत्थपूर्वदिग्भागेहोमंकुर्यात्सशास्वया॥उल्लेखनादियंतंचरुंतत्र
प्रकल्पयेत्॥१५॥वस्त्रयुग्मंततोदद्याद्युवंवस्त्राणिमंत्रतः॥यज्ञोपवीतंदद्याच्चयज्ञोपवीतमित्यपि॥१६॥मेख
लावत्रिगवेश्वप्राबेपामेतिमंत्रतः॥तूष्णींकृष्णाजिनंदंडंप्रदद्यात्तुयथाक्रमं॥१७॥गंधपुष्याक्षतैःशुक्लैरश्वत्थ
स्यचपश्चिमे॥अश्वत्थेवोनिषदनमित्यृचांपूजयेत्सुधीः॥१८॥निसमिद्भिर्जुहुयादाज्यमग्नआयूंष्यनुक्रमात्॥
पुरस्तादुपरिष्टाच्चकृत्वाव्याहृतिभिस्त्रिभिः॥१९॥याओषधीर्यःफलिनीरश्वत्थेवइतिक्रमात्॥वनस्पतेशतवल
शोद्यामुपर्णेतिमंत्रतः॥२०॥समिद्भिश्चरुणानैवयाज्याशीर्यैःपृथक्पृथक्॥जघ्नादाद्दशभिःसम्यगेकोकृत्वा

समाहितः॥२१॥अश्वत्थपश्चिमेदेशेप्राङ्मुखश्चोपविश्यच॥दक्षिणेनैवहस्तेनस्पृष्ट्वाश्वत्थंद्विजोत्तमः॥२२॥ओं
भूर्भुवस्वःपूर्वोतुसावित्रीत्रिर्जपेदथ॥निरीक्षयेत्ततोश्वत्थंदेवस्यत्वेतिमंत्रतः॥२३॥आत्वेतिध्रुवसूक्तेनसमाहितमि
तयेनच॥अश्वत्थनाममुच्चार्यविभक्त्याचद्वितीयया॥२४॥शलाकयासुवर्णस्यस्थापयेत्पिप्पलेवदेत्॥कृत्वा
स्विष्टकृतंपश्चाद्धोमशेषंसमापयेत्॥२५॥गंधाक्षतैस्वर्णपुष्पैर्धूपदीपोपहारकैः॥भक्ष्यैःफलैर्ताम्बूलैस्ततो
श्वत्थंप्रपूजयेत्॥२६॥धेनुंसवत्सकांदद्याद्राचार्यायसक्षिणां॥अश्वत्थाच्छादितंवस्त्रमाचार्योयप्रदापयेत्॥२७
॥अन्येषामपिविप्राणांस्वशक्त्यापूजयेन्नमः॥ब्राह्मणांदक्षिणांदद्याद्धनमवित्तानुसारतः॥२८॥ब्राह्मणान्भोजयि
त्वातुभुंजीतबंधुभिःसह॥एवंयःकुरुतेतस्यवर्धतेश्रीरसंशयं॥२९॥कुलकोटिसमुद्धृत्यब्रह्मसायुज्यमाप्नुया
त्॥ ॥इतिशौनकीयेअश्वत्थोपनयनं॥ ॥गर्भिण्युदकेसंस्कारंशिशुसंस्कारमेवच॥प्रवक्ष्यामिक्रमेणैव
शौनकोहद्विजन्मनां॥१॥उदक्यामरणेप्राप्तेगोमूत्रेणजलैःसह॥स्नाप्यब्राह्मणैरापोहिष्टादिमंत्रतः॥२॥अ
न्यवस्त्रपरीधायशवकर्मेणदाहयेत्॥गर्भिणीमरणेप्राप्तेगोमूत्रेजलजैःसह॥३॥आपोहिष्ठाभिरकलिंगैःप्रो

क्ष्यकर्तासमाहितः॥प्रेतवन्नशाननीत्वास्यादक्षिकुक्षिणं॥४॥पतिर्वादेवरोवाथगोत्रजैर्वाततोगुरुः॥पुत्रमादा
यजीवंतमनंदलासुतायच॥५॥यस्तेस्तनइतिचैकयाग्रमंत्रीत्वानिधायच॥उदरंचाव्रणंकुर्यात्षडाज्ये
नपूर्यतां॥६॥मृद्भस्मकुशगोमूत्रैरापोहिष्टादिभिस्त्रिभिः॥स्नात्वाप्रच्छाद्यवासोभिःपितृमेधनदाहयेत्॥७॥
संस्थितेसतिपुत्रेषुव्याहृत्याग्निनयेन्ततः॥मृतागर्भयुतानारीषण्मासाभ्यंतरेयदि॥८॥सहैवदहनंकुर्याद्गर्भ
च्छेदोनकारयेत्॥ ॥इतिशौनकीयेगर्भिणीश्वशुरजस्यलामरणेविधिः॥ ॥अथवक्ष्यामिसर्पस्यसंस्कार
विधिमुत्तमं॥मिन्नीवाल्मीपोर्णमास्यांपंचम्यांकारयेन्ततः॥१॥आश्लेषाधिष्ण्ययुक्तायामन्यस्यांवापिका
रयेत्॥हतसर्पवधोविप्रःपूर्वजन्मनिवायदि॥२॥अनेनदुःखजालानिप्राप्नोतिसततंनरः॥संततिप्रतिबं
धश्चजातापत्यंविनश्यति॥३॥तस्यशांतिप्रवक्ष्यामियतःसंपद्यतेसुखं॥स्नात्वागत्यततोब्रह्मदंडंदद्याद्वि
जातये॥४॥वधंप्रख्यापयेत्पापीचरेत्कृच्छ्रंश्वतुर्दश॥वधेस्मिन्जन्मनिकृतेलोहदंडंद्विजातये॥५॥द
द्यात्पवित्रशुध्यर्थंश्रोत्रियायकुटुंबिने॥विप्रायदंडमोल्यंवात्वभावेस्वतिरापयेत्॥६॥माक्षाद्वधेःक

मेकर्तुदेवदेवप्रदापयेत्॥निष्कत्रयंद्विनिष्कंवानिष्कमेकंकनीयसा॥३॥अनुमत्यादिकर्त्रंतानिष्कसार्धंत
दर्धकं॥विनशाठ्यंनकुर्वंतदद्यादिनानुसारतः॥८॥अनुज्ञांतुगुरोर्लब्ध्वासंस्कुर्यात्तदनंतरं॥प्रियंगव्री
हिगोधूमतिलपिष्टेनवाथवै॥९॥कृत्वासर्पाकृतिंतेननवंशूर्पेनिधायच॥अनेनवक्ष्यमाणेनमंत्रेणप्रार्थ
येद्द्विजं॥१०॥एहिपूर्वमृतःसर्पत्वमस्मिन्पिष्टेसमाविश॥संस्कारार्थंमहंभक्त्याप्रार्थयामिसदाहितं॥११॥वस्त्रो
पवीतंगंधाद्यैरर्चयेत्कुसुमाक्षतैः॥कर्तापुष्पांजलिंकृत्वाप्रणिपत्यहरेद्द्विजं॥१२॥प्रक्षालितांघ्रिपाणिस्तु
त्वाचम्योपविशेद्भुवि॥कुर्यात्संस्कारसंकल्पंप्राणायामपुरःसरं॥१३॥यज्ञोपवीतिनाकार्यंसर्पसंस्कारकर्मे
सु॥लौकिकाग्निप्रतिष्ठाप्यसमिदाधानमाचरेत्॥१४॥आग्नेयाग्नेयदिग्भागेभूमिंसंप्रोक्ष्यवारिभिः॥चितिं
कृत्वाथसंस्तीर्यकुशैराग्नेयकाग्रकैः॥१५॥पर्युक्ष्याग्निंपरिस्तीर्यपरिषिंचसमर्पयेत्॥कृत्वैधाधानपर्यंत
षट्पात्रासादनादिकं॥१६॥आघारौचक्षुषीकृत्वासर्पिषाचयथाविधिः॥शूर्पंगृहीत्वायत्नेनचितिमारोपये
च्छनैः॥१७॥अपसृष्टाःसृशेल्लोत्रंगत्वाचाग्निसमीपतः॥स्रुवेणजुहुयाद्राज्यमग्नेव्याहृतिभिस्त्रिभिः॥१८॥

सर्पायेजुहुयादाज्यंव्याहृत्यारिसमस्तया॥आज्यशेषंस्रुवेणैवसर्पदेहेनिषेचयेत्॥१९॥स्रुवंतत्रविधायाथ
आज्यपात्राणिबर्हिषि॥त्रिभिःप्रदक्षिणीकृत्वाप्रणिपत्यक्षमापयेत्॥२०॥चमसस्थैर्नलैःसर्पंव्याहृत्याभ्युक्ष्य
पाणिना॥अग्नेरक्षणइत्यनत्यनयासर्पापाग्निंप्रदापयेत्॥२१॥उपतिष्ठेदित्यमानंनमःसर्पेतिमंत्रतः॥ज्ञानतो
ज्ञानतोवापिकृतःसर्पवधोमय॥२२॥पूर्वजन्मनिवासर्पेतत्सर्वंक्षमयस्वमे॥इतिसंप्रार्थ्यनागेन्द्रस्त्वागत्यत
तःपुनः॥२३॥क्षीराज्येनततश्चाग्निंप्रोक्ष्याहृतिभिस्त्रिभिः॥कृतेसर्पेजलेनाग्निमभिषिंचेत्ततःपरं॥२४॥ना
ग्निमंचयनंकुर्यात्स्नात्वागम्यगृहंव्रजेत्॥ब्रह्मचर्यादिकंकार्यंत्रिरात्राच्छुद्धिरिष्यते॥२५॥चतुर्थेहनिसंप्रा
प्तेसर्वैर्नत्वानमाचरेत्॥सोदकेनागदानंचगोदानंचप्रदापयेत्॥२६॥घृतपायसभक्ष्यैश्चद्विज्ञानष्टौचभो
जयेत्॥कर्तानामपदैर्विप्रान्चयेद्दृश्यमाणकैः॥२७॥सर्पोनंतस्तथाशेषकपिलोनागएवच॥कालिकः
शंखपालश्चभूधरश्चप्रकीर्तितः॥२८॥पादप्रक्षालनंकुर्यादेतैर्नामपदैःपृथक्॥गंधपुष्पाक्षतैर्धूपैःसर्पं
चर्चयतेद्विज॥२९॥एवंकृतेविधानेनसर्पसंस्कारकर्मणि॥सर्पेहिंसाकृतात्पापान्मुच्यतेनात्रसंशयः॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥३०॥कुष्ठव्याधिग्रस्ततामुक्तःसर्वदामेषजंत्विदं॥आयुरारोग्यमैश्वर्यंप्राप्यकामानवाप्नुयात्॥३१॥प्रयोगःअद्येत्यादिदृशेवाजननिताद्यामर्षवधःकृतस्यास्यमर्षस्यसद्गतिप्राप्त्यर्थमात्मनश्चतद्दोषजननोपद्रवपरंपरानिवृत्त्यर्थंनक्षत्रकादिनागकुलप्रीत्यर्थंशास्त्रदृष्टेनकर्मणायथाशक्त्यामर्षबलिमहंकरिष्ये॥शान्तोमित्रःशंवरुणइत्यनेनस्तुतिः॥ ॥इतिशौनकीयेमर्षसंस्कारविधिः॥ ॥अथैकनक्षत्रजननेशांतिः॥बृद्धगर्गः॥एकस्मिन्नपिनक्षत्रेभ्रात्रोर्वापितृपुत्रयोः॥प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्यनिश्चयः॥१॥तत्रशांतिंप्रवक्ष्यामिसर्वाचार्यमतेनतु॥अग्नेःशतानभागेतुनक्षत्रप्रतिमांततः॥२॥तेनक्षत्रोक्तमंत्रेणपूजयेत्कलशोपरि॥रक्तवस्त्रेणसंच्छाद्यवस्त्रयुग्मेनवेष्टयेत्॥३॥स्वशाखोक्तेनमंत्रेणकुर्यादग्निमुखंबुधः॥अनेनैवतुमंत्रेणकुनेदशोत्तरंशतं॥४॥प्रत्येकंसमिदाज्यैःप्रायश्चित्तांतमाचरेत्॥अभिषेकंततःकुर्यादाचार्यैःपितृपुत्रयोः॥५॥वस्त्रालंकारगोदानैराचार्यंपूजयेत्ततः॥ऋत्विग्भ्योदक्षिणांदद्यान्माषत्रयसुवर्णकं॥६॥देवताप्रतिमादानंधान्यवस्त्रादिभिःसहः॥यानशय्यासनादींश्चदद्याद्दोषोपशांतये॥७॥भोजयेत्ब्राह्मणांश्चशक्त्याविनशाठ्यविवर्जितः॥एवंकृ ८१

शां०
८२ तेविधानेतुसर्वेशांतिर्भवेद्ध्रुवं॥८॥ ॥ ॥इतिबृद्धगार्ग्येएकनक्षत्रजननशांतिः॥ ॥ ॥शुभमस्तु॥ ॥